तथा येष्वोऽद्भुतां शक्तिं स्वीकुर्वन्तममुं जगम् ।
स्वधर्मसंसदो मध्याद् बहिश्चक्रुर्यहृदिनः ॥ १५६ ॥
अमी यहृदिनो मुख्या येष्वे कीदृशमद्विषुः ।
इत्यस्मादन्धसम्बन्धिवृत्तान्तादनुभूयते ॥ १५७ ॥
भूयश्च तेषु पश्यत्सु यहृदीयेषु वैरिषु ।
येषूराश्चर्य्यकर्माणि तेषां साक्षादसाधयत् ॥ १५८ ॥

चेदद्भुतानि कर्माणि नाकरिष्यत् स वस्तुतः ।
तदा तैर्द्वैधिभिस्तस्य छलं प्राकाश्ष्यिष्यत ॥ १५९ ॥
किन्त्वद्भुतानि कर्माणि बऊलानि करोत्ययम् ।
इत्यस्य निह्नवं कर्त्तुं नाश्रकंस्तद्विषोऽपि ते ॥ १६० ॥

वेदविद्वानुवाच ॥

चेद् येष्वः श्रक्तिमाश्चर्य्यां स्वीचक्रुस्तस्य वैरिणः ।
ते कस्मात् कारणात् तर्हि नाश्रयंस्तस्य शिष्यताम् ॥ १६१ ॥

सत्यार्थ्युवाच ॥

येषां विवेकिनी श्रक्तिः पक्षपातेन दुष्यति ।
एतादृशा जना लोके विलोक्यन्ते सुभूरयः ॥ १६२ ॥
दुराग्रहेण सञ्जातास्तत्त्वं ज्ञातुमनिच्छवः ।
ते तथ्यातथ्ययो र्न्याय्यं न कुर्वन्ति विवेचनम् ॥ १६३ ॥
मनोनीतो हि यः पक्षस्तेषामिश्टश्च विद्यते ।
तं पक्षं ते मुदा सिद्धं सप्रमाणञ्च मन्वते ॥ १६४ ॥
अमीषां यस्खनिश्टोऽस्ति तस्य पक्षस्य खण्डनम् ।
कुर्वन्ति तत्प्रमाणानि तद्युक्तिञ्चाविचार्य्य ते ॥ १६५ ॥
श्राखोक्तस्तारकोऽस्माकमयं येषूरकिञ्चनः ।
इत्यस्य स्वीक्रतिस्तेषामनिश्टाऽऽसीद् यद्दिनाम् ॥ १६६ ॥
अतस्तस्याद्भुतां श्रक्तिमपि निह्नोतुमक्षमाः ।
वथापीश्वेन नुन्नोऽयमिति ते नाङ्गीकुर्वत ॥ १६७ ॥
भवांस्तु येन जानीयाद् दृढं तेषां दुराग्रहम् ।

तदर्थमस्य दास्यामि स्पष्टमेकं निदर्शनम् ॥ १६८ ॥
आनीते सति भूतार्त्ते पुंसि कस्मिंश्चिदेकदा ।
भूतं निष्कास्य तद्रक्तं येषूः सुस्थं व्यधाज्जनम् ॥ १६९ ॥
इदं कर्माद्भुतं दृष्ट्वा सर्वे साधारणा जनाः ।
दुराग्रहोज्झिताः प्रोचु र्महात्माऽयं पुमानिति ॥ १७० ॥
केचित्तु शास्त्रिणः प्रोचु र्भूतराजसहायताम् ।
अवाप्यायं पुमान् भूतानपसारितवानिति ॥ १७१ ॥
एतत्तु चिन्तनं तेषां शास्त्रिणां कुटिलात्मनाम् ।
ज्ञात्वैवमर्थतो येषूरकरोत् तस्य खण्डनम् ॥ १७२ ॥

श्रीयेषूरुवाच ॥

अंशाः कस्यापि राज्यस्य चेदन्योन्यविरोधिनः ।
स्युस्तर्हि तस्य राज्यस्य समुच्छेदो भविष्यति ॥ १७३ ॥
लोका मिथश्च भिद्येरन् यस्याः पुर्य्या गृहस्य वा ।
कदापि सा पुरी किंवा गृहं स्थातुं न शक्नुयात् ॥ १७४ ॥
स्वयं स भूतराजस्तु भूतांश्चेदपसारयेत् ।
तदा राज्यं कथं तस्य तिष्ठेदात्मविरोधिनः ॥ १७५ ॥

वेदविदानुवाच ॥

आपत्तिं शास्त्रिभिः प्रोक्तां येन तर्केण सद्गुरुः ।
अखण्डत् तस्य तात्पर्य्यं व्याकरोतु भवान् स्फुटम् ॥ १७६ ॥

सत्यार्थुंवाच ॥

कांश्चित् कथां पुरस्कृत्य तद्याकृत्युपयोगिनीम् ।
तं येषूप्रोदितं तर्कं व्याकरोमि यथामति ॥ १७७ ॥
काः काः प्रजाः परेशेन सृष्टा नभ्यो महत्तराः ।
जगच्चये वसन्तीति सम्यग् ज्ञातुं न शक्यते ॥ १७८ ॥
तासाञ्च कीदृशी शक्तिरीश्वरेण व्यधीयत ।
इत्यस्य तत्त्वमल्पैरस्माद्दृष्टै र्न बुध्यते ॥ १७९ ॥
काश्चित्तु स्वर्गदूताख्याः प्रजा नभ्यो महत्तराः ।
सन्तीयन्मात्रमस्माभिः स्वप्नास्त्रादनुभूयते ॥ १८० ॥
तेषां स्वर्गीयदूतानां मध्ये केचित्तु साधवः ।
पुण्यात्मानश्च विद्यन्त ईश्वरादिष्टकारिणः ॥ १८१ ॥
तन्मध्येऽन्ये तु सर्गस्य काले सन्तोऽपि साधवः ।
धर्मांद् भ्रष्टा तु तत्पश्चादीश्वरस्य द्विषोऽभवन् ॥ १८२ ॥
तेषां शक्तिश्च मर्त्यानां सामर्थ्यादतिरिच्यते ।
इत्यस्य ज्ञानमस्माकं शास्त्रात् किञ्चिदवाप्यते ॥ १८३ ॥
अमी हि साधवः स्वर्गदूतास्तेजस्विमूर्त्तयः ।
सुवेगेनैश्वरीराज्ञा वहन्तीतस्ततो दिवि ॥ १८४ ॥
नराणामुपकाराय नियुक्ताश्चेश्वरेण ते ।
परेशभक्तलोकानां सदा कुर्वन्ति रक्षणम् ॥ १८५ ॥
तत्स्वर्गदूतवर्गस्य मध्ये भ्रष्टाश्च ये समे ।
यथेष्टं तेऽपि शक्यन्ति रंहसा क्रमितुं दिवि ॥ १८६ ॥

दुष्टत्वात् ते तु मर्त्यानामपकारचिकीर्षवः ।
प्रच्छन्नैस्तान् यथाशक्ति भ्रमयन्ति कुमन्त्रणैः ॥ १८७ ॥
नृणां बलात्तु तच्छक्तिः किमप्यर्थ्यन्तं विशिष्यते ।
इत्यस्य विस्तरः शास्त्रे खिस्तीये क्वापि नोच्यते ॥ १८८ ॥
ते जीवनं गतासुभ्यो जन्मान्धेभ्यश्च दर्शनम् ।
मूकेभ्यश्च गिरं दातुं क्षमाः सन्त्युत न क्षमाः ॥ १८९ ॥
इत्यादिरद्भुता शक्तिः खर्दूतेषु स्वभावतः ।
निष्ठाऽस्त्युताहो नास्तीति मर्त्यैर्ज्ञातुं न शक्यते ॥ १९० ॥
इयत्तु निश्चितं विश्वो ये खर्दूताः सदात्मकाः ।
अमी यथेश्वरस्येष्टं तथा कुर्वन्ति सर्वथा ॥ १९१ ॥
अतस्ते साधवो नॄणां भ्रमणायाद्भुताः क्रियाः ।
कदापि कुर्युरित्येषा नास्ति सम्भाविनी कथा ॥ १९२ ॥
तै र्भद्रै रीश्वरानिष्टशास्त्रप्रामाणिकीद्धतिः ।
आश्चर्यकर्मयोगेन न कदापि करिष्यते ॥ १९३ ॥
भ्रष्टाः स्वर्गीय दूतास्तु भ्रमणाय सतां यदि ।
दैवीः क्रियाश्चिकीर्षेयुस्तर्हि सेद्धुं न शक्नुयुः ॥ १९४ ॥
यतो यद्यप्यमी नॄणां कर्त्तुमिच्छन्ति दूषणम् ।
सीमा तथापि तच्छक्तेरीश्वरेण विधीयते ॥ १९५ ॥
बलं दुरात्मनां तेषां सर्वशक्तिः स दाम्यति ।
मर्य्यादां तेन निर्दिष्टां तेष्यत्येतुं न शक्नुयुः ॥ १९६ ॥
अतोऽ सच्छास्त्रसिद्ध्यर्थं दैवकर्मप्रदर्शनम् ।

कर्त्तुं ते नानुमन्येरन्निति विश्वसिमो वयम् ॥ १९७ ॥
चेद्वा ते मायया मिथ्याशास्त्रप्रामाणिकोक्तिम् ।
कुर्य्युस्तर्हीश्वरस्तेषां प्रतिकारं करिष्यति ॥ १९८ ॥
स भक्तेरीश्वरीयाया दर्शनेन कथञ्चन ।
भ्रष्टानां स्वर्ग्यदूतानां मायां खण्डेद् न संशयः ॥ १९९ ॥
तत्त्वार्थिनां हि साधूनां सिद्धिमिच्छन् परेश्वरः ।
कुशास्त्रपोषकाद् व्याजाद्रक्षेदित्यनुमीयते ॥ २०० ॥
किञ्चासच्छास्त्रपुष्ट्यर्थं दैवकर्मप्रकाशने ।
दृष्टेऽपि तन्न गृह्णीयुरसच्छास्त्रं मनीषिणः ॥ २०१ ॥
अधर्मवर्द्धकं यद्धि शास्त्रं विभ्रान्तिकारकम् ।
तच्छास्त्रमीश्वराज्जातं सत्त्वमूलाद् न सम्भवेत् ॥ २०२ ॥
अतोऽसच्छास्त्रमीदृक्षं पुष्टं कर्मभिरद्भुतैः ।
दृष्ट्वाऽपि सज्जनास्तन्न मन्येरन्नीश्वरोद्भवम् ॥ २०३ ॥
पुनः परेश्वरेष्टस्य सच्छास्त्रस्योदयो भुवि ।
भ्रष्टानां स्वर्ग्यदूतानामत्यनिष्टः प्रतीयते ॥ २०४ ॥
यतः परेश्वरेष्टेन सच्छास्त्रेण प्रबोधिताः ।
नरा धर्मे प्रवर्त्तेरन्नारोहेयुश्च सद्गतिम् ॥ २०५ ॥
तथा सिद्धे तु मर्त्यानां त्राणे तेषां दुरात्मनाम् ।
नरा हितानि भज्येरन् चेष्टनानि समन्ततः ॥ २०६ ॥
अमी च यद् मनुष्याणां हृत्सु कल्मषवर्द्धकम् ।
राजत्वं कर्त्तुमिच्छन्ति तस्य ध्वंस स्तदा भवेत् ॥ २०७ ॥

तस्माच्च यस्य संवृद्धा तद्राज्यस्य क्षतिर्भवत्।
एतादृशस्य शास्त्रस्य ते नाभीक्ष्येयुरुद्भवम् ॥ २०८ ॥
अतस्तादृक्षशास्त्रस्य पोषणार्थाय कान्यपि।
कदाप्याश्चर्य्यकर्माणि न कुर्वीरन्नमी शठाः ॥ २०९ ॥
तदेव सदुरर्यैषू भ्रंष्टं स्वदूतमुद्दिशन्।
यद्धदिप्रोदितापत्तेः परिहारार्थमब्रवीत् ॥ २१० ॥
अमुष्य भूतराजस्य नरजातिं प्रशासतः।
सुघोरं विक्रमं भंक्तुं येषू भूमाववातरत् ॥ २११ ॥
अतो भूतेश्वरः स्वस्य राज्यस्याशंक्य नाशनम्।
येष्वा प्रवर्त्तितं धर्मं प्रतिरोद्धुमचेष्टत ॥ २१२ ॥
कथं स तर्हि भूतेशो येषूधर्मस्य पुष्टये।
कृत्वाऽद्भुतानि कर्माणि स्वारेः कुर्य्यात् सहायताम् ॥ २१३ ॥

वेदविदानुवाच ॥

यदस्मिन् विषये सर्वं भवान् साम्प्रतमूहते।
तद् युक्तिसिद्धमस्तीति स्वीकरोमि मुदा स्वयम् ॥ २१४ ॥
दुरात्मभूतसामर्थ्यहर्त्तुं यैष्वः सहायताम्।
स्वयं भूतेश्वरः कुर्य्यादित्यसम्भाविनी कथा ॥ २१५ ॥
अतोऽद्भुतानि कर्माणि येषूच्चेद् वस्तुतोऽकरोत्।
तदा भूतेशसाहाय्याद् विनाऽकार्षीद् न संशयः ॥ २१६ ॥
तथा तु सत्यसौ यानि दिव्यकर्माण्यसाधयत्।
तानीश्वरानुमत्यैव कृतान्यासन् न चान्यथा ॥ २१७ ॥

तादृक्षा चाद्भुता शक्ति र्यस्मिन् शास्त्रप्रवर्त्तके ।
ईशेनार्प्यैत तत्प्रोक्तं शास्त्रमप्यैश्वरं भवेत् ॥ २१८ ॥
येष्वस्वरित्रशेषस्तु यः श्रोतव्योऽवशिष्यते ।
भवानेतर्हि तं सर्वं कथयत्विति कामये ॥ २१९ ॥
चरित्रशेषमाकर्ण्य ज्ञातुं श्रद्ध्यामि निश्चितम् ।
दैवीश्वरार्पिता शक्ति र्यैष्वि निष्ठाऽभवद् न वा ॥ २२० ॥

सत्यार्थुवाच ॥

आश्चर्यकर्माणि महान्ति साधयन्
सद्धर्ममार्गं प्रवदंश्च मुक्तिदं ।
स प्रायशोऽब्दत्रितयं जगद्गुरुः
पर्य्यट येषूः शुभदः खनीवर्ति ॥ २२१ ॥
क्वचास्तदीयैरुपदेशनैर्वरैः
शक्त्या च तस्याद्भुतया चमत्कृताः ।
नुन्नोऽयमीशेन गुरुर्विभूतिमान्
इत्थं मनुष्या बहवो विशश्वसुः ॥ २२२ ॥
साधारणै र्लौकिगणैस्तथा कृतं
विज्ञाय येष्वो बऊलं समादरम् ।
ईर्ष्यासमाविष्टहृदो यद्बदिनो
मुख्यास्तदीयं समकल्पयन् बधम् ॥ २२३ ॥
ततः सदात्मानममुं पदातिभिस्
ते ग्राहयित्वा वरधैर्य्यशालिनम् ।

विचारशालामनयञ् जिघांसवो
धर्मात्मकं दोषयुतं यथाऽधमम् ॥ २२४ ॥
द्वेषेण दोषान् विविधानवास्तवान्
आरोपयन्तश्च मृषा सदात्मनि ।
ते प्राड्विवाका ऋतधर्मबुद्धयो
दण्ड्यं विनिर्ण्युरदण्डकारणम् ॥ २२५ ॥
नानापमानैः कठिनान्तरात्मकास्
ते तं तिरस्कृत्य महादरोचितम् ।
शेषे ऋजातेः परमोपकारिणं
पीडाभिरघ्नन् विकटाभिरर्दितम् ॥ २२६ ॥
तेषामरीणां तनुविक्रमाणां
शक्तिं कनिष्ठां परमेशपुत्रः ।
भंक्त्वा तदीयाक्रमणादशङ्कोद्
आत्मानमुद्धर्तुमनन्तशक्तिः ॥ २२७ ॥
अयं तु सूनुः परमात्मनो महान्
आत्मानमुत्सृज्य बलिं सुपावनम् ।
ऋजातिमङ्गोबलदूषितां क्षयात्
समुद्धरेदित्यमियेष तत्पिता ॥ २२८ ॥
अतः सहिष्णु बलमात्मवैरिणां
येषू र्न रन्ध्रंस्तनुतेजसामपि ।
दोषीव दुष्टे मनुजे हतो बलिर्

भूत्वा च दण्डं बुभुजे नराङ्गसाम् ॥ २२९ ॥

यदा स कर्त्ता जगतां तनुं जहौ

तदाऽन्धकारो वसुधां समावृणोत् ।

ततश्चकम्पे चकितेव मेदिनी

शिलोच्चयाः सन्निहिताश्च पुस्फुटुः ॥ २३० ॥

परन्तु मृत्युः सुतमीश्वरीयं

धर्त्तुं स्वपार्श्वे न चिरं शशाक ।

स मृत्युजेता दिवसे तृतीये

जीवन् श्मशानात् सहसोदतिष्ठत् ॥ २३१ ॥

निजानुगेभ्यो मुक्तरात्मदर्शनं

दत्त्वोपदेशै र्विविधैः प्रबोध्य च ।

स्वधर्मसंवादनिवेदनाय तान्

दूतान् शुभोदन्तवहान् न्ययुंक्त सः ॥ २३२ ॥

तथा च भूमौ दिनविंशतिद्वयं

स्थित्वा स येषू रमरत्वदायकः ।

स्वशिष्यसाद्भावनीतलं त्यजन्

स्वर्गं ययौ सु र्गगने तिरोदधे ॥ २३३ ॥

विश्वासमस्मिन्नरतारके दृढं भक्तिञ्च कृत्वा कलुषं विहाय च ।

एनोविमुक्तिं समवाप्नुयु र्नराः शेषे च सिद्धिं परमां सनातनीम् ॥ २३४ ॥

वेदविद्वानुवाच ॥

येषूखिस्तो यदा भूमिं विहायान्तर्दधे दिवि ।
तत्पश्चात् तस्य धर्मस्य प्रचारो भुव्यभूत् कथम् ॥ २३५ ॥

सत्यार्थ्युवाच ॥

श्रीखिस्तो रूपतः शिष्यानत्र त्यक्त्वा महीतले ।
तैः साकं वस्तुतस्तस्यावप्रत्यक्षोऽपि सर्वदा ॥ २३६ ॥
ते येन स्वस्य कार्य्यस्य सिद्धये शक्तिमाप्नुयुः ।
तदर्थमीश्वरस्यात्मा तेषां चित्तेष्ववातरत् ॥ २३७ ॥
साहाय्येनैश्वरेणामी धर्ममर्मविवेकिनः ।
सहिष्णवो महोत्साहा निर्भयाश्च प्रजज्ञिरे ॥ २३८ ॥
तेषां धर्मोपदेशश्च येन प्रामाणिकीभवेत् ।
तदर्थमद्भुतां शक्तिमीशस्तेषु समार्पयत् ॥ २३९ ॥
एतादृक्शक्तिसम्पन्नाः सन्तोऽत्यन्तोद्यमेन ते ।
निजस्य स्वामिनो धर्मं स्वस्मिन्नीदृत्यकीर्त्तयन् ॥ २४० ॥
तेषां वचोभिर् आश्चर्य्यकर्मप्रामाणिकीक्षतैः ।
आकृष्टा भूरयो लोका येभ्यः शिष्यत्वमाश्रयन् ॥ २४१ ॥
परन्तु दृष्ट्वमालोक्य येषूखिस्तानुयायिनाम् ।
ईर्ष्याग्निनाऽज्वलन् दुष्टाः शासितारो यहूदिनः ॥ २४२ ॥
बलाच्च रोद्धुमिच्छन्तस्तस्य धर्मस्य विस्तृतिम् ।
ते तत्प्रचारकान् दण्डैर्नानारूपैरपीडयन् ॥ २४३ ॥
कारावन्धेन ते कांश्चित् कशाघातेन चापरान् ।

अन्यांश्च प्राणघातेन निर्द्दोषानप्यदण्डयन् ॥ २४४ ॥
परन्तु तादृशैर्दण्डैरप्यभग्ना भयङ्करैः ।
स्वकार्य्याद् न न्यवर्त्तन्त येषूधर्मप्रचारकाः ॥ २४५ ॥
तथा चोद्योगिनां तेषामुपदेशैः प्रवर्त्तितः ।
यद्दिनां बऊर्वर्गो येष्वो धर्मं गृहीतवान् ॥ २४६ ॥
तत्पश्चात् स्वस्य देशस्य सीमां तीर्त्वा महोद्यमाः ।
येष्वः शिष्या विदेशेषु तस्य धर्ममप्रथन् ॥ २४७ ॥
अमुष्मिन् समये प्राप्ता यवना रोमिणोऽपि च ।
मेदिन्याः पश्चिमे भागे न्यवसन् कीर्त्तिमत्तमाः ॥ २४८ ॥
शौर्य्येण विद्यया चामी ख्याताः सन्तोऽपि भूतले ।
यथार्थं नाधरन् ज्ञानमीश्वरस्य भ्रमान्विताः ॥ २४९ ॥
ते सत्यमीश्वरं त्यक्त्वा केवलं पूजनोचितम् ।
नाना सिद्धेविरेऽनर्घ्यान् देवान् देवीभिरन्वितान् ॥ २५० ॥
तदा तादृक्तमालोक्य सत्यमार्गव्यतिक्रमम् ।
श्रीयेषूसेवकास्तस्मादतिक्लिष्टहृदोऽभवन् ॥ २५१ ॥
अमीषां भ्रान्तलोकानां प्रवृत्ताश्चोपदेशने ।
ते मिथ्यादेवतापूजां वर्जनीयामवादिषुः ॥ २५२ ॥
किञ्चेश्वरस्य माहात्म्यं सद्गुणांश्च प्रकाश्य ते ।
निस्तारं केवलं येष्वो द्वारा गम्यमसाधयन् ॥ २५३ ॥
सिद्धेच्च येन नूनस्य शास्त्रस्यापौरुषेयता ।
तदर्थं तेऽद्भुतां शक्तिं स्वेषु निष्ठामदीदृशन् ॥ २५४ ॥

पथो नूतनस्य साधुत्वं प्रामाणिकत्वञ्च भूरयः ।
दृष्ट्वा तत्त्वार्थिनो लोकाः सत्यं मत्वा तमाश्रयन् ॥ २५५ ॥
विभ्रान्तबुद्धयस्त्वन्ये लोकास्तत्त्वाबुभुत्सवः ।
स्वदेशीयस्य धर्मस्य पक्षपातमकुर्वत ॥ २५६ ॥
असन्तुष्टाश्च देवानां स्वाभीष्टानामनादरात् ।
ते नूतनशास्त्रसन्देष्टून् द्वेषदृष्ट्या व्यलोकयन् ॥ २५७ ॥
अतोऽमी देवतैष्टारो नूतनशास्त्रप्रचारकान् ।
कशाघातादिभिर्नाना घोरै र्दण्डैरपीडयन् ॥ २५८ ॥
येष्वो दूतास्तु तादृक्षान् दण्डान् भुक्त्वाऽपि दुःसहान् ।
नूतनस्य त्राणमार्गस्य न न्यवर्त्तन्त कीर्त्तनात् ॥ २५९ ॥
अमीषामार्ज्जवं भक्तिं सदाचारं सहिष्णुताम् ।
दृष्ट्वा ततोऽधिका लोका येष्वः पन्थानमन्वगुः ॥ २६० ॥
परन्तु तादृशीं तस्य धर्मस्यालोक्य विस्तृतिम् ।
तद्देशनायका भूपास्तदुच्छेदाय येतिरे ॥ २६१ ॥
स्वं धर्मं येन वर्ज्जयु र्येषूखिस्तस्य सेवकाः ।
तदर्थं तानमी क्रूरा नानादण्डैरपीपिडन् ॥ २६२ ॥
ते कांश्चनासिना जघ्नुरपरांश्चाग्निनाऽदहन् ।
अन्यांश्च कौतुकागारे सिंहै र्दार्य्यान् निचिक्षिपुः ॥ २६३ ॥
तादृक्षै स्त्रासिता भीमैर्दण्डैः केचन भीरवः ।
खिस्तीयाः स्वस्य धर्मस्य तदा चक्रुरपक्रतम् ॥ २६४ ॥
अन्ये तु निर्भयाः स्थित्वा तीव्रां भुक्त्वा च यातनाम् ।

धैर्य्येण सेहिरे मृत्युं स्वीयधर्मदिधीर्षया ॥ २६५ ॥
युवानो बालका वृद्धा युवत्यश्च प्रभोः कृते ।
स्वप्राणोत्सर्ज्जनं चक्रुरैक्ष्या शक्त्या दृढीकृताः ॥ २६६ ॥
तथा खिस्तीयधर्मस्य वृद्धौ सत्यां शनैः शनैः ।
शेषे पाश्चात्यदेशेषु मिथ्याधर्माः समेऽलुपन् ॥ २६७ ॥

वेदविद्वानुवाच ॥

भवान् येषूक्तताश्चर्य्यकर्माख्यानं यदुक्तवान् ।
मनोयोगेन तत् सर्वमधुना श्रुतवानहम् ॥ २६८ ॥
परन्तु वस्तुतो येषू स्तादृक्कर्माण्यसाधयत् ।
इत्यस्य निश्चयो विद्वन् केन रूपेण गम्यते ॥ २६९ ॥
यद् येषूद्देशि सम्पूर्णं भवानाख्यानमुक्तवान् ।
तत् सत्यमस्त्युतासत्यमिति निर्धार्य्यते कथम् ॥ २७० ॥

सत्यार्थ्यवाच ॥

ये द्वादशादिमाः शिष्या येष्वः पार्श्वे सदाऽऽसत ।
ते सर्वे तत्कृताश्चर्य्यकर्मणां साक्षिणोऽ भवन् ॥ २७१ ॥
तन्मध्ये द्वौ तु योहन्नि र्मात्थायश्चेति नामकौ ।
स्वनाथकर्मसम्बन्धे द्वौ प्रबन्धौ प्रणिन्यतुः ॥ २७२ ॥
तदन्यौ मार्कलूकाख्यावादिशिष्यानुयायिनौ ।
द्वौ येषूद्देशिनावन्यौ प्रबन्धौ चक्रतुः पृथक् ॥ २७३ ॥
श्रीयेष्वः स्वर्गमात् पश्चादचिरे समये गते ।
सर्वेऽमी ग्रन्थकर्त्तारः स्वान् प्रबन्धानकुर्वत ॥ २७४ ॥

यदा तेषां प्रबन्धानां प्रचारः प्रथमोऽ भवत् ।
तदा येषूचरित्रज्ञा बऊलोकाख्वजीविषुः ॥ २७५ ॥
येषूवृत्तान्तसुज्ञानां तेषां मध्ये तु भूरयः ।
तद्धर्मद्वेषिणोऽभूवन् पुरुषाः सूक्ष्मबुद्धयः ॥ २७६ ॥
अतश्चेत् कोप्यऽसत्योऽर्थस्तेषु ग्रन्थेष्ववेत्स्यत ।
तदा तत्खण्डनं कर्त्तुं मशूकिष्यन्नमी द्विषः ॥ २७७ ॥
खिस्तीयं ते तु पन्थानममत्वाऽपि दुराग्रहात् ।
अथं तदीयशास्त्रोक्तं खण्डितुं नाभवन् क्षमाः ॥ २७८ ॥
भवांस्त्वेतस्य सर्वस्य येन मन्येत निश्चयम् ।
तदर्थं विस्तरं तेषां प्रबन्धानां प्रकाशये ॥ २७९ ॥
खिस्तीयधर्मसम्बन्धिमूलशास्त्रसमुच्चये ।
प्रबन्धाः सन्ति चत्वारो येषूवृत्तान्तवाचकाः ॥ २८० ॥
तत्रादिमस्य मात्थायो मार्कश्चान्यस्य कारकः ।
लूकः कर्त्ता तृतीयस्य योहन्निश्चरमस्य च ॥ २८१ ॥
आयेषूजन्मवृत्तान्तात् तत्स्वर्गारोहणावधि ।
चरित्रं कथ्यते तस्य तत्प्रबन्धचतुष्टये ॥ २८२ ॥
तच्छास्त्रसंहितामध्ये प्रबन्धो यस्तु पञ्चमः ।
तत्रोच्यन्ते चरित्राणि प्रभो र्यैश्वोऽनुयायिनाम् ॥ २८३ ॥
यान् येषूः स्वस्य धर्मस्य प्रचाराय नियुक्तवान् ।
अमी सर्वेऽग्रिमाः शिष्या दूतनाम्ना चचक्षिरे ॥ २८४ ॥
ते लोके येन रूपेण येश्वो धर्मं व्यतस्तरन् ।

इत्यस्य पञ्चमे तस्मिन् प्रबन्धे कथ्यते कथा ॥ २८५ ॥
नुन्नाः स्वशिष्यशिक्षायै खिस्तधर्मोपदेशृभिः ।
काश्चित् पत्र्यश्च तच्छास्त्रसंग्रहे सन्ति सञ्चिताः ॥ २८६ ॥
खिस्तीयशास्त्रसंघस्य ग्रन्थो यश्चरमोऽस्ति तु ।
तत्राग्रतो भविष्यीणां वार्त्तानां कथ्यते कथा ॥ २८७ ॥
अथो प्रसंगयोगेन येषूदृत्तान्तवादिनां ।
प्रबन्धानां समुत्पत्तिः प्रचारश्च वदिष्यते ॥ २८८ ॥
आदौ ग्रन्थान् विना गत्वा मुखमात्रोक्तिभिः समे ।
श्रीयेषूसेवका लोकांस्तस्य धर्ममशिक्षयन् ॥ २८९ ॥
तदानीं भूयसो लोका येषूदृत्तान्तवेदिनः ।
तत्कर्मसाक्षिणश्चापि देशे न्यूषु र्यद्बहूदिनां ॥ २९० ॥
ते धर्मशिक्षकाः किञ्चिदप्यवक्ष्यन् मृषा यदि ।
श्रोतारस्तर्हि दृत्तज्ञा न प्रत्यैष्यंस्तदुक्तिषु ॥ २९१ ॥
अतः स्वनाथमुद्दिश्य ते स्वनीदृति याः कथाः ।
प्राचीचरन् समस्तास्ताः सत्या आसन्नसंशयं ॥ २९२ ॥
तत्रत्या भूयसो लोकास्तेषां वाक्यैः प्रवर्त्तिताः ।
श्रीयेश्च ऐश्वरीं शक्तिं मत्वा तन्मार्गमन्वगुः ॥ २९३ ॥
तच्छिष्यवर्गशिक्षायै येषूधर्मप्रचारकाः ।
धर्मोपदेशृकान् विज्ञान् पुर्य्यां पुर्य्यां न्ययुञ्जत ॥ २९४ ॥
तथाऽल्पकालपर्य्यन्तं मुखमात्रोक्तशिक्षया ।
प्रचारिताऽ भवल्लोके येषूसम्बन्धिनी कथा ॥ २९५ ॥

गतेष्वल्पेषु वर्षेषु नूनाः शिष्यास्तु विस्तरं ।
येष्वो गिरां क्रियाणाञ्च ज्ञातुमैच्छन् सनिश्चयं ॥ २९६ ॥
ततो येषूचरित्रज्ञा बुधा मात्स्यायपूर्वकाः ।
एथक् स्वनाथवृत्तान्तं ग्रन्थबद्धमकुर्वत ॥ २९७ ॥
सर्वं वृत्तं स्वयं दृष्ट्वा श्रुत्वा वा साक्षिणां मुखात् ।
याथातथ्येन निश्चित्य तेऽलिखन् सत्यवादिनः ॥ २९८ ॥
चतुस्त्रिंशत्समाः प्रायो येष्वः स्वर्गमनात् परं ।
यदाऽतीयुस्तदा ग्रन्थं स्वं मात्स्यायः प्रणीतवान् ॥ २९९ ॥
तद्ग्रन्थनिर्मितेः कालो यो मया कथितोऽधुना ।
नानाविचारयोगेन स बुधै रनुमीयते ॥ ३०० ॥
ततोऽप्यूनेऽन्तरे याते येष्वः स्वर्गमनात्परं ।
स ग्रन्थो रचयाञ्चक्रे इत्यन्ये विबुधा विदुः ॥ ३०१ ॥
स यस्मिन्नन्तरे ग्रन्थो मात्स्यायेन व्यरच्यत ।
तदा मार्कोऽपि लूकश्च स्वौ प्रबन्धौ प्रणिन्यतुः ॥ ३०२ ॥
यदाऽब्दाः सप्ततिः प्रायो येष्व स्वर्गमनात् परं ।
व्यत्ययंस्तर्हि योहन्निः स्वं प्रबन्धं प्रणीतवान् ॥ ३०३ ॥
प्रबन्धास्ते तु चत्वारो रचयाञ्चक्रिरे यदा ।
तदा प्रकाशिता भूत्वा ते सर्वत्र वितस्तरुः ॥ ३०४ ॥
ये येषूसेवका ग्रन्थांस्तांस्तदानीमग्राठिषुः ।
सारं येष्वश्चरित्राणाममी प्रागप्यवेदिषुः ॥ ३०५ ॥
अतश्चेत् कोप्यसत्योऽर्थस्तेषु ग्रन्थेष्ववेत्स्यत ।

येषूभक्तौ स्तदा तेषामप्रामाण्यममंस्यत ॥ २०६ ॥
परन्त्वालोक्य तथ्यार्थं तत् प्रबन्धचतुष्टयम् ।
तत् स्वीचकार विश्वासं खिस्तसेवकमण्डली ॥ २०७ ॥
आप्राक्कालाच्च शिक्षार्थं तच्चरित्रचतुष्टयम् ।
सदा खिस्तीयसंसत्सु रविवारेष्वपठ्यत ॥ २०८ ॥
विना तांश्चतुरो ग्रन्थान् खिस्तीयागमसंग्रहे ।
अन्येऽपि भूरयो ग्रन्थाः स्थिताः सन्तीत्यमब्रवम् ॥ २०९ ॥
क्रमेण पञ्चमोयोऽस्ति ग्रन्थस्तच्छास्त्रसंग्रहे ।
स दूतकर्मवृत्तान्तः कथ्यते लूकवर्णितः ॥ २१० ॥
श्रीयेष्वः स्वर्गमात् पश्चाद् यथा दूतास्तदीरिताः ।
आदौ यद्दिनां देशे तस्य धर्मं व्यतस्तरन् ॥ २११ ॥
यथा च तत्परं स्वस्माद् देशाद् निर्गत्य निर्भयाः ।
भूयस्तु त्राणसन्देशं ते विदेशेष्वकीर्त्तयन् ॥ २१२ ॥
यथा चापौरुषेयस्य सामर्थ्यस्य प्रदर्शनात् ।
त आत्मनः परेशेन नुन्नान् दूतानसाधयन् ॥ २१३ ॥
यथा तदुद्यमैः संख्या खिस्तीयानामवर्द्धत ।
इत्यादिविस्तरस्तस्मिन् ग्रन्थे लूकेन कथ्यते ॥ २१४ ॥
स्वयं स ग्रन्थकृल् लूकः पौलनाम्ना सह क्वचित् ।
येषूदूतेन पर्य्याटीदिति ग्रन्थात् प्रतीयते ॥ २१५ ॥
अतः साक्षी स्वयं भूत्वा पौलवक्त्राद् निशम्य वा ।
लूकस्तदीयवृत्तान्तं निश्चेतुं साधु शक्तवान् ॥ २१६ ॥

अतः खिस्तीयधर्मस्य प्रथमानां प्रवादिनाम्।
या तद्ग्रन्थे कथोक्ताऽस्ति सा विश्वास्या न संशयः ॥ ३१७ ॥
चरित्रविस्तरं यस्य लूको ग्रन्थे निजेऽलिखत्।
स पौलोऽत्यन्तमश्राम्यद् येषूधर्मस्य कीर्त्तने ॥ ३१८ ॥
आश्चर्य्यकर्मसंयुक्तै स्तदीयैरुपदेशनैः।
आकृष्टा भूरयो लोका येषुः शिष्यत्वमाश्रयन् ॥ ३१९ ॥
अमीषां खिस्तभक्तानां हितं नित्यं विचिन्तयन्।
स तद्दिदृक्षया भूयस्तत्तत्पत्तनमागमत् ॥ ३२० ॥
तेषां च कर्हिचित् कश्चिद् दोषं श्रुत्वाऽथवा भ्रमम्।
अन्यद् वा कारणं प्राप्य स तान् प्रत्यनुदस्क्षिपीः ॥ ३२१ ॥
आचारो यादृशो यस्य शिष्यवर्गस्य भूतवान्।
पौलस्तादृक्षमादेशं तं वर्गं प्रति नुन्नवान् ॥ ३२२ ॥
खिस्तीयधर्मविद्यायां न्यूनां यां शिष्यमण्डलीम्।
स प्राप तामसौ पत्रे धर्मतत्त्वान्यशिक्षयत् ॥ ३२३ ॥
स यान् मिथो विवादेषु प्रवृत्तान् कलहेषु वा।
ददर्शं तानसौ पत्रे यथायोग्यमतर्जयत् ॥ ३२४ ॥
स यान् शिष्यांस्तु शुश्राव धर्ममार्गे प्रसर्पतः।
स तेषां सान्त्वनं कृत्वा सिद्धिप्राप्त्यर्थमादिशत् ॥ ३२५ ॥
करिन्थवासिनः शिष्यान् प्रति यत्तु लिपिद्वयम्।
पौलोऽलिखत् स तांस्तत्र दोषहेतोरतर्जयत् ॥ ३२६ ॥
तत्रत्यानां हि शिष्याणां मध्ये केचन दर्पिणः।

निरंकुशाश्च पौलोक्तानादेशानवमेनिरे ॥ ३२७ ॥
पौलस्तत्खण्डनं कुर्वन् लिपौ स्वस्येश्वरार्पितम् ।
खिस्तीयधर्मशिक्षार्थमधिकारमबाधयत् ॥ ३२८ ॥
स यान्याश्चर्य्यकर्माणि तस्यां पुर्य्यामदर्शयत् ।
स तेषां स्पष्टमुद्देशमिमं पत्रे निजेऽकरोत् ॥ ३२९ ॥
यथा ॥ करिन्थीयान् प्रति द्वितीयस्य पत्रस्य द्वादशेऽध्याये
पौल उवाच ॥
प्रभोर्दूतस्य लक्ष्माणि शिक्षाचिह्नविभूतयः ।
युष्मत्साक्षादसाध्यन्त मया धैर्य्येण भूरिणा ॥ ३३० ॥
सत्यार्थुवाच ॥
ते द्वे पत्रे करिन्थीयान् प्रति नुन्ने विचारयन् ।
अपौरुषेयसामर्थ्यमूहे पौले समर्पितम् ॥ ३३१ ॥
आश्चर्य्या वस्तुतः पौले चेन्न शक्तिरवेत्स्यत ।
तदा मदुद्भूतं सोऽर्थं नालेखिष्यल् लिपिस्थितम् ॥ ३३२ ॥
चेत् तत्पुरेऽद्भुतं कर्म नाकरिष्यत् किमप्यसौ ।
तदा तामद्भुतां शक्तिं नोददेच्यत् तथा लिपौ ॥ ३३३ ॥
आश्चर्य्यकर्मणां सिद्धिं मृषाऽवक्ष्यदसौ यदि ।
तदा वक्रिश्च हास्यश्च तमज्ञास्यन्नमी समे ॥ ३३४ ॥
अतः पौलेऽद्भुतां शक्तिं परमेशः समार्पयत् ।
खिस्तीयधर्मशिक्षायै तमाचार्य्यं न्ययुङ्क्त च ॥ ३३५ ॥
तथाच तत्कृतां शिक्षां सप्रमाणामसाधयत् ।

इत्येतयोर्द्वयोर्लिप्यो र्विचारादनुमीयते ॥ ३३६ ॥
याः पौलः प्रैरयच्छिष्यान् करिन्थीयादिकान् प्रति ।
ताः पत्र्यः सञ्चिताः सन्ति खिस्तीयागमसंग्रहे ॥ ३३७ ॥
याश्चापरे प्रभो र्दूता लिपीः पेत्रादयोऽलिखन् ।
ता अप्यन्तर्गताः सन्ति तस्मिन् ग्रन्थसमुच्चये ॥ ३३८ ॥
अमी पत्रादयो ग्रन्थाश्चापि प्रामाणिका मताः ।
खिस्तीयलोकसंसत्सु निपत्यन्ते निरन्तरम् ॥ ३३९ ॥
परन्तु विस्तरेणालं भवान् सम्यक् चिरन्तनम् ।
सत्यार्थकञ्च जानातु खिस्तीयागमसंग्रहम् ॥ ३४० ॥
ग्रन्था हि रोमिभिः प्रत्नै र्यवनैश्च बुधैः कृताः ।
नानाप्रस्तावका लोके प्रचलन्त्यधुनावधि ॥ ३४१ ॥
ते ग्रन्थाः प्राक्तनाः प्रत्नैः प्रणीता ग्रन्थकर्त्तृभिः ।
न पश्चात्कल्पिताश्चेति सर्वैः सम्मन्यते बुधैः ॥ ३४२ ॥
यथा तु प्रत्नता प्रायः खिस्तीयागमसञ्चितेः ।
सिद्धाऽस्ति तद्वदन्येषां ग्रन्थानां नास्ति निश्चिता ॥ ३४३ ॥
येषूचरित्रसम्बन्धिग्रन्थप्रामाण्यसाधकम् ।
यं वादं कृतवानस्मि तस्य सारोऽयमुच्यते ॥ ३४४ ॥
श्रीयेष्वः स्वर्गमात् पश्चादचिरे समये गते ।
तत्कर्मविस्तरः कैश्चित् सुज्ञै र्ग्रन्थेष्वलिख्यत ॥ ३४५ ॥
स्वनाथवृत्तवेत्तारः खिस्तीयाश्च तदातनाः ।
अमून् ग्रन्थान् प्रतीत्यर्हान् मत्वा नित्यमपाठिषुः ॥ ३४६ ॥

ये विद्वांसश्च तत्काले येषूधर्मद्विषोऽभवन् ।
तद्ग्रन्थप्रोक्तमाख्यानं खण्डितुं नाशकन्नमी ॥ ३४७ ॥
इत्यादि तत्त्वमालोक्य खिस्तीयागमसञ्चितेः ।
तदन्तर्भूतवृत्तान्तस्तथ्योऽस्तीति विचारये ॥ ३४८ ॥

वेदविद्वानुवाच ॥

यदा खिस्तीयधर्मस्य प्रचारोऽभवदादिमः ।
क्षतिस्तदीयशास्त्राणां तदभ्यर्णेऽन्तरेऽभवत् ॥ ३४९ ॥
तदैव तानि शास्त्राणि प्राकाश्यन्त च भूतले ।
इत्यादि स्वस्य वादस्य साधनायोह्यते भवान् ॥ ३५० ॥
या तत्र जायते शंका चित्ते श्रुतवतो मम ।
इमामेतर्हि वक्ष्यामि भवांस्तावद् निशाम्यतु ॥ ३५१ ॥
आ येषूखिस्तधर्मादेरधुनाऽष्टशताधिकम् ।
सहस्रमेकमब्दानां गतमित्यब्रवीद् भवान् ॥ ३५२ ॥
तदभ्यर्णेऽन्तरे ग्रन्थान् येषूवृत्तान्तवर्णकान् ।
मात्सर्यपूर्वका विज्ञाश्चक्रुरित्यपि चाब्रवीत् ॥ ३५३ ॥
किन्त्वीदृशेऽन्तरे दीर्घे गते तात्कालिकी क्षतिः ।
कथं तेषां प्रबन्धानां निर्णेतुं शक्यतेऽधुना ॥ ३५४ ॥
वीतेऽब्दानां सहस्रे तु येभ्यः स्वर्गमनात् परम् ।
ते ग्रन्था नाक्रियन्तेति केन रूपेण साध्यते ॥ ३५५ ॥

सत्यार्थ्युवाच ॥

खिस्तीये र्लिखिता विज्ञै र्बुधैश्चान्यमतानुगैः ।

प्राचीना भूरयो ग्रन्थाः प्रचलन्त्यधुना भुवि ॥ ३५६ ॥
इदानीं यानहं ग्रन्थानुद्दिशामि विशेषतः ।
प्रणीताः सन्ति ते सर्वे वाण्यो र्यवनरौम्ययोः ॥ ३५७ ॥
तेषां मध्ये तु केषाञ्चिदधिकाऽस्ति चिरन्तना ।
न्यूना केषाञ्चिद् अन्येषां ततोऽप्यूना च विद्यते ॥ ३५८ ॥
को ग्रन्थः केन विज्ञेन कस्मिन् काले व्यरच्यत ।
इत्यस्य विस्तरो रीत्या ज्ञायते वक्ष्यमाणया ॥ ३५९ ॥
आ तत्सर्वादिमग्रन्थरचनातोऽधुनावधि ।
ग्रन्थान्तरान्वयो विद्वन् सन्ततोऽस्ति निरन्तरः ॥ ३६० ॥
तस्यां ग्रन्थावलौ ग्रन्था ये सन्त्युत्तरकालिकाः ।
तेषूत्तरेषु पूर्वेषामुद्देशः कश्चिदुच्यते ॥ ३६१ ॥
मया विवक्षितोऽर्थस्तु येन सम्यक् स्फुटो भवेत् ।
तदर्थमत्र दृष्टान्तमेकं वक्ष्यामि कृत्रिमम् ॥ ३६२ ॥
विद्योद्यानाभिधे देशे विद्वन्नामा नृपोऽवसत् ।
गतं सहस्रमब्दानाम् आ तस्मादधुनावधि ॥ ३६३ ॥
सदा च तेन भूपेन विद्यामित्रेण पूजिताः ।
विद्वांसो भूरयस्तस्य राजसंसदमाश्रयन् ॥ ३६४ ॥
तन्मध्ये मंगलेत्याख्यो विविधैर्भूषितो गुणैः ।
ज्योतिर्विदुत्तमः कश्चिदेको विद्वानविद्यत ॥ ३६५ ॥
स नानायन्त्रयोगेण पर्य्यालोच्य भूमण्डलम् ।
सिद्धान्तार्काभिधं नूतनमेकं ग्रन्थं प्रणीतवान् ॥ ३६६ ॥

स ग्रन्थो विश्रुतिं तूर्णं प्राप्तः सर्वत्र भारते ।
सर्वै स्तदातनैः श्रेष्ठै र्ज्योतिर्विद्भिरपद्यत ॥ ३६७ ॥
त्रिंशत्यब्देषु वीतेषु स्वग्रन्थस्य कृतेः परम् ।
स ख्यातो मंगलो विद्वान् परलोकनिवास्यभूत् ॥ ३६८ ॥
तत्रैव ह्ययनेऽन्यस्य कस्यचिद् विदुषो गृहे ।
शुक्राभिधो महाबुद्धि र्बालः कश्चिदजायत ॥ ३६९ ॥
स शुक्रो यौवनं प्राप्य ज्योतिर्विद्याबुभुत्सया ।
तं मंगलस्य सिद्धान्तं स्वगुरो र्निकटेऽपठीत् ॥ ३७० ॥
विद्याव्युत्पत्तिमाप्त्वा च मध्यमायु र्यदाऽभवत् ।
तदाऽकरोत् स सिद्धान्तं शुक्रसिद्धान्तनामकम् ॥ ३७१ ॥
अमुष्मिन् शुक्रसिद्धान्ते सिद्धान्तार्कः क्वचित् क्वचित् ।
प्रश्नस्यत तदुक्तीनामुद्धृतिः क्रियतेऽपि च ॥ ३७२ ॥
तदाह मंगलः ख्याते सिद्धान्तार्के सुधीवरः ।
इत्यादि शब्दयोगेन शुक्रञ्चामुं प्रशंसति ॥ ३७३ ॥
इत्यर्थदर्शनात् सर्वः शुक्रसिद्धान्तपाठकः ।
शुक्रात् प्राग् भूतमज्ञासीद् मंगलं ग्रन्थकारिणम् ॥ ३७४ ॥
त्रिंशत्समान्तरे वीते पुनः शुक्रादनन्तरम् ।
विज्ञस्य कस्यचित् सूनुश्चन्द्रनामोदपद्यत ॥ ३७५ ॥
साऽधीत्य शुक्रसिद्धान्तं सिद्धान्तार्कञ्च यौवने ।
तत्पश्चाच् चन्द्रसिद्धान्तं नूतं स्वे वार्डकेऽकरोत् ॥ ३७६ ॥
अमुष्मिन् चन्द्रसिद्धान्ते चन्द्राख्योऽसौ सुधीः क्वचित् ।

पूर्वोक्तं शुक्रसिद्धान्तं तत्कर्त्तारञ्च निन्दति ॥ २७७॥
तया तद्भ्रष्टवर्त्तिन्या शुक्रसिद्धान्तनिन्दया ।
सत्त्वं तदातनं शुक्रसिद्धान्तस्यावधार्य्यते ॥ २७८ ॥
तत्रैव चन्द्रसिद्धान्ते सिद्धान्तार्कस्य कानिचित् ।
मतान्युक्तानि दृश्यन्ते मंगलञ्च प्रशस्यते ॥ २७९ ॥
यदुक्तं चन्द्रसिद्धान्ते सिद्धान्तार्कोऽकृतं मतम् ।
तद् अद्य वर्त्तमानेऽपि सिद्धान्तार्के विलोक्यते ॥ २८० ॥
अतोऽसौ यादृशोऽवित्त सिद्धान्तार्कस्तदातनः ।
विकारमन्तरा तादृगद्याप्यस्तीति बुध्यते ॥ २८१ ॥
त्रिंशत्यब्देषु वीतेषु पुनश्चन्द्रादनन्तरम् ।
विज्ञस्य कस्यचिद् गेहे श्रिश्रु र्जज्ञे बुधाभिधः ॥ २८२ ॥
बुधाख्योऽसौ युवा भूत्वा मंगलादिकृतानमून् ।
सिद्धान्तांस्त्रीन् मया प्रोक्तानपठीत् स्वगुरो र्गृहे ॥ २८३ ॥
ज्योतिःशास्त्रे च नैपुण्यं प्राप्तवान् सोऽपि वार्द्धके ।
चकार नूतनं शास्त्रं बुधसिद्धान्तनामकम् ॥ २८४ ॥
तस्मिन् बुधाख्यसिद्धान्ते मंगलादिकृताश्च ते ।
उद्दिश्यन्ते त्रयो ग्रन्थास्तन्मतञ्च विचार्य्यते ॥ २८५ ॥
अतो बुधस्य कालेऽमी मंगलादिकृतास्त्रयः ।
सिद्धान्ताः प्राक्तनत्वेन प्रासिद्ध्यन्निति बुध्यते ॥ २८६ ॥
बुधात् पश्चाद् इनो राज स्तारानाथो बृहस्पतिः ।
शनैश्चरादयोऽनल्पे चान्ये ज्योतिर्विदोऽभवन् ॥ २८७ ॥

ये ये च तैः समै र्ग्रन्था व्यरच्यन्त मनीषिभिः ।
ते पाश्चात्यै र्धृता विज्ञैः प्रचलन्त्यधुनावधि ॥ ३८८ ॥
अमी ज्योतिर्विदः सर्वे यौगपद्येन नासत ।
कालस्य व्यवधानेन विज्ञस्त्वेकोऽन्यमन्वगात् ॥ ३८९ ॥
अनुक्रमेण तन्मध्ये यो यमन्वगमत् सुधीः ।
स तस्माद् व्यवधानेन सुज्ञस्त्वेन व्यभिद्यत ॥ ३९० ॥
ये चाविद्यन्त तन्मध्ये क्रमेणोत्तरकालिकाः ।
ते स्वग्रन्थेषु पूर्वेषां कांश्चिच् चर्चामकुर्वत ॥ ३९१ ॥
तत्सर्वबुद्धिमद्भिर्गंहतग्रन्थेषु कुत्रचित् ।
चतुर्णां मंगलादीनामप्युद्देशश्च दृश्यते ॥ ३९२ ॥
तेषां ज्योतिर्विदां प्राचामुद्देशो यत्र कुत्रचित् ।
कृतोऽस्ति मंगलस्तत्र सर्वाद्यत्वेन कथ्यते ॥ ३९३ ॥
तथा तैः ग्रन्थिभिः शुक्रो द्वितीयत्वेन कथ्यते ।
तृतीयत्वेन चन्द्रश्च तुर्य्यत्वेन तथा बुधः ॥ ३९४ ॥
तथाचा मंगलाद् दीर्घा श्रेणिः सिद्धान्तकारिणाम् ।
भिन्नानामन्तरै र्नृणैः सन्तताऽस्त्यधुनावधि ॥ ३९५ ॥
तया परम्पराप्राप्तमावल्या ग्रन्थकारिणाम् ।
सिद्धान्तार्कस्य चैरत्यमविकारश्च सिद्ध्यति ॥ ३९६ ॥

वेदविद्वानुवाच ॥

भवान् यां कृत्रिमां श्रेणिमाह सिद्धान्तकारिणाम् ।
तस्याः सत्त्वेन चैरत्यं सिद्धान्तार्कस्य सिद्ध्यति ॥ ३९७ ॥

तादृक् खिस्तीयशास्त्राणां चिरन्तनत्वस्य साधिका ।
किं ग्रन्थकारिणां श्रेणि र्वर्त्तमानाऽस्ति वास्तवी ॥ ३९८ ॥

सत्यार्थुवाच ॥

यया खिस्तीयशास्त्राणां निश्चिताऽस्ति चिरन्तना ।
तां ग्रन्थकारिणां श्रेणिं संक्षेपेण प्रकाशये ॥ ३९९ ॥
आदौ तु देशवृत्तान्तं कञ्चित् प्रासङ्गिकं ब्रुवे ।
भवान् येनाखिलां बोधेद् वक्ष्यमाणां कथां मम ॥ ४०० ॥
अस्त्यब्धिः स्थलमध्यस्थनामा कश्चित् सुविस्तृतः ।
स भारताद् विदूरेण प्रतीच्यां दिशि वर्त्तते ॥ ४०१ ॥
तस्याब्धेः पूर्वसीमायामस्ति देशो यहूदिनाम् ।
यं खिस्तीयस्य धर्मस्य जन्मभूमिमवर्णयम् ॥ ४०२ ॥
तस्याब्धे र्दक्षिणे तीरे द्वीपश्चास्त्याफ्रिकाभिधः ।
तत्रैगुप्तादयो देशा वर्त्तन्ते सागराञ्चले ॥ ४०३ ॥
तस्याब्धेरुत्तरे तीरे क्षुद्रास्त्यायवनादयः ।
देशाः क्रमेण वर्त्तन्त एकोऽन्यस्मादनन्तरः ॥ ४०४ ॥
क्षुद्रास्त्यानामको देशो यो मया कथितोऽस्ति तु ।
तत्रेफसादयः ख्याताः पुर्य्यः पूर्वमवित्सत ॥ ४०५ ॥
अमुष्माद् नीवृतोऽल्पेन व्यवधानेन भेदितः ।
सुख्यातो यावनो देशः प्रतीच्यां दिशि वर्त्तते ॥ ४०६ ॥
ये तस्मिन्नीवृति न्यूषुर्यवनास्तु तदातनाः ।
ते दक्षाः साक्षराश्चासन् विद्यया च परिष्कृताः ॥ ४०७ ॥

अमुष्माद् यावनाद् देशात् प्रतीच्यां दिशि निष्ठितः ।
इतल्यानामको नीवृद् राजते लोकविश्रुतः ॥ ४०८ ॥
तत्रेतल्याभिधे देशे रोमानाम्नी पुरी बभौ ।
प्रतीच्यनीवृतां ख्याता राजधानी तदातनी ॥ ४०९ ॥
अमुं पुरीं हि रौम्याणां महाशक्तिरधीश्वरः ।
अधिष्ठितोऽखिलांल्लोकान् परितःस्थांस्तदाऽशिषत् ॥ ४१० ॥
इतल्यासंज्ञकादेशाद् वर्त्तमानो मरुद्दिशि ।
गाल्याख्यो नीवृद् अन्यस्तु तदा रौम्यवशेऽभवत् ॥ ४११ ॥
अमीषां नीवृतां यत्तु कृतवानस्मि वर्णनम् ।
अशेषं विस्तरं तस्य विदुर्भूगोलवेदिनः ॥ ४१२ ॥
क्रुद्धे खिस्तीयधर्मस्य प्रारम्भात् परम् अन्तरे ।
व्यतीते तन्मतं रोमां पुरीं यावद् वितस्तरे ॥ ४१३ ॥
त्रिंशत्यब्देषु वीतेषु येष्वः स्वर्गमनात्परम् ।
यत्नं पौलोऽनुदद् रौम्यां प्रति खिस्तीयमण्डलीम् ॥ ४१४ ॥
शनैः शनैस्ततःपश्चात् कीर्त्यमानं महीतले ।
गाल्यादिवासिभिः कैश्चित् खिस्तस्याग्निश्रिये मतम् ॥ ४१५ ॥
आदौ खिस्तीयमण्डल्यो देशभिन्नाःपरस्परम् ।
मतान्तरानुगै र्लोकैरवेष्यन्त विरोधिभिः ॥ ४१६ ॥
मतैक्यात्तु प्रियाः सन्तस्ते खिस्तीयाः समे मिथः ।
यात्रामितस्ततः कृत्वा भूयोऽन्येऽन्यैः समागमन् ॥ ४१७ ॥
खिस्तीयान् एकदेशीयान् प्रति या जघटे दृशा ।

तद्वार्त्तामन्यदेशीयाः खिस्तीया अप्यवेदिषुः ॥ ४१८ ॥

यान् ग्रन्थकारिणः सर्वानहं वक्ष्यामि सम्प्रति ।

विकीर्णास्ते मदुक्तेषु न्यूषुर्देशेषु कुत्रचित् ॥ ४१९ ॥

अथो खिस्तीयशास्त्राणामाद्यानां रचनामनु ।

या ग्रन्थकारिणां श्रेणि र्विविदे तां निवेदये ॥ ४२० ॥

खिस्तीयधर्मसम्बन्धिसर्वग्रन्थेषु यद्विधः ।

विशेषो वर्त्तते तस्य भवांस्तत्त्वं निशाम्यतु ॥ ४२१ ॥

तद्धर्माद्देशिनो ग्रन्था विभिद्यन्ते द्विधा समे ।

एकश्चापौरुषेयोऽस्ति पौरुषेयोऽपरो गणः ॥ ४२२ ॥

मात्थायपौलयोहन्नियाकोबादिभिरग्रिमैः ।

येष्वः शिष्यैः कृतः शास्त्रसञ्चयोऽस्तीत्यवर्णयम् ॥ ४२३ ॥

येष्वस्तैरग्रिमैः शिष्यै रचितं शास्त्रमण्डलम् ।

अपौरुषेयमस्तीति खिस्तीयैर्मन्यते बुधैः ॥ ४२४ ॥

येष्वस्तेभ्योऽग्र्यशिष्येभ्यः पश्चाद् येष्वोऽनुगा बुधाः ।

युस्तीन क्लेमद् इग्नात्य पलुकार्पादयोऽभवन् ॥ ४२५ ॥

यांस्ते सर्वे तु विद्वांसो नाना ग्रन्थानकुर्वत ।

खिस्तीये र्निखिले स्तेषां मन्यते पौरुषेयता ॥ ४२६ ॥

यावन्त्यपौरुषेयाणि सन्ति शास्त्राणि तावताम् ।

उक्तीः स्तच्छास्त्रमन्तारो विज्ञाः प्रामाणिकी र्विदुः ॥ ४२७ ॥

तदन्यान् यांस्त्वहं ग्रन्थान् पौरुषेयानवर्णयम् ।

तेषां प्रामाण्यमस्माभिस्तादृग् विद्वन्न मन्यते ॥ ४२८ ॥

यतस्तद्ग्रन्थकर्त्तृणां सतां तत्त्वार्थिनामपि ।
कदाचिद् भ्रान्तिरन्येषां मर्त्यानामिव विद्यते ॥ ४२९ ॥
तेषांतु पौरुषेयाणां ग्रन्थानां धारया वयम् ।
खिस्तीयमूलशास्त्राणां निर्णयामश्चिरत्नताम् ॥ ४३० ॥
अमुष्य पौरुषेयस्य ग्रन्थसंघस्य सम्प्रति ।
क्रमेण वर्णनं किञ्चित् करिष्याम्यहमादितः ॥ ४३१ ॥
श्रीयेश्वः स्वर्गतेः पश्चात् तस्य पौलादयोऽनुगाः ।
तद्धर्मकीर्त्तने सद्यः प्रावर्त्तन्तेत्यवादिषम् ॥ ४३२ ॥
केचिज्जनाश्च तन्मध्ये स्वप्रभोः स्वर्गमात्मरम् ।
अनेकवर्षपर्य्यन्तमासन् जीवद्ग्रहान्तरे ॥ ४३३ ॥
त्रिंशद्वर्षात्मकं प्रायो यावदन्तरमुद्यमी ।
येश्वो दूतः सुसंवादं पौलोऽतिष्ठत् प्रचारयन् ॥ ४३४ ॥
योऽहन्निश्चापरो दूतो येश्वः स्वर्गमनात्परम् ।
जिजीव सप्ततिं वर्षानिति प्रत्नै र्बुधैः स्मृतम् ॥ ४३५ ॥
येश्वो दूतास्त्वमी यावदवर्त्तन्त महीतले ।
तावद् यथातथं येश्वस्ते चरित्रमवर्णयन् ॥ ४३६ ॥
किं किं प्रामाणिकं ग्रन्थं किञ्च प्रामाण्यवर्जितम् ।
इत्यत्र तेषु जीवत्सु कोपि नावित्त संशयः ॥ ४३७ ॥
यतः परेश्वरीयेण निःश्वासेन प्रबोधिताः ।
ते सत्यासत्ययोः कर्त्तुमकल्पन्त विवेचनम् ॥ ४३८ ॥
तथा ते भूरिभिर्लोकै र्नानादेशोद्भवैः सह ।

नित्यं समागमं ज्ञात्वा धर्मतत्त्वान्यशिक्षयन् ॥ ४३९ ॥
तत्संगमाच्च ये लोकास्तेषां शिष्यत्वमाश्रयन् ।
खिस्तीयधर्मतत्त्वानि तेऽपि सम्यगवेदिषुः ॥ ४४० ॥
श्रीयेषूदूतशिष्याणां मध्ये लोकाश्च भूरयः ।
चिरं जिजीविरत्रोर्व्यां स्वगुरूणां मृतेः परम् ॥ ४४१ ॥
तेषां चिरायुषां मध्ये केचिच्छिष्यास्तु पण्डिताः ।
सन्तः स्वधर्मतत्त्वानि परांल्लोकानशिक्षयन् ॥ ४४२ ॥
एवं श्रीखिस्तदूतानां मुखात् तच्छ्रोतृभिर्मतम् ।
यथार्थं प्राप्यतान्येभ्यः पारम्पर्य्येण चार्प्यत ॥ ४४३ ॥
श्रीयेषूखिस्तदूतानां स्वयं ये संगमाप्नुवन् ।
तन्मध्ये केचन ग्रन्थान् स्वमतोद्देशिनोऽलिखन् ॥ ४४४ ॥
तन्मध्ये विश्रुतः कश्चित् क्लेमन्नामाऽभवद् बुधः ।
स येषूखिस्तदूतानां बभूव समकालिकः ॥ ४४५ ॥
श्रीयेष्वः कीर्त्तिमान् दूतः पौलः प्रामाणिकीर्लिपीः ।
कांश्चित् स्वशिष्यशिक्षायै नुनोदेति पुराऽब्रवम् ॥ ४४६ ॥
प्रामाणिक्यश्च ताः पञ्च खिस्तीयागमसंग्रहे ।
अद्याप्यन्तर्भवन्तीति चाहं पूर्वमवर्णयम् ॥ ४४७ ॥
तन्मध्ये या लिपि र्लोकान् फिलिप्पीवासिनः प्रति ।
अनोदि तत्र सल्लोकः क्लेमन्नामा प्रशस्यते ॥ ४४८ ॥
अतः पौलीयलिप्युक्तः क्लेमन्नामा पुमानसौ ।
स्वयं पौलस्य वेलायां बभूवात्र न संशयः ॥ ४४९ ॥

स एव क्लेमद् अन्यो वा क्लेमन्नामा तदातनः ।
खिस्तीयसंसदोऽध्यक्षो रोमास्थायास्ततोऽभवत् ॥ ४५० ॥
अमुष्य क्लेमदाख्यस्य वृत्तान्तोऽन्येन केनचित् ।
ऐरेणायेन विज्ञेन पश्चाद्भूतेन कथ्यते ॥ ४५१ ॥

यथा ॥ ऐरेणाय उवाच ॥

स्वयं धन्यान् प्रभोर्दूतान् स क्लेमद् दृष्टवानभूत् ।
समागमच्च तैः साकं कृतवानपि सम्मुखम् ॥ ४५२ ॥
तदाऽपि खिस्तदूतोक्ता शिक्षणा तस्य कर्णयोः ।
ध्वनन्त्यासीत् तदादिष्टः पन्थाः साक्षादविक्ष च ॥ ४५३ ॥
ये येषूखिस्तदूतानां मुखाच्छिक्षामवाप्नुवन् ।
तादृक्षा भूरयोऽन्येऽपि चावर्शिष्टास्तदाऽऽसत ॥ ४५४ ॥
अमुष्य क्लेमदाख्यस्य समये कलहो महान् ।
करिन्थवासिनां मध्ये भ्रातृणां समजायत ॥ ४५५ ॥
अमूञ्जनान् करिन्थीयान् प्रति रोमानिवासिनी ।
खिस्तीयमण्डली तर्हि प्रशस्तां प्रैरयल्लिपिम् ॥ ४५६ ॥
तस्यां सा सन्धये लोकान् करिन्थीयानचोदयत् ।
तान् पूर्ववद् नवीनायै श्रद्धायै चोदतेजयत् ॥ ४५७ ॥

सत्यार्थुवाच ॥

खिस्तीयानान्तु रौम्याणामध्यक्षः संस्तदा स्वयम् ।
क्लेमत् तां प्राणयत् पत्रीमिति सम्भावि विद्यते ॥ ४५८ ॥
प्राक्तन्यां सा च यावन्यां भाषायां रचिता लिपिः ।

अद्यापि वर्त्तमानाऽस्ति विपश्चिद्भिश्च पठ्यते ॥ ४५९ ॥
क्वचित् पश्चाद्भवै र्विज्ञैः सा पत्री क्षेमतः क्षतिः ।
क्वचित् खिस्तीयमण्डल्या रौम्याया लिपिरुच्यते ॥ ४६० ॥
तया खिस्तीयधर्मस्य तच्छास्त्राणाञ्च सत्यता ।
कीदृक्षां सिद्धिमाप्नोति तदेतर्हि प्रपञ्चये ॥ ४६१ ॥
मात्यायपूर्वंका यानि सच्चरित्राणि चक्रिरे ।
तदुद्देशाय तत्पत्रे प्रसंगः कोपि नाभवत् ॥ ४६२ ॥
अतस्तैरमुका ग्रन्था मात्यायाद्यैः प्रणिन्यिरे ।
इत्यादिविस्तरस्तस्मिन् क्षेमत्पत्रे न दृश्यते ॥ ४६३ ॥
मात्यायाद्यैस्तु या येष्वः समास्यन्त सदुक्तयः ।
तन्मध्ये काश्चिदाप्यन्ते क्षेमत्पत्रेऽपि कीर्त्तिताः ॥ ४६४ ॥
अतः क्षेमत् प्रबन्धेषु मात्यायादिकृतेष्वमूः ।
येषूक्तीः प्राप वाऽन्यत्र शुश्रावेत्यनुमीयते ॥ ४६५ ॥
ताश्चेत् प्राप्नोत् प्रबन्धेषु मात्यायादिकृतेष्वसौ ।
तेषां तर्ह्यूह्यते सत्त्वं प्रबन्धानां तदातनम् ॥ ४६६ ॥
चेद्दा स क्षेमद् अन्यत्र ता येषूक्ती र्न्यधानमयत् ।
तदाऽपि साध्यते तासां सुप्रसिद्धि स्तदातनी ॥ ४६७ ॥
पौलश्च ये करिन्थीयान् शिष्यान् प्रत्यलिखल्लिपी ।
तदेका क्षेमतः पत्रे पत्रिका स्पष्टमुच्यते ॥ ४६८ ॥

यथा ॥ रौम्यः क्षेमदुवाच ॥

पत्नीं धन्यस्य पौलस्य येषूदूतस्य पश्यत ।

किं तत्रासौ लिलेखादौ सुसंवादस्य वः प्रति ॥ ४६९ ॥

सत्यार्थुवाच ॥

तत्क्षेमदीयपत्रस्य कृत्स्नमर्थं विचारयन् ।

दृढं खिस्तीयधर्मस्य तत्र विन्दामि साधनम् ॥ ४७० ॥

असौ प्रसंगमप्राप्य स्वलिपौ लिपिकारकः ।

श्रीयेषूखिस्तवृत्तानां विस्तरं नह्यवर्णयत् ॥ ४७१ ॥

यतः स यान् करिष्यीयान् लोकान् प्रत्यलिखल्लिपिम् ।

ते खिस्तीयस्य धर्मस्य सर्वं आसन् सुवेदिनः ॥ ४७२ ॥

तस्माच्च तांस्तया लिप्या सदाचाराय चोदयन् ।

तै र्ज्ञातानां स सारांशं विषयाणामसस्मरत् ॥ ४७३ ॥

अतो नानेङ्गिताख्याभिः संचिन्नार्थाभिरुक्तिभिः ।

स येषूखिस्तसम्बन्धे मततत्त्वान्यबोधयत् ॥ ४७४ ॥

लिपेस्तु तादृशादर्थाद् येषूः सत्त्वं ततः पुरा ।

संसारे तस्य धर्मस्य प्रचारस्यानुमीयते ॥ ४७५ ॥

पुरा लोके महात्मा हि चेन्न येषूरवेत्स्यत ।

तर्ह्यस्य तादृगुद्देश्यस्तल्लिपौ नाकरिष्यत ॥ ४७६ ॥

वेदविद्वानुवाच ॥

मात्थ्यायाद्यैः प्रणीतानां येषूवृत्तान्तवर्णिनाम् ।

ग्रन्थानां नोच्यते सत्त्वं क्षेमत्यत्रे तदातनम् ॥ ४७७ ॥

स्वयञ्च तल्लिपौ येष्वश्चरित्राणां स विस्तरम् ।

समस्तं नालिखत् क्षेमदिति स्वीकुरुते भवान् ॥ ४७८ ॥

तथा सत्येतया लिप्या किञ्चिदिङ्गितयुक्तया ।
कथं येष्वश्चरित्रस्य सिद्धेत् कृत्स्नस्य सत्यता ॥ ४७९ ॥

सत्यार्थुवाच ॥

एतर्हि संशयं यस्मिन् विषये कुरुते भवान् ।
तद्याकाराय दृष्टान्तः कृत्रिमः श्रूयतामयम् ॥ ४८० ॥
कल्याणाख्यस्य देशस्य धर्मसिंहाभिधो नृपः ।
आसीत् पुरा सुधीः शूरो धार्मिकश्चेति कल्प्यताम् ॥ ४८१ ॥
दुष्टानां दण्डनं कुर्वन् सज्जनानाञ्च पालनम् ।
स्वीयाः सर्वाः प्रजाः सम्यग् यथान्यायञ्च सोऽशिषत् ॥ ४८२ ॥
तदीयशर्मणो वृद्धिमभीच्छंश्च समन्ततः ।
स नानोपाययोगेन तत्सिद्ध्यर्थमचेष्टत ॥ ४८३ ॥
यात्रास्वकिञ्चनाः पान्थ्या येन विश्राममाप्नुयुः ।
तदर्थमध्वनां प्रान्ते स शालां निरमीमपत् ॥ ४८४ ॥
देशे गमागमो येन लोकानां सुकरो भवेत् ।
तदर्थं सेतुभिः सर्वा नदीः सोऽबन्धयद् दृढैः ॥ ४८५ ॥
विद्याभ्यासश्च सर्वस्मिन् येन वर्द्धत नीवृति ।
तदर्थं सोऽपि भूरीणि विद्यासद्मान्यतिष्ठिपत् ॥ ४८६ ॥
तं देशमात्मसात्कर्त्तुं शत्रु र्येन न शक्नुयात् ।
तदर्थं स्वाः पुरीर्दुर्गैः स प्राचीरैरवेष्टयत् ॥ ४८७ ॥
तद्राज्ये मन्त्रिणो दक्षाः सेनान्यश्च महौजसः ।
यशस्विनश्च विद्वांसो भूरयस्तर्ह्यवित्सत ॥ ४८८ ॥

तत्काले भीष्मसिंहाख्यो वनदेशस्य भूपतिः ।
चम्वा तं देशमाक्रम्य स्वे वशे कर्त्तुमैहत ॥ ४८९ ॥
स्वनीवृतस्तु रक्षायै धर्मसिंहोऽभिषेणनम् ।
कृत्वा तेनारिणा साकं दारुणे प्रावृतऋणे ॥ ४९० ॥
प्रातःकाले समारब्धः स संग्रामो भयंकरः ।
सन्ध्यांशुकालपर्य्यन्तं प्रावर्त्तिष्ट निरन्तरम् ॥ ४९१ ॥
तयोः संघट्टनाच्चक्रोः सुमहांस्तुमुलोऽजनि ।
घोरो नादश्च शस्त्राणामग्न्यस्त्राणाञ्च गर्ज्जनम् ॥ ४९२ ॥
अनेके तत्यजुः प्राणानुभयोः पक्षयोर्जनाः ।
खड्गादिच्छिन्नभिन्नांगा क्षुण्णा वा हस्तिनां पदैः ॥ ४९३ ॥
श्येने तु धर्मसिंहस्य योद्धृभिः सिंहसन्निभैः ।
पराक्ता वैरिणां सेना समराङ्गनमत्यजत् ॥ ४९४ ॥
स्वयं पलायमानश्च भीष्मसिंहो महीपतिः ।
वन्दीकृतः समानिन्ये धर्मसिंहस्य सन्निधिम् ॥ ४९५ ॥
कञ्चित् कालञ्च कारायां बद्धः स्थित्वा तदाज्ञया ।
तेनोदारात्मना पश्चाद् मुक्तः सन् स गृहं ययौ ॥ ४९६ ॥
सदा कल्याणदेशस्तु येन निष्कण्टको भवेत् ।
तदर्थं धर्मसिंहोऽदं तस्य राज्यमपाहरत् ॥ ४९७ ॥
तथा स स्वस्य राज्यस्य वर्द्धयित्वा पराक्रमम् ।
श्रेयश्च सर्वथा साधुर्धर्मसिंहस्तनुं जहौ ॥ ४९८ ॥
स राजा तादृशो भूत्वा स्वदेशे कीर्त्तिमानभूत् ।

लोकाश्च तस्य वृत्तानां नित्यं चर्चामकुर्वत ॥ ४९९ ॥
यादृक्षं धर्मसंहिस्य समये विविदे सुखम् ।
हाहा तादृक्षमस्माभिरधुना नोपभुज्यते ॥ ५०० ॥
नश्यन्ति साम्प्रतं सर्वे सेतवस्तेन निर्मिताः ।
ध्वंसन्ते साम्प्रतं सर्वा धर्मशालाश्च तत्कृताः ॥ ५०१ ॥
दुष्टानां दण्डनं यद्वत् सतां पुष्टिञ्च सोऽकरोत् ।
हाहा न दृश्यते तादृगत्र नीवृति सम्प्रति ॥ ५०२ ॥
स सेनां भीष्मसिंहस्य यथाऽखण्डत् स्वतेजसा ।
तथेदानीन्तनः कोपि योद्धा कर्त्तुं न शक्नुयात् ॥ ५०३ ॥
ते धर्मसिंहवृत्तज्ञास्तथा तद्विषये मिथः ।
नानाविधेङ्गिताद्याभिः संक्षेपोक्तिभिरालपन् ॥ ५०४ ॥
ततः प्राग् धर्मसिंहाख्यश्चन्न भूद्दवेत्स्यत ।
तदा तैस्तादृशी चर्चा नहि कर्त्तुमशक्ष्यत ॥ ५०५ ॥
चेद्दा ते केवलं नाम तस्याश्रोष्यन् महीपतेः ।
सुज्ञातस्येव तां चर्चां नाकरिष्यंस्तदाऽस्य ते ॥ ५०६ ॥
तथा येष्वः कथा ख्यातिं यदि नाप्स्यत् ततः पुरा ।
तदा ज्ञातेव सा पत्रे क्षेमतो नोददेष्यत ॥ ५०७ ॥
येष्वस्तु कीदृशी चर्चा क्रियते क्षेमतो लिपौ ।
इत्यस्य साम्प्रतं कश्चित् संक्षेपः कथयिष्यते ॥ ५०८ ॥
तेजीयानीश्वरीयस्य माहात्म्यस्य प्रकाशकः ।
श्रीखिस्तो मानुषं देहं धृतवानीश्वरेरितः ॥ ५०९ ॥

नम्रात्मा दर्पहीनश्च प्रादुर्भूय स भूतले ।
दयां विधाय मर्त्येषु स्वप्राणांस्तत्कृते ददौ ॥ ५१० ॥
तदीयरक्तपातेन त्राणं विन्दन्ति मानवाः ।
असौ तेषां महायज्वा सहायो रक्षकोऽस्ति च ॥ ५११ ॥
इत्यादिखिस्तसम्बन्धिमततत्त्वानि कुत्रचित् ।
यथाप्रसंगमुच्यन्ते तल्लिपौ लिपिकारिणा ॥ ५१२ ॥
यां पौलपेत्रयोश्चर्चां सोऽकरोत् प्रभुदूतयोः ।
तस्याः सारांशमत्राहं व्याकरोमि यथामति ॥ ५१३ ॥

रौम्यः क्षेमदुवाच ॥

ईर्ष्याहेतो र्महात्मानो धार्मिकाश्च नरर्षभाः ।
उपद्रवार्हिता भूत्वा मृत्युभाजोऽभवन्नपि ॥ ५१४ ॥
लोकानामीर्ष्यया पेत्रः क्लेशं भुक्त्वा मुहुर्मुहुः ।
तत्पश्चात् तेजसो धाम स्वयोग्यं प्रस्थितोऽभवत् ॥ ५१५ ॥
ईर्ष्याहेतोस्तथा पौलः सम्प्राप्तत्वः सम्भ्रंखलः ।
प्रवासितोऽध्वभिः क्षुब्धः फलं धैर्य्यस्य लब्धवान् ॥ ५१६ ॥
असौ प्राच्यां प्रतीच्याञ्च भूत्वा धर्मप्रचारकः ।
कृत्स्नं संसारमादिश्य श्रद्धायाः प्राप्तवान् यशः ॥ ५१७ ॥
प्रतीच्याः प्रान्तमागत्य शासितृणाञ्च सम्मुखम् ।
साक्षी भूत्वा स्वधर्मस्य स लोकान्तरवास्यभूत् ॥ ५१८ ॥

सत्यार्थ्युवाच ॥

तथाच धर्मतत्त्वानां खिस्तीयानां चिरन्तना ।

तदातनः प्रचारश्च क्षेमत्यत्रात् प्रतीयते ॥ ५१९ ॥

तत्सन्निकृष्टवेलायां कश्चिद् इम्नात्यनामकः ।

अन्यः खिस्तीयधर्मस्य मन्ता साधुरविद्यत ॥ ५२० ॥

गुणै र्ज्ञानेन चोत्कृष्टः सोऽन्त्यखैयानिवासिनः ।

खिस्तीयलोकसंघस्य मुख्याध्यक्षो न्ययुज्यत ॥ ५२१ ॥

श्रीयेष्वः स्वर्गमात्यश्चाद् नवत्यब्दात्मकेऽन्तरे ।

तन्न्यूने वा गते वृद्धः सन् स धर्मक्षतेऽबधि ॥ ५२२ ॥

अतः स साधुरिम्नात्यो यौवनानेहसोऽन्तरे ।

अन्याणां खिस्तदूतानां विविदे समकालिकः ॥ ५२३ ॥

तेषाञ्च खिस्तदूतानामेकं कञ्चन वाऽपरम् ।

स दृष्टवान् भवेत् साक्षादिति सम्भावि विद्यते ॥ ५२४ ॥

तत्काले खिस्तदूतानां द्रष्टारो भूरयो जनाः ।

श्रोतारश्चापि तद्वाचाम् आसन् जीवद्प्रमान्तरे ॥ ५२५ ॥

अतः स साधुरिम्नात्यः खिस्तदूतैः सह स्वयम् ।

किम्वा तच्छ्रोतृभिः सार्द्धं समागच्छद् न संशयः ॥ ५२६ ॥

दृणाञ्च तादृशां संगादसौ येषूचरित्रवित् ।

खिस्तीयधर्मतत्त्वज्ञश्चाभूदित्यनुमीयते ॥ ५२७ ॥

तादृक्षः सन् स इम्नात्यः खिस्तभक्तः स्ववार्द्धके ।

तद्धर्मद्वेषिभी रोमां दण्डनार्थमनीयत ॥ ५२८ ॥

यात्रान्तरे लिपीः काश्चित् पलुकार्पाभिधं बुधम् ।

रोमास्थान् एफिसस्थांश्च खिस्तीयान् प्रति सोऽलिखत् ॥ ५२९ ॥

प्राक्तन्यां गिरि यावन्यां रचितं तल्लिपित्रयम् ।
विद्वैः परम्पराप्राप्तं प्रचलत्यधुनावधि ॥ ५३० ॥
अमीष्विम्नाय्यपत्रेषु प्रसङ्गाभावहेतुना ।
श्रीयेषूखिस्तवृत्तान्तो विस्तरेण न कथ्यते ॥ ५३१ ॥
तथा प्रसङ्गमप्राप्य क्वापि तल्लिपिकारकः ।
खिस्तीयमूलशास्त्राणि नोददिक्षद् विशेषतः ॥ ५३२ ॥
योऽयंस्तु तल्लिपिव्यक्ति सेवां नानेङ्गितान्वितः ।
तस्मात् तत्कारिणः पन्था मतसारश्च बुध्यते ॥ ५३३ ॥
या येषूद्देशिनी शास्त्रे खिस्तीय कथ्यते कथा ।
तामिम्नाय्योऽपि सम्मेने इति पत्रत्रयात् स्फुटम् ॥ ५३४ ॥
खिस्तीयधर्मतत्त्वानां येषां तस्मिन् लिपित्रये ।
क्वतोऽस्ति कश्चिदुद्देशस्तेषां सारोऽयमुच्यते ॥ ५३५ ॥
येषूखिस्तः परेशस्य सूनुर्भूत्वा स्वयं गुणैः ।
हृषीकागोचरत्वाद्यैरीश्वरीयै र्व्यशिष्यत ॥ ५३६ ॥
तादृक्षः सन् स कन्याया गर्भाज्जातो बभौ भुवि ।
नानारूपाणि दुःखानि बुभुजे च नृणां कृते ॥ ५३७ ॥
अन्यच्च दण्डयद्वेण हतोऽसौ खेन मृत्युना ।
नृणां विश्वासिनां त्राता नित्यजीवनदोऽभवत् । ५३८ ॥
मनुष्यास्तेश्वरीयेण प्रसादेन प्रवर्त्तिताः ।
तं येषूखिस्तमाश्रित्य समारोहन्ति सद्गतिम् ॥ ५३९ ॥
इत्यादि धर्मतत्त्वानि खिस्तीयानि लिपित्रये ।

इमात्यप्रेरिते स्पष्टमुद्दिश्यन्ते समासतः ॥ ५४० ॥
पुनः पेत्रश्च पौलश्च खिस्तदूतौ समुद्दिशन् ।
इमात्य एवमेकस्यां लिपौ प्रोवाच सादरम् ॥ ५४१ ॥

इमात्य उवाच ॥

यथा पेत्रश्च पौलश्च तथा वो नादिशाम्यहम् ।
दूतौ खिस्तस्य तावास्ताम् अहं दण्डाय निश्चितः ॥ ५४२ ॥

सत्यार्थ्युवाच ॥

इत्याद्यर्थेन सर्वेण तत्पत्रत्रयवर्त्तिना ।
खिस्तीयमूलशास्त्राणां दृढा पुष्टिः प्रजायते ॥ ५४३ ॥
यतः खिस्तीयशास्त्रेषु यन्मतं प्रतिपाद्यते ।
तदेवेमात्यपत्रेषु मतं संक्षिप्तमुच्यते ॥ ५४४ ॥
अतो यत् तेषु शास्त्रेषु मतमद्यापि दृश्यते ।
खिस्तीयानां तदेवाद्यं मतमस्तीति बुध्यते ॥ ५४५ ॥
तत्कालादेव चामूनि मूलशास्त्राणि पूर्ववत् ।
विकारमन्तराऽद्यापि प्रचलन्तीति चोच्यते ॥ ५४६ ॥
तत्सन्निकृष्टवेलायां खिस्तीयो ग्रन्थकारकः ।
क्षाद्रतनामको विद्वानन्यः कश्चिदविद्यत ॥ ५४७ ॥
श्रीयेषूखिस्तभक्तेन तेन विज्ञेन साधुना ।
खिस्तीयधर्मपुष्ट्यर्थं ग्रन्थः कश्चिदरच्यत ॥ ५४८ ॥
स ग्रन्थः साम्प्रतं लोके वर्त्तमानो न विद्यते ।
कालात्ययेन लोपाब्धौ प्रायः क्षत्वा ममज्ज तु ॥ ५४९ ॥

क्रस्वः खण्डस्तु तन्मध्ये पश्चाद्भूतेन केनचित् ।
यूसेब्याख्येन विज्ञेन स्वस्मिन् ग्रन्थेऽवतार्य्यते ॥ ५५० ॥
क्काद्रातात् समतीते हि प्रायो वर्षशतद्वये ।
स यूसेब्यश्चरित्राणि खिस्तीयानां प्रणीतवान् ॥ ५५१ ॥
तदीये समये क्रस्तो ग्रन्थः क्काद्रातनिर्मितः ।
क्रमैः परम्पराप्राप्तो वर्त्तमानोऽभवद् भुवि ॥ ५५२ ॥
यूसेब्यग्रन्थनिष्कस्य तस्य वाक्यस्य सम्प्रति ॥
क्काद्रातोक्तस्य सारांशं व्याकरोमि यथामति ॥ ५५३ ॥

क्काद्रात उवाच ॥

अस्माकीनस्य कर्माणि परित्रातुर्निरन्तरम् ।
साक्षाद्वर्त्तीन्यविद्यन्त यतः सत्यान्यवित्सत ॥ ५५४ ॥
निरामयीकृतास्तेन मृत्योरुत्थापिताश्च ये ।
ते पश्चादप्यदृश्यन्त साक्षात् सन्तो जनाः सदा ॥ ५५५ ॥
ते लोका भूतलस्थस्य परित्रातुरनेहसि ॥
चिरं तत्स्वर्गमात् पश्चादपि चोर्व्यामजीविषुः ॥ ५५६ ॥
अन्यच्च तत्समूहस्य मध्ये केचन मानुषाः ।
अस्मत्समन्तपर्य्यन्तमप्यतिष्ठन्नुपस्थिताः ॥ ५५७ ॥

सत्यार्थुवाच ॥

प्राचीनस्यास्य वाक्येन ग्रन्थकारस्य तादृशा ॥
श्रीयेश्वः भक्तिराश्चर्य्या प्रमाणीक्रियते दृढम् ॥ ५५८ ॥
तत्सन्निकृष्टकालेऽन्यः पत्रुकार्पः सुधीरभूत् ।

स येषूखिस्तदूतस्य योऽहन्नेरनुगोऽभवत् ॥ ५५९ ॥
गुणै र्धर्मेण चोत्कृष्टः स्मुर्णापत्तनवासिनः ॥
खिस्तीयलोकसङ्घस्य सोऽध्यक्षत्वे न्ययुज्यत ॥ ५६० ॥
यत्काले वार्द्धकं प्राप येषूभक्तः पुमानसौ ।
तदानीं कर्त्तुमारेभे खिस्तीयानामुपद्रवः ॥ ५६१ ॥
तन्मध्ये पलुकार्पोऽपि धृतो राजपदातिभिः ।
रौम्यस्य शासितुः पार्श्वं विचारार्थमनीयत ॥ ५६२ ॥
तं दृष्ट्वा शासिता तर्हि प्रोचे खिस्तं तिरस्कुरु ।
तथा कृते विमोक्ष्यामि त्वामहं बन्धनादिति ॥ ५६३ ॥
तच्छ्रुत्वा शासितु र्वाक्यं येषूभक्तः स सज्जनः ।
वृद्धोऽप्यक्षुब्धचेतस्को निर्भयः प्रत्यभाषत ॥ ५६४ ॥

पलुकार्प उवाच ॥

षडशीति यावत् समा खिस्तं सेवितवानहम् ।
कदापि मामिकां हानिं न चकार स कामपि ॥ ५६५ ॥
योऽसौ स्वयं परित्राणं कृतवानस्ति मामकम् ।
कथं तमीश्वरं स्वीयं निन्दितुं शक्नुयामहम् ॥ ५६६ ॥

सत्यार्थ्युवाच ॥

पुनस्तं स्वस्य धर्मस्य निश्चयाय प्रचोदयन् ।
स रौम्यः शासिता वृद्धं भीषयन्नेवमब्रवीत ॥ ५६७ ॥

शासितोवाच ॥

मत्पार्श्वे पशवो वन्याः सन्ति चेन्न त्वया मनः ।

परावर्त्यैत तर्हि त्वां निक्षेष्यामि तदन्तिकम् ॥ ५६८ ॥

सत्यार्थुवाच ॥

तच्छ्रुत्वा शासितु र्वाक्यं पलुकार्पो भयङ्करम् ।
अत्रस्यन् दारुणेभ्योऽपि सिंहेभ्यः प्रत्यभाषत ॥ ५६९ ॥

पलुकार्प उवाच ॥

पञ्चूनानाययत्वेव, वयं कर्ह्यपि सत्तरात् ।
मताद् मनः परावर्त्यं न स्वीकुर्मो ह्यसत्तरम् ॥ ५७० ॥
परन्त्वसाधुनस्त्यागः साधुनश्च समाश्रयः ।
ईदृग् मनःपरावर्त्तः प्रशस्योऽस्ति न संशयः ॥ ५७१ ॥

सत्यार्थुवाच ॥

तादृक्षमुत्तरं श्रुत्वा पलुकार्पस्य शासिता ॥
दण्डस्यान्येन रूपेण भीषयन्निदमुक्तवान् ॥ ५७२ ॥

शासितोवाच ॥

पञ्चूंश्चेदवमन्येथा मनसश्च निजस्य चेत् ।
परावर्त्तं न कुर्वीथा दमिष्यामि तदाऽग्निना ॥ ५७३ ॥

सत्यार्थुवाच ॥

किन्त्वैहिकस्य दुःखस्य क्षणिकत्वं स्मरन्नसौ ।
महात्मा पुनरक्षुब्धः शासितारमभाषत । ५७४ ॥

पलुकार्प उवाच ॥

क्षणं यः पावनो दग्ध्वा शीघ्रं निर्वाणमृच्छति ।
तमेव वह्निमद्दिश्य भर्त्सयत्यधुना भवान् ॥ ५७५ ॥

अमुत्र यो भविष्यंस्तु शाश्वताय दुरात्मनाम् ।
दण्डाय रक्ष्यते वह्निस्तस्य तत्त्वं न बोधसि ॥ ५७६ ॥
परन्तु साम्प्रतं केन कारणेन विलम्बसे ।
आनीयतां त्वया तावत् सर्वं यद्यदभीष्यते ॥ ५७७ ॥

सत्यार्थुवाच ॥

इत्याद्युक्त्वा प्रगल्भात्मा हृष्टचित्तश्च सोऽभवत् ।
तदाननं प्रसादेन परिपूर्णं बभूव च ॥ ५७८ ॥
तथा तु तं महात्मानं स्थितमक्षुब्धमानसम् ।
विलोक्य शासिता रौम्यः परमं विस्मयं ययौ ॥ ५७९ ॥
प्रोच्चैस्तु लोकसङ्घस्य सम्मुखे घोषकोऽनदत् ।
अहो खिस्तीयमात्मानं पलुकार्पोऽब्रवीदिति ॥ ५८० ॥
तच्छ्रुत्वा घोषकेणोक्तं लोकास्तत्र चिताः समे ।
अनिर्वार्य्येण रोषेण प्रोच्चैरेवमनादिषुः ॥ ५८१ ॥

लोका ऊचुः ॥

आस्याया* गुरुरस्त्येष खिस्तीयानामयं पिता ।
एषोऽस्मदीयदेवारिरेष यज्ञं निषेधति ॥ ५८२ ॥

सत्यार्थुवाच ॥

इत्युक्त्वा ते दुरात्मानः पलुकार्पजिघांसवः ।
प्रणेदुस्तस्य घाताय केशरी मुच्यतामिति ॥ ५८३ ॥

---

* आस्या इति तस्य देशस्य नाम ॥

किन्त्वतदिष्टमप्राप्य ते प्रोच्चैरनदन् पुनः ।
सजीवः पलुकापोऽयमग्निना दह्यतामिति ॥ ५८४ ॥
इत्युक्ता ते समे लोकाश्चितां निर्मातुमिच्छवः ।
वेगेन सर्वतो नीत्वा चक्रुरिन्धनसंग्रहम् ॥ ५८५ ॥
बद्धस्तु सन्नसौ स्तम्भे पलुकार्पश्चितान्तिके ।
इत्थं हृष्टेन चित्तेन परमेश्वरमस्तुत ॥ ५८६ ॥

पलुकार्प उवाच ॥

यस्य द्वारा त्वदुद्देशि तत्त्वज्ञानमवाप्नुम ।
धन्यस्य तस्य पुत्रस्य येषूखिस्तस्य हे पितः ॥ ५८७ ॥
हे खर्दूतादिवर्गाणां प्रजौघस्य समस्य च ।
त्वदग्रे जीवतः साधुलोकवृन्दस्य चेश्वर ॥ ५८८ ॥
यस्माद् मामेतदाहार्हं साक्षिणाञ्च गणे पदम् । [कुलकं ॥
लब्धुं मा मन्यसे योग्यं तस्मात् त्वां संस्तवीम्यहम् ॥ ५८९ ॥ त्रिभिः
येषूखिस्तस्य ते सूनो द्वारा मुख्यस्य यज्वनः ।
त्वां स्तौमि त्वां प्रशंसामि त्वां धन्यं वच्मि चेश्वर ॥ ५९० ॥

सत्यार्थुवाच ॥

इत्यादिके स्तवे तेन प्रोक्ते सिद्धारुरुक्षुणा ॥
चिताग्निं तस्य दाहाय लोकाः प्राज्वलयन् द्रुतम् ॥ ५९१ ॥
परन्तु वह्निना साधोरग्रस्ते सति वर्ष्मणि ।
तं दण्डपाणिकस्तर्हि समाहूतोऽसिनाऽबधीत् ॥ ५९२ ॥
श्रीयेष्वोऽपक्रवं कर्त्तुमस्वीकुर्वन्नसौ तथा ।

हतो बलेन दुष्टानां परलोकनिवास्यभूत् ॥ ५९३ ॥
तं दृष्ट्वा यौवने कश्चिद् ऐरेणायाभिधः सुधीः ।
तत्पश्चात् तस्य वृत्तान्तं निजग्रन्थद्वयेऽलिखत् ॥ ५९४ ॥
तस्याहमत्र सम्पूर्णं न वदिष्यामि विस्तरम् ।
प्रासंगिकन्तु तत्सारमुद्धरिष्यामि कञ्चन ॥ ५९५ ॥

ऐरेणाय उवाच ॥

तारुण्ये प्राप्तवानस्मि पलुकार्पस्य दर्शनम् ।
तात्कालिकञ्च वृत्तान्तं सर्वं सुष्ठु स्मराम्यहम् ॥ ५९६ ॥
स धन्यो नित्यमासीनो यत्र लोकानभिश्चयत् ।
शक्नोमि वक्तुमद्यापि तस्य स्थानस्य विस्तरम् ॥ ५९७ ॥
तदीयो यादृगाचारस्तस्य रूपञ्च यादृशम् ।
लोकौघं यादृशांश्चासावुपदेशानशुश्रवत् ॥ ५९८ ॥
यथा च खिस्तशिष्येण सार्द्धं योहन्निना निजम् ।
संलापं सोऽवग् अन्यैश्च खिस्तद्रष्टृजनैः सह ॥ ५९९ ॥
यथा खिस्तस्य चामीषां द्रष्टृणां प्रमुखाच्छ्रुतम् ।
प्रभोराश्चर्य्यकर्मादेः स वृत्तान्तमवर्णयत् ॥ ६०० ॥
इत्यादिं स्वस्य तारुण्ये पलुकार्पस्य विस्तरम् ।
समागमेन बुद्धाऽहं संस्मराम्यधुनावधि ॥ ६०१ ॥
यद्यच्च वर्णयामास पलुकार्पश्चरित्रवित् ।
शास्त्राणामनुसार्य्यासीद् निखिलस्तस्य विस्तरः ॥ ६०२ ॥

सत्यार्थ्युवाच ॥

तादृक्षः कीर्त्तिमान् भूत्वा पलुकार्पः सुधीरसौ ।
एकां पत्रीं फिलिप्पिस्थान् खिस्तीयान् प्रति नुन्नवान् ॥ ६०३ ॥
प्रलायां सा च यावन्त्यां भाषायां रचिता खिपिः ।
परम्परागताऽद्यापि वर्त्तिनी पद्यते बुधैः ॥ ६०४ ॥
तस्यां खिपावदीर्घायां प्रसङ्गस्याभवे सति ।
मात्थायाद्युक्तशास्त्राणि नोद्दिश्यन्ते विशेषतः ॥ ६०५ ॥
यः श्रीयेषूक्तिसङ्गस्तु मात्थायाद्यैरचीयत ।
तन्मध्ये काश्चिदुच्यन्ते पलुकार्पखिपावपि ॥ ६०६ ॥
अन्यच्च यन्मतं शास्त्रे खिस्तीये प्रतिपाद्यते ।
तत् सोपि पत्रलद् मेने इति तल्लेखनात् स्फुटम् ॥ ६०७ ॥
शरीरं मानुषं धृत्वा येषूखिस्तो नृणां कृते ।
तत्यापशुद्धये मृत्युं बुभुजे दण्डदारुणि ॥ ६०८ ॥
ततः पश्चात् तमुत्थाप्य मृत्युलोकात् परेश्वरः ।
तेजः सिंहासनञ्चासौ स्वे पार्श्वे दक्षिणेऽ ददात् ॥ ६०९ ॥
पदार्थाश्चाखिलाः स्वर्ग्या भौमाश्चास्य वशीकृताः ।
स जीवतां मृतानाञ्च विचारायागमिष्यति ॥ ६१० ॥
इत्यादिना विशेषेण मूलशास्त्रानुसारिणा ।
स पत्रलेखकः प्रत्नो येषूखिस्तमवर्णयत् ॥ ६११ ॥
तथा च यन्मतं शास्त्रे खिस्तीये दृश्यतेऽधुना ।
तत् तत्कालेऽपि विख्यातिं लोके प्रापेति बध्यते ॥ ६१२ ॥

यत् पौलं तस्य पत्नीञ्च फिलिप्पीयाञ्जनान् प्रति ।
नुन्नां स उद्दिश्यनाह तस्य सारोऽयमुच्यते ॥ ६१३ ॥

पलुकार्प उवाच ॥

ज्ञानं धन्यस्य पौलस्य लोकमध्ये यशस्विनः ।
मया वा माद्दशाऽन्येन वाऽनुगन्तुं न शक्यते ॥ ६१४ ॥
युष्मन्मध्ये स आगत्य नृणां साक्षात् तदाभुवाम् ।
सम्यक् सनिश्चयश्चैव मतं सत्यमशिक्षयत् ॥ ६१५ ॥
स एवान्यत्र तिष्ठंश्च युष्मान् प्रत्यलिखल्लिपीः ।
तासां विचारणाद् यूयं मते निष्ठामवाप्स्यथ ॥ ६१६ ॥

सत्यार्थुवाच ॥

यांश्चान्यत्र स्थितान् लोकान् प्रति पौलोऽनुदलिखीः ।
तदुक्तीः काश्चिदप्यस्यां सोऽवतारितवान् लिपौ ॥ ६१७ ॥
अतः पौलीयपत्युक्तवाक्यानामवतारणात् ।
ताः पत्र्यः पलुकार्पस्य पार्श्वे आसन्निति स्फुटम् ॥ ६१८ ॥
अशीतिर्वत्सराः प्रायो येषां स्वर्गमनात्परम् ।
यदाऽतीयुस्तदा पाप्यनामा विद्वानविद्यत ॥ ६१९ ॥
स पाप्यः पञ्चसर्गाढ्यं प्रभुणाख्यप्रपञ्चनम् ।
इत्याख्याधारिणं कञ्चिदेकं ग्रन्थं प्रणीतवान् ॥ ६२० ॥
स ग्रन्थः साम्प्रतं क्वाप्यो वर्त्तमानो न विद्यते ।
प्रत्नैः कैश्चित्तु तद्वार्त्ता कथ्यते ग्रन्थकारिभिः ॥ ६२१ ॥
तैरन्यै ग्रंन्थकारैश्च स्वग्रन्थेष्ववतारिताः ।

अल्पेऽशास्तस्य वर्त्तन्ते पाप्यग्रन्थस्य केचन ॥ ६२२ ॥
श्रीयेभ्यः स्वर्गतेः पश्चात् प्रायशोऽब्दशतत्रये ।
व्यतीते विविदे कश्चिद् विद्वान् यूसेब्यनामकः ॥ ६२३ ॥
असौ खिस्तीयमण्डल्याः पुरावृत्तानि सर्वतः ।
समास्यत् तच्चरित्राणां प्रबन्धञ्च प्रणीतवान् ॥ ६२४ ॥
पाप्यादिभिः कृता ग्रन्था लुप्ता ये सन्ति साम्प्रतम् ।
ते यूसेब्यस्य वेलायां वर्त्तमानास्तदाऽभवन् ॥ ६२५ ॥
प्रमाणं पूर्ववृत्तस्य दित्सन् खण्डान् बहूनसौ ।
तेभ्यो ग्रन्थेभ्य उद्धृत्य ग्रन्थे स्वस्मिन्नमेलयत् ॥ ६२६ ॥
तत्प्रतपुस्तकांशास्तु यस्मिन्नन्तर्भवन्त्यमी ।
स यूसेब्यकृतो ग्रन्थः प्रचलत्यधुनावधि ॥ ६२७ ॥
यं पाप्यपुस्तकादंशं सोऽवतारितवान् निजे ।
ग्रन्थे तमंशमेतर्हि व्याकरोमि समासतः ॥ ६२८ ॥

यथा यूसेब्यावतारिते वाक्ये पाप्य उवाच ॥

वृद्धानां प्रमुखात् पूर्वं यद् निश्चित्य स्मराम्यहम् ।
मुदा तद् ग्रन्थयिष्यामि व्याकरिष्यामि चाखिलम् ॥ ६२९ ॥
ये सत्यं श्रिच्चयामासुः प्रभोः पार्श्वादिताश्च याः ।
आज्ञाप्ताः कीर्त्तयामासुस्तान् जनानहमिष्टवान् ॥ ६३० ॥
केनापि चेत्तु वृद्धानामनुगेन सहामिलम् ।
वृद्धानां तर्हि वाक्यानि सदा तं पृष्टवानहम् ॥ ६३१ ॥
किं वाक्यम् अन्द्रियः प्रोचे पेत्रो वा किमभाषत ।

किं योमः किं फिलिप्पो वा याकोबो वा बभाषिरे ॥ ६३२ ॥
तथा योहन्निमात्थायौ कोऽप्यन्यो वाऽनुगः प्रभोः ।
किं किं बभाषिरे वाक्यमिति एष्टं मया समम् ॥ ६३३ ॥ युग्मं ॥

सत्यार्थुवाच ॥

अत्रावधीयतां विद्वन्नमी पाप्योदिता जनाः ।
पेत्रान्द्रियादयः सप्त शिष्या येष्वोऽभवन् निजाः ॥ ६३४ ॥
प्रभोस्तानग्रिमान् शिष्यानदृष्ट्वाऽपि स्वयं त्वसौ ।
पाप्यस्तदृष्टृभिः कैश्चिदालसाप जनैः सह ॥ ६३५ ॥
तादृक्षः सन्नसौ पाप्यो येषूसम्बन्धिनीं कथाम् ।
यथातथं विनिश्चेतुं प्रश्नाकात्र न संशयः ॥ ६३६ ॥
मात्थायमार्कंयो ग्रन्थावुद्दिश्यन् यदुवाच सः ।
तत्सारमत्र यूसेब्यप्रबन्धादुद्धराम्यहम् ॥ ६३७ ॥

यथा ॥ पाप्य उवाच ॥

वृत्तान्तान् यावतः पेत्रो वर्णयामास तावतः ।
मार्कः सम्यक् लिलेखेति स वृद्धो मामभाषयत् ॥ ६३८ ॥
परन्त्वसौ चरित्राणि श्रीखिस्तस्य वचांसि वा ।
अनुक्रमेण बद्धानि स्वग्रन्थे न समार्पयत् ॥ ६३९ ॥
स हि प्रभो र्न शुश्राव न वा तस्यान्तिके स्वयम् ।
अतिष्ठत् किन्तु तत्पश्चात् पेत्रस्यानुचरोऽभवत् ॥ ६४० ॥
प्रमादः कोपि मार्केण न चक्रे स हि कांश्चन ।
यथा सस्मार वृत्तान्तांस्तथा ग्रन्थे निजेऽलिखत् ॥ ६४१ ॥

अहं यच्छ्रुतवानस्मि तदशेषं यथातथम् ।
ग्रन्थेऽर्पयेयमित्येतत् स मार्कोऽवदधौ तदा ॥ ६४२ ॥
इब्रीयेाक्तौ* तु मात्थायः ह्यतवान् शास्त्रसंहिताम् ।
तदर्थव्याह्वतिं लोका यथाशक्ति तु चक्रिरे ॥ ६४३ ॥
सत्यार्थुंवाच ॥
मात्थायनिर्मितं यत्तु शास्त्रमद्यापि वर्त्तते ।
तद् यावन्यां ह्यतं वाण्यां न च वाण्यां यह्वदिनाम् ॥ ६४४ ॥
अतः स्वयं स मात्थायो बुधोऽन्यो वा तदातनः ।
तं ग्रन्थं व्याकरोद् वाण्यां यावन्यामिति बुध्यते ॥ ६४५ ॥
एतर्हि यत्तु पाप्योक्तिद्वयमुद्धृतवानहम् ।
ततो येष्वस्वरित्राणां साधिताऽस्ति चिरन्नता ॥ ६४६ ॥
श्रीयेष्वः स्वर्गतेः पश्चात् प्रायो वर्षशते गते ।
युस्तीननामको विद्वान् मध्यमायुरवर्त्तत ॥ ६४७ ॥
सत्यस्यान्वेषणे सक्तः सन्नसौ यौवनावधि ।
नानामतोपदेष्टॄणामनुगः क्रमशोऽभवत् ॥ ६४८ ॥
शेषे खिस्तीयशास्त्रस्य ज्ञानं प्राप्य सुधीरसौ ।
तद् एकं निश्चितं मत्वा सफलञ्च समाश्रयत् ॥ ६४९ ।
असौ खिस्तीयशास्त्रोक्तमतप्रामाण्यसाधकान् ।
नानाप्रस्तावसंयुक्तान् कांश्चिद् ग्रन्थान् प्रणीतवान् ॥ ६५० ॥

---

* या इब्रीयेति कथ्यते सा यह्वदिनां तदातनी भाषा ॥

कालात्ययेन तन्मध्ये केचिल्लोपमयासिषुः ।
अन्ये तु केचिदद्यापि सन्त्यसत्करवर्त्तिनः ॥ ६५१ ॥
अद्यापि वर्त्तमानेषु तेषु ग्रन्थेषु भूयसीः ।
खिस्तीयमूलशास्त्रोक्तीरसावुद्धृतवान् सुधीः ॥ ६५२ ॥
भवांस्तु येन जानीयात् सम्यगेतस्य विस्तरम् ।
तदर्थं तस्य वाक्यानि व्याकरिष्यामि कानिचित् ॥ ६५३ ॥
कश्चिद् मात्थायलूकाभ्यां प्रोक्तं वृत्तान्तमुद्धरन् ।
स युस्तीनस्तयोः स्पष्टमुद्देशं कृतवानिमम् ॥ ६५४ ॥

यथा ॥ युस्तीन उवाच ॥

ये येषूखिस्तसम्बन्धिसर्ववृत्तान्यवर्णयन् ।
त एवं श्रिच्चयामासुस्तेषु विश्वसिमो वयम् ॥ ६५५ ॥

पुनर्यथा ॥

मह्यं पित्रा मदीयेन सर्वमस्ति समर्पितम् ।
इत्यादि सोऽब्रवीद् येषूः सुसंवादे यथा स्मृतम् ॥ ६५६ ॥

सत्यार्थुवाच ॥

भावं युस्तीनवाक्यस्य येन बोधेत् स्फुटं भवान् ।
तदर्थं व्याकृतिस्तस्य वक्ष्यमाणाऽवधीयताम् ॥ ६५७ ॥
येषूखिस्तेन यत् त्राणं मनुष्याणामसाध्यत ।
खिस्तीयास्तस्य सन्देशम् एवाङ्गेल्यमवादिषुः ॥ ६५८ ॥
य एवाङ्गेल्यशब्दस्तु यावनः कथितो मया ।
सुसंवादार्थकः सोऽस्ति संस्कृतोक्तावनूदितः ॥ ६५९ ॥

तत्पश्चाद् येषु वृत्तान्तस्तस्य त्राणस्य सस्मरे ।
ते ग्रन्थाश्चापि तेनैव नाम्ना प्रख्यातिमाप्नुवन् ॥ ९९० ॥
मात्थायाद्यैः प्रणीतानि चरित्राणि प्रभोरतः ।
तेनैवाङ्गेल्यशब्देन व्यश्रूयन्त तदा जनैः ॥ ९९१ ॥
सुसंवादेतिशब्दस्य श्रुत्वा व्याख्यामीदृशीम् ।
अथोऽन्यान्युद्धरिष्यामि युस्तीनस्य स्थलान्यहम् ॥ ९९२ ॥
पुनः स्थलान्तरे येषः काश्चिदाज्ञां समुद्दिशन् ।
सुसंवादाभिधान् ग्रन्थान् युस्तीनोऽसावकीर्त्तयत् ॥ ९९३ ॥

यथा ॥ युस्तीन उवाच ॥

ग्रन्थेषु स्वप्रणीतेषु सुसमाचारनामसु ।
श्रीयेषूप्रेरिता दूता वाक्यमेतत् समार्पयन् ॥ ९९४ ॥

पुनर्यथा ॥

यान् येषूप्रेरिता दूतास्तदीयाश्चानुयायिनः ।
प्रबन्धान् रचयामासुस्तेष्विदं लिखितं वचः ॥ ९९५ ॥

सत्यार्थ्युवाच ॥

सदा ख्रिस्तीयसंसत्सु तदानीं रविवासरे ।
सुसंवादा न्यपठन्त विद्वन्नित्यं पुराऽब्रवम् ॥ ९९६ ॥
यस्तत्काले व्यवाहारि ख्रिस्तीयै र्भंजनक्रमः ।
तं वर्णयन् स युस्तीन इमं प्रोवाच विस्तरम् ॥ ९९७ ॥

यथा ॥ युस्तीन उवाच ॥

श्रीयेषूप्रेरितै र्दूतैः कृता ग्रन्थाश्च सर्वदा ।

यथावेलं निपद्यन्ते ग्रन्था वा भव्यवादिनाम् ॥ ६६८ ॥
समाप्ते तन्निपाठे तु तच्छास्त्रोक्त्यनुसारिणे ।
सदाचाराय शासित्री कथाऽध्यक्षेण कथ्यते ॥ ६६९ ॥

सत्यार्थुवाच ॥

अतो येष्वस्खरित्राणि सुप्रसिद्धानि कानिचित् ।
तदा युस्तीनवेलायामवर्त्तन्तेति सिद्धति ॥ ६७० ॥
सुसंवादाश्च ये तस्युस्तदा युस्तीनसन्निधौ ।
त एव नो च तद्भिन्नाः प्रचलन्त्यधुनावधि ॥ ६७१ ॥
स्वपार्श्वस्थप्रबन्धेभ्यो या ह्युक्तीरुद्धार सः ।
सुसंवादेषु ताः सर्वा दृश्यन्तेऽद्यापिवर्त्तिषु ॥ ६७२ ॥
सर्वान्तिमश्च यो ग्रन्थः खिस्तीयागमसंग्रहे ।
तस्योद्देशेऽपरं वाक्यं युस्तीनस्योद्धराम्यहम् ॥ ६७३ ॥

यथा ॥ युस्तीन उवाच ॥

श्रीखिस्तनुन्नदूतानामेको योहन्ननामकः ।
भविष्यद्दर्शने स्वेन प्राप्ते भाव्येतदब्रवीदित्यादि ॥ ६७४ ॥

सत्यार्थुवाच ॥

अन्यांस्तदातनान् कांश्चित् त्यक्त्वाऽहं ग्रन्थकारकान् ।
पूर्वोक्तस्यापरं वक्ष्ये ऐरेणायस्य विस्तरम् ॥ ६७५ ॥
योहन्नेरनुगं वृद्धं पलुकार्पमसौ यथा ।
तारुण्ये दृष्टवानासीदिति पूर्वमवर्णयम् ॥ ६७६ ॥
श्रीयेश्वः स्वर्गतेः पश्चात् प्रायो वर्षशते गते ।

सोऽजायतेति विद्वांसः किञ्चिद्भेदेन मन्वते ॥ ६७७ ॥
शेषु तु मध्यमायुष्को भूत्वा लुग्दूनवर्त्तिनः ।
खिस्तीयलोकसंघस्य सोऽध्यक्षत्वमवाप्तवान् ॥ ६७८ ॥
मतानां स च सर्वेषां दृढोऽभूदवधारकः ।
इत्यब्रवीत् तमुद्दिश्य तर्त्तुल्याणोऽवरो बुधः ॥ ६७९ ॥
ऐरेणायख्यसौ ग्रन्थं नानाऽसन्मतखण्डने ।
वाण्यां चकार यावन्यां पञ्चसर्गसमन्वितम् ॥ ६८० ॥
तस्मिंश्च यावने ग्रन्थे लुप्ते सत्यपि सम्मति ।
प्रत्ना तद्याक्षती रौम्यवाण्यामद्यापि तिष्ठति ॥ ६८१ ॥
मूलग्रन्थस्य चामुष्य यावनस्यापि केचन ।
खण्डा अद्यापि वर्त्तन्ते यूसेब्यादिभिरुद्धृताः ॥ ६८२ ॥
अथोऽहं खस्य वादस्य साधनार्थाय सम्मति ।
तद्ग्रन्थवर्त्तिनीरुक्तीर्व्याकरिष्यामि काश्चन ॥ ६८३ ।
ऐरेणायस्य यद् वाक्यं मयाऽऽदौ व्याकरिष्यते ।
तद् यूसेब्येन यावन्यामुक्तावस्ति समुद्धृतम् ॥ ६८४ ॥
तद् वाक्यं यावने ग्रन्थे यूसेब्येन कृते स्वयम् ।
अहं विलोक्य तत्सारं व्याकरोमि यथामति ॥ ६८५ ॥
यथा ॥ यूसेब्योद्धृते खण्डे ऐरेणाय उवाच ॥
पौलः पेत्रश्च रोमायां सुसंवादप्रचारणाम् ।
यत्काले चक्रतुस्तस्य समयस्योच्यते कथा ॥ ६८६ ॥
तस्मिन् काले हि मात्थायो मध्ये तिष्ठन् यहूदिनाम् ।

एकं तदीयभाषायां सुसंवादं प्रणीतवान् ॥ ६८७ ॥
शिष्यः पेत्रस्य मार्कस्तु तयो र्निर्गमनात् परम् ।
पेत्रेण कीर्त्तिताः सर्वा वार्त्ता ग्रन्थे समार्पयत् ॥ ६८८ ॥
तथाऽनुगश्च पौलस्य लूकः पौलेन भूतले ।
प्रचारितं सुसंवादमर्पयामास पुस्तके ॥ ६८९ ॥
ततः पश्चात् सुसंवादमेफिसाख्ये पुरे वसन् ।
प्रादुश्चकार योहन्निः प्रभोः शिष्यः प्रियः स्वयम् ॥ ६९० ॥

सत्यार्थुवाच ॥

पुरा स यावनो ग्रन्थ ऐरेणायक्षतोऽलुपत् ।
तद्याक्षतिस्तु रौम्योक्तावद्याप्यस्तीत्यमब्रवम् ॥ ६९१ ॥
तस्याश्च रौम्यभाषीयव्याक्षतौ विविधः स्फुटः ।
खिस्तीयमूलशास्त्राणामुद्देशः क्रियते मुजः ॥ ६९२ ॥
मार्कौ यथाह मात्थायो वेति निर्द्देशपूर्वकम् ।
सुसंवादोक्तिबाऊल्यं तद्ग्रन्थेऽस्ति समुद्धृतम् ॥ ६९३ ॥
सुसंवादाश्च येऽतिष्ठन्नैरेणायस्य सन्निधौ ।
त एवाद्यापि नः पार्श्वे वर्त्तन्तेऽत्र न संशयः ॥ ६९४ ॥
यतो यो यः सुसंवादः कथ्यते तत्र पुस्तके ।
तत्तद्विशेषनिर्द्देशः क्रियते ग्रन्थकारिणा ॥ ६९५ ॥
विशेषतस्तु लूकोक्तसुसंवादस्य वर्णनम् ।
तदर्थविस्तरश्चैव तत्र ग्रन्थे विलोक्यते ॥ ६९६ ॥
तत्काले याट्टशं यस्य सुसंवादस्य सोऽवदत् ।

विशेषं तस्य तादृच्च एव सम्मति दृश्यते ॥ ६९७ ॥
प्रबन्धः पञ्चमो योऽस्ति खिस्तीयागमसंग्रहे ।
चरित्रं खिस्तदूतानां तस्मिन्नाहेत्यवादिषम् ॥ ६९८ ॥
लूकश्च यस्तृतीयस्य सुसंवादस्य कारकः ।
तं ग्रन्थमप्यसावेव चकारेति सदा स्मृतम् ॥ ६९९ ॥
असौ ग्रन्थस्तु तच्चांसीदैरेणायस्य सन्निधौ ।
तदा लूकश्च तत्कर्त्ता सममानीति सुस्फुटम् ॥ ७०० ॥
ऐरेणायो हि तच्छास्त्रादुद्धृता भूयसीः कथाः ।
स्ववादपुष्टये स्वीयग्रन्थमध्ये समक्षिपत् ॥ ७०१ ॥
यथा लूकोक्तमित्यादिवाक्यै र्निर्दिश्य भूरिभिः ।
लूकं तच्छास्त्रकर्त्तारमैरेणायोऽवदत् स्फुटम् ॥ ७०२ ॥
पौलश्च यानि पत्राणि स्वशिष्यान् प्रति नुन्नवान् ।
तन्मध्ये द्वादशोच्यन्ते ऐरेणायेन भूरिशः ॥ ७०३ ॥
किन्त्वस्य विस्तरो येन न भवेत् क्लेशदायकः ।
तदर्थं द्वे स्थले तस्माद् ग्रन्थाद् नेष्यामि केवलम् ॥ ७०४ ॥
नुन्नं पौलेन रोमास्थां प्रति खिस्तीयमण्डलीम् ।
पत्रं समुद्दिश्यैवमैरेणायोऽब्रवीत् स्फुटम् ॥ ७०५ ॥

यथा ॥ ऐरेणाय उवाच ॥

पौलस्तद् व्याकरोद् रौम्यान् प्रति लोकान् लिपिं

लिखन्नित्यादिना ॥

सत्यार्थ्युवाच ॥

ये पौलः स्वान् करिष्यीयान् शिष्यान् प्रत्यलिखल्लिपी ।
तदेकामुद्दिश्यैवमैरेणायोऽब्रवीत् पुनः ॥ ७०६ ॥

यथा ॥ ऐरेणाय उवाच ॥

तदेव सुस्फुटं पौलः प्रतिपादितवान् निजे । [७०७ ॥
यत्रे लोकान् करिष्यीयान् प्रति नुन्ने ब्रुवन्निदमित्यादिना ॥

सत्यार्थ्युवाच॥

किञ्चैतत्सर्वशास्त्रोक्तौ निजवादोपयोगिनीः ।
प्रामाणिकीश्च मेनेऽसावैरेणायः समुद्धरन् ॥ ७०८ ॥
तेषाञ्चापौरुषेयत्वं शास्त्राणां सोऽप्यमन्यत ।
तानीश्वरीयशास्त्राणि ब्रुवन् ग्रन्थे निजे क्वचित् ॥ ७०९ ॥
अतः प्रामाण्यमेतेषां सच्छास्त्राणां तदातनी ।
खिस्तीयमण्डली मेन इति स्पष्टं प्रतीयते ॥ ७१० ॥
खिस्तीयशास्त्रकारेभ्यो भिन्नान् यान् विदुषोऽब्रवम् ।
ऐरेणायेन ते प्राय उद्दिश्यन्ते समे स्फुटम् ॥ ७११ ॥
स क्षेमत्याप्ययुक्तीनपल्लुकार्पान् मया स्मृतान् ।
समुद्दिश्य तद्ग्रन्थवर्त्युक्तीरुद्धार च ॥ ७१२ ॥
प्रोक्तास्ते तर्हि चत्वारः खिस्तीया ग्रन्थकारिणः ।
ऐरेणायस्य कालात्प्रागवर्त्तन्तेति सिद्ध्यति ॥ ७१३ ॥
ऐरेणायेन यच्चक्रे पल्लुकार्पस्य वर्णनम् ।
तत् पूर्वमुक्तवानस्मि पल्लुकार्पं समुद्दिशन् ॥ ७१४ ॥

स ग्रन्थकृत्तु यत् प्रोक्तां पलुकार्पकृतां लिपिम् ।
समुद्दिश्याह तन्मात्रमत्र वक्ष्यामि सम्प्रति ॥ ७१५ ॥

यथा ॥ ऐरेणाय उवाच ॥

एका च सप्तमा पत्नी पलुकार्पस्य वर्त्तते ।
फिलिप्पिवासिनो लोकान् प्रति सा लिखिताऽभवत् ॥ ७१६ ॥
ततो जिज्ञासवो लोकाः परित्राणपरायणाः ।
तच्छ्रद्धां श्रद्दधु र्ज्ञातुं सन्मतस्य च विस्तरम् ॥ ७१७ ॥

सत्यार्थ्युवाच ॥

त्रयाणां क्षेमदादीनां विषये यत्तु सोऽलिखत् ।
अत्यन्तविस्तराद् बिभ्यद् अत्र तन्नोद्धराम्यहम् ॥ ७१८ ॥
ऐरेणायात् परं भूतान् कांश्चिद् ग्रन्थकृतोऽपरान् ।
विहाय क्षेमदाख्यस्य वार्त्तां वक्ष्यामि धीमतः ॥ ७१९ ॥
मदुक्तात् क्षेमतः पूर्वादितरस्तु स बुध्यताम् ।
स चाब्देन्द्रियावासी क्षेमदित्यभिधीयते ॥ ७२० ॥
श्रीयेश्वः स्वर्गतेः पश्चाद् वीते षष्ठ्यधिके शते ।
वर्षाणां तर्ह्यसौ विद्वान् मध्यमायुरवर्त्तत ॥ ७२१ ॥
खिस्तीयधर्मसम्बन्धे बहून् ग्रन्थांश्च सोऽलिखत् ।
तेषां मध्ये तु चत्वारः प्रचलन्त्यधुनावधि ॥ ७२२ ॥
पाण्डित्यात् सद्गुणेभ्यश्च सुविख्यातः सुधीरसौ ।
स्वस्मात् पश्चाद्भवैः प्रत्नै र्ग्रन्थकारैः प्रशस्यते ॥ ७२३ ॥
अथो खिस्तीयशास्त्राणां यमुद्देशमसौ बुधः ।

खग्रन्थेष्वकरोत् तस्य सारं वक्ष्यामि सम्प्रति ॥ ७२४ ।
मुऊर्हिं स्मर्य्यते तेन सुसंवादचतुष्टयम् ।
तदुक्तिसञ्चयस्तस्य ग्रन्थेषूद्धियतेऽपि च ॥ ७२५ ॥
तत्कर्त्तारश्च ये ख्याताः सदा मात्र्यायपूर्वकाः ।
सर्वे त एव तेनापि तत्कर्त्तृत्वेन कीर्त्तिताः ॥ ७२६ ॥
लूकश्च खिस्तदूतानां यच्चरित्रं प्रणीतवान् ।
अदोऽपि भूरिश्लस्तेन स्मर्य्यते ग्रन्थकारिणा ॥ ७२७ ॥
पौलश्च याः स्वशिष्याणां शिक्षायायलिखल्लिपीः ।
तन्मध्ये क्लेमता तेन संस्मर्य्यन्ते त्रयोदश ॥ ७२८ ॥
किञ्च खिस्तीयशास्त्राणां मदुक्तानामसावपि ।
अपौरुषेयतां मेने इति स्पष्टं प्रकाश्यते ॥ ७२९ ॥
यतः स तानि शास्त्राणि पवित्राण्यैश्वराणि च ।
किञ्चेश्वरीयनिःश्वासभवानीति प्रशंसति ॥ ७३० ॥
अथो तदातनान् कांश्चिदपरान् ग्रन्थकारिणः ।
त्यजन् किञ्चित् करिष्यामि तर्त्तुल्याणस्य वर्णनम् ॥ ७३१ ॥
स सप्तत्यधिकेऽब्दानां शतके विगते सति ।
श्रीयेष्वः स्वर्गमात् पश्चाद् मध्यमायुरविद्यत ॥ ७३२ ॥
भूखण्डे सोऽफ्रिकाभिख्ये कर्थागाख्ये च पत्तने ।
जज्ञे खिस्तीयधर्मस्य सेवको विविदेऽपि च ॥ ७३३ ॥
स ग्रन्थकारिभी रौम्यै र्यवनैश्च हतान् बहून् ।
पठित्वा विविधान् ग्रन्थान् नानाषाण्डित्यभागभूत् ॥ ७३४ ॥

स खिस्तीयस्य धर्मस्य योषणाय च तत्परः ।
नानाप्रस्तावकान् ग्रन्थांस्तदुद्देशे प्रणीतवान् ॥ ७३५ ॥
खिस्तीयमूलशास्त्राणि संस्मरन् यदसौ सुधीः ।
ग्रन्थेषु स्वकृतेष्वाह तस्य सारोऽयमुच्यते ॥ ७३६ ॥

यथा । तर्त्तुल्याख उवाच ॥

प्रभुर्यैभ्यः सुसंवादप्रचारं स्वयमार्पयत् ।
ते तेषामनुगाश्चैव सुसंवादानकुर्वत ॥ ७३७ ॥
दूतौ योहन्निमात्थायावस्मान् शिक्षयतो मतम् ।
दूतानामनुगौ मार्कों लूकश्चादिशतः पुनः ॥ ७३८ ॥

सत्यार्थुवाच ॥

यं वादं सोऽकरोत् सर्वं सुसंवादान् समुद्दिशन् ।
तस्यात्र विस्तराद् भीत्वा न करिष्यामि वर्णनम् ॥ ७३९ ॥
किन्त्वस्य विस्तरेणालं तेन प्रायः समानि हि ।
खिस्तीयमूलशास्त्राणि संस्मर्य्यन्ते विशेषतः ॥ ७४० ॥
किञ्चैषां सर्वशास्त्राणां मदुक्तानामसौ सुधीः ।
अपौरुषेयतां मेने इति सिद्धं तदुक्तिभिः ॥ ७४१ ॥
अन्यं तदाभुवां त्यक्त्वा निकरं ग्रन्थकारिणाम् ।
विज्ञस्य वर्णनं किञ्चित् करोम्योरिगिणेर् अथ ॥ ७४२ ॥
श्रीयेश्वः स्वर्गतेः पश्चात् प्रायः सार्द्धशतं यदा ।
वर्षाणां व्यत्यगात् तर्हि प्रोक्तो विद्वानजायत ॥ ७४३ ॥
पश्चाद् ओरिगिणौ तस्मिंस्तरुणे सति तत्पिता ।

खिस्तीयधर्ममन्तृत्वाद् दण्डितो बुभुजे मृतिम् ॥ ७४४ ॥
बाल्येऽपि तत्त्वजिज्ञासुः सूक्ष्मबुद्धिश्च सन्नसौ ।
नानाशास्त्राणि तारुण्ये पठित्वा पण्डितोऽभवत् ॥ ७४५ ॥
असौ युवा पुरे तिष्ठंस्तदाऽलेक्षन्द्रियाभिधे ।
खिस्तीयमार्गजिज्ञासूंल्लोकान् पाठालयेऽशिक्षत् ॥ ७४६ ॥
यदा तद्द्वेषिभिः क्रूरैः खिस्तीयानामुपद्रवः ।
पुनः प्रचक्रमे कर्त्तुं तदा सोऽपि न्यपीड्यत ॥ ७४७ ॥
काराबद्धोऽपि घोरैश्च पीडनैरर्दितश्च सन् ।
स्वधर्मे निश्चलस्तस्थावीश्वरे विश्वसन्नसौ ॥ ७४८ ॥
सदा खिस्तीयधर्मस्य पोषणे व्याकुलौ च सः ।
व्यापारी संस्तदुद्देशे बहून् ग्रन्थान् प्रणीतवान् ॥ ७४९ ॥
तन्मध्ये भूरयो ग्रन्थाः कालग्रासात् पुराऽलुपन् ।
अन्ये त्वद्यापि वर्त्तन्ते निपद्यन्ते च पण्डितैः ॥ ७५० ॥
आसीत् खिस्तीयधर्मस्य वैरी केल्साभिधः पुरा ।
स ग्रन्थं तस्य धर्मस्य खण्डनाय लिलेख च ॥ ७५१ ॥
तदीयमुत्तरं विज्ञो लिखित्वैरिगिणिस्वसौ ॥
खिस्तीयमयसर्गाख्ये ग्रन्थे धर्ममतिष्ठिपत् ॥ ७५२ ॥
वाण्यां कृतश्च यावन्यां स ग्रन्थोऽद्यापि वर्त्तते ।
चिरन्तैः पण्डितैश्चासौ नवीनैश्च प्रशस्यते ॥ ७५३ ॥
दृढं खिस्तीयधर्मस्य तस्मिन् ग्रन्थे स वर्णयन् ।
यदाह तस्य सारांशमत्र स्थाने वदाम्यहम् ॥ ७५४ ॥

यथा ॥ ओरिगिणिरुवाच ॥

पुरा खिस्तीयधर्मस्य विस्तृतिं मेदिनीतले ।
बलच्छलादिभिर्विघ्नैरसंख्यैः प्रत्यरुध्यत ॥ ७५५ ॥
किन्त्वीश्वरस्य साहाय्याद् वृद्धिं प्राप्योत्तरोत्तरम् ।
अविघ्नेनाधुना लोके स सर्वत्र प्रचार्य्यते ॥ ७५६ ॥
मनुष्याः सर्ववंशीयास्तेन धर्मेण सद्गतिम् ।
प्राप्ता भवेयुरित्येतदिष्टवान् परमेश्वरः ॥ ७५७ ॥
अतः खिस्तीयलोकानामपकाराय मत्त्रणाः ।
अन्यैः प्रकल्पिता मत्त्यैर्भग्ना मोघाश्च जज्ञिरे ॥ ७५८ ॥
तत्पीडनाय यावच्च येतिरे भूभृदादयः ।
तदीया तावती वृद्धिः प्रक्रमश्च महानभूत् ॥ ७५९ ॥

सत्यार्थुवाच ॥

खिस्तीयमूलशास्त्राणां विषये यदसौ सुधीः ।
स्वग्रन्थेष्वाह तत्सारमत्र स्थाने ब्रवीम्यथ ॥ ७६० ॥
खिस्तीयमण्डलाख्याने प्रोक्तयूसेब्यनिर्मिते ।
अमुष्यैोरिगिनेरुक्ति र्वक्ष्यमाणाऽवतार्य्यते ॥ ७६१ ॥
यथा । यूसेब्यरचितखिस्तीयमण्डलीचरित्रविषयकप्रबन्धादु-

द्धृते वाक्येऽऽर्थत ओरिगिणिरुवाच ॥

ये चत्वारः सुसंवादाः कवलाः सर्वदृग्जैः ।
खिस्तीयैः सम्मतास्तेषामेतदैतिह्यमाम्नवम् ॥ ७६२ ॥
ओरियेषूखिस्तदूतेन मात्थायेन तदादिमम् ।

यद्भर्दिनां कृते वाण्यामिब्रीयायामरच्यत ॥ ७६३ ॥
द्वितीयं यत्तु तन्मध्ये तद् मार्कॅण व्यरच्यत ।
पेत्रो यद् वर्णयामास तत् स ग्रन्थे समग्रहीत् ॥ ७६४ ॥
तृतीयो यः सुसंवादो यच्च पौलः प्रशंसति ।
तमन्यवंश्यशिष्याणां कृते लूकः प्रणीतवान् ॥ ७६५ ॥
यत्खन्तिमः सुसंवादः सोऽस्ति योहन्निना कृतः ॥ ७६६ ॥

सत्यार्थुवाच ॥

लूकश्च खिस्तदूतानां यच्चरित्रमजग्रथत् ।
तदप्योरिगिणिः स्वेषु ग्रन्थेषूद्दिष्टवान् क्वचित् ॥ ७६७ ॥
यच्चोक्तवानसौ विद्वान् पत्रीः पौलकृताः स्मरन् ।
एतर्हि तस्य सारांशं व्याकरोमि समासतः ॥ ७६८ ॥
क्वचित् स स्वकृते कैल्सकृतग्रन्थस्य खण्डने ।
अमुं सम्बोधयन्नाह पौलपत्रीः समुद्दिशन् ॥ ७६९ ॥

यथा । ओरिगिणिरुवाच ॥

यः पौलस्तानि वाक्यानि प्रोक्तवांस्तस्य पत्रिकाः ।
भवान् आदाय तत्सारं स्वयं व्याकर्त्तुमर्हति ॥ ७७० ॥
स या लिपीः कलस्सीयान् फिलिप्पीयादिकान् प्रति ।
लिलेख तत्तद्भक्तीनां भवांस्तात्पर्य्यमीक्षताम् ॥ ७७१ ॥
यः कोपि तल्लिपीः सम्यग् मनो युक्ता पठेज्जनः ।
स तासां लेखितु र्बुद्धिं चमत्कारेण मंस्यते ॥ ७७२ ॥
तथा त्वसौ चमत्कारं न कुर्य्याद् यदि पाठकः ।

तदा स्वयं स मूर्खत्वात् परिहास्यो भविष्यति ॥ ७७३ ॥

सत्यार्थ्युवाच ॥

असौ चैरिगिणिर्विद्वान् खिस्तीयागमसंग्रहम्।

अपौरुषेयमज्ञासीदिति भाति तदुक्तिभिः ॥ ७७४ ॥

परन्त्वसौ तदुद्देशे यद्यदाह मुऊमुऊः।

तन्मध्ये विस्तराद् भीत्वा नोद्धरामि किमप्यहम् ॥ ७७५ ॥

अथोऽत्र विश्रुतान् कांश्चिद् ग्रन्थकारांस्तदातनान्।

त्यजन् किञ्चित् करिष्यामि कुप्रियाणस्य वर्णनम् ॥ ७७६ ॥

देशेऽफ्रिकाभिधे जन्म गृहीत्वाऽसौ सुधीवरः।

साहित्यपाठको भूत्वा लोके विख्यातिमाप्तवान् ॥ ७७७ ॥

आदौ खिस्तीयधर्मस्य मन्ता नासीत् स यौवने।

ततः पश्चात्त्वभूद् भक्तस्तस्य धर्मस्य सेवकः ॥ ७७८ ॥

श्रीयेष्वः स्वर्गमात् पश्चाद् वर्षाणां द्वादशाधिके।

श्रुतद्वये गते प्रायः स येष्योऽनुचरोऽभवत् ॥ ७७९ ॥

खिस्तीयश्चिल्लको भूत्वा शेषे कर्थागवर्त्तिनः।

खिस्तीयलोकसंघस्य सोऽध्यक्षत्वे न्ययुज्यत ॥ ७८० ॥

नम्रात्मा सन्नसौ पूज्यं तत् पदं नेष्टवान् स्वयम्।

साधारणास्तु तं लोका वव्रु र्नानागुणैः प्रियम् ॥७८१ ॥

पुनः सामान्यलोकास्तु श्वासितारश्च रोमिणः।

खिस्तीयद्रोहिणो भूत्वा नाना चक्रुरुपद्रवम् ॥ ७८२ ॥

स्वमिथ्यादेवतासक्ताः सामान्यास्तत्रवासिनः।

लोकाः ख्रिस्तीयनेतारं कुप्रियाणं तदाऽद्विषुः ॥ ७८३ ॥
लीलागारे स सिंहेन दार्य्यो निक्षिप्यतामिति ।
उच्चैःस्वरैरमी क्रूराः प्राणदंस्तज्जिघांसवः ॥ ७८४ ॥
एकस्यां बाधिताः पुर्य्यां यूयं यात पुरान्तरम् ।
इति स्वाननुगान् येषूः समादिक्षत् स्वयं पुरा ॥ ७८५ ॥
तच्छास्त्रोक्तानुसारेण कुप्रियाणो निजाद् गृहात् ।
पलाय्यान्यत्र गत्वा च गुप्तवासोऽवसत् क्वचित् ॥ ७८६ ॥
स तत्र गोपने मासान् स्थित्वा प्रायश्चतुर्दश ।
ख्रिस्तीयद्वेषिणां द्रोहे निवृत्ते गृहमागमत् ॥ ७८७ ॥
तत्काले रौम्यसाम्राज्ये महामारी बभूव तु ।
कार्थागपत्तने लोकास्तया मम्रुश्च भूरयः ॥ ७८८ ॥
ये तत्र न्यवसन् सर्वे मिथ्यादेवार्च्चका जनाः ।
मुमूर्षूणां स्वबन्धूनां सेवां ते तत्यजुर्भयात् ॥ ७८९ ॥
पुरी श्मवैः प्रतोलीषु पतितैः पर्य्यपूर्य्यत ।
श्मशाने तन्निधानाय नासीत् कस्यापि साहसम् ॥ ७९० ॥
तद् घोरं वृत्तमालोक्य कुप्रियाणस्तु निर्भयः ।
ख्रिस्तीयान् संसदे सर्वानाहूयैवमबोधयत् ॥ ७९१ ॥

कुप्रियाण उवाच ॥

दया दीनेषु कर्त्तव्या यथा शास्त्रे प्रदिश्यते ।
दयाधर्म्मेण सिद्धेन परमेशः प्रसीदति ॥ ७९२ ॥
चेत् स्वान् सधर्म्मणो लोकान् केवलांस्तूपकुर्महे ।

तदा वयं महाकर्म नाचरामश्चमत्करम् ॥ ७९३ ॥
मिथ्यादेवार्चकादिभ्यो योऽधिकं किञ्चिदाचरेत् ।
स एव केवलः सिद्धो भवितुं शक्नुयाज्जनः ॥ ७९४ ॥
आत्मानं यो जनः सूनुं परमेशस्य भाषते ।
पितुर्निंदर्शनं स्वस्य कुतो नानुकरोति सः ॥ ७९५ ॥
सतां हिताय लोकानामसताञ्च स ईश्वरः ।
अम्भोदै र्वर्षयत्यम्बु सूर्य्यमुद्गमयत्यपि ॥ ७९६ ॥
आचारं कर्त्तुमर्हामः स्वसुजन्मानुसारिणम् ।
ये ईश्वरात् पुनर्जाता जन्मानर्हा न सन्तु ते ॥ ७९७ ॥

सत्यार्थ्युवाच ॥

इत्यादिनोपदेशेन तदीयेन प्रचोदिताः ।
तच्छ्रोतारोऽखिलास्तर्हि प्रावृतन् धर्मकर्मणि ॥ ७९८ ॥
धनं व्यश्राणयन् श्रीला दरिद्राः परिशश्रमुः ।
पुरी च तत्कृते यत्नैः शश्वेभ्यः पर्य्यशोध्यत ॥ ७९९ ॥
खिस्तीयानाञ्च तादृश्या दयया शौर्य्ययुक्तया ।
मार्य्याः प्रवर्द्धनाल्लोकाः प्रारच्यन्त पुरस्थिताः ॥ ८०० ॥
ततः शासितृभी रौम्यैः खिस्तीयां मण्डलीं प्रति ।
महानुपद्रवो भूयस्तत्र कर्त्तुं प्रचक्रमे ॥ ८०१ ॥
मदुक्ते सज्जने तस्मिन् कुप्रियाणे तु शासितुः ।
रौम्यस्य पार्श्वमानीते सत्यसौ शासिताऽब्रवीत् ॥ ८०२ ॥

पतर्णनामा शासितोवाच ॥

रोमीयं ये जना धर्मं नानुतिष्ठन्ति साम्प्रतम् ।
तैः सोऽनुष्ठीयतामित्थं समाडीरितशासनम् ॥ ८०३ ॥
अतोऽहं तावकं नाम पृष्टवानस्मि सम्प्रति ।
त्वया प्रत्युत्तरं तर्हि मह्यं किं नु प्रदीयते ॥ ८०४ ॥

सत्यार्थुवाच ॥

अमुष्य शासितुः प्रश्नमिममाकर्ण्य निर्भयः ।
सद्धर्मे निश्चलस्तिष्ठन् कुप्रियाणोऽभ्यभाषत ॥ ८०५ ॥

कुप्रियाण उवाच ॥

खिस्तीयमण्डलाध्यक्षः खिस्तीयः खयमस्म्यहम् ।
एकस्मादीश्वरात् सत्यादन्यानीशान् न वेद्मि च ॥ ८०६ ॥
इमं परेश्वरं सर्वे वयं सेवामहे सदा ।
तस्मात् क्षेमं खमन्यीयं समाजस्यार्थयामहे ॥ ८०७ ॥

सत्यार्थुवाच ॥

खस्मिन् धर्मे स्थिरस्तिष्ठन् कुप्रियाणो महामनाः ।
तदा रौम्येण शासित्रा खदेशाद् निरवास्यत ॥ ८०८ ॥
श्वेषे खमागतो गेहं धृतः संश्च पदातिभिः ।
रौम्यस्य शासितुः पार्श्वं पुनर्निन्ये स सज्जनः ॥ ८०९ ॥
यदा स शासितु गेहमाययौ व्यूहसंयुतः ।
तदा तं शासिताऽपृच्छत् कुप्रियाणोऽसि नन्विति ॥ ८१० ॥
स प्रोचे सोऽहमस्मीति तच्छ्रुत्वा शासिताऽब्रवीत् ।

त्वं देवता यजस्वेति शिष्यसेऽधीश्वराज्ञया ॥ ८११ ॥
तच्छ्रुत्वा कुप्रियाणस्तु न करोमीत्यभाषत ।
दयित्वा शासिता प्रोचे स्वहितं चिन्तयेरिति ॥ ८१२ ॥
हितार्थं शासितु र्वाक्यं तदाकर्ण्याचलात्मकः ।
भीमाद् मृत्यो र्न भीत्वाऽपि कुप्रियाणस्तमब्रवीत् ॥ ८१३ ॥

कुप्रियाण उवाच ॥

यत्कृत्यै त्वं प्रदिष्टोऽसि तत्कार्य्यं क्रियतां त्वया ।
परामर्शास्पदं नास्ति विषये तादृशे स्फुटे ॥ ८१४ ॥

सत्यार्थ्युवाच ॥

तदा स्वमन्त्रिभिः सार्द्धं समालप्य स शासिता ।
वाक्यैरेतादृशैः श्लेषे कुप्रियाणमभाषत ॥ ८१५ ॥

गालर्य्यनामा शासितोवाच ॥

देवानां संस्तरस्कारी चिरं जीवितवानसि ।
स्वमन्त्रे कुत्सितेऽनेके संगिनश्च त्वया हताः ॥ ८१६ ॥

सत्यार्थ्युवाच ॥

इत्युक्ता सोऽपठीद् दण्डशासनं पत्रिकार्पितं ।
खड्गेन कुप्रियाणस्य प्राणदण्डो भवत्विति ॥ ८१७ ॥
तां श्रुत्वा शिष्टिमन्याय्यां कुप्रियाणस्तु तुष्टवान् ।
परेश्वरस्य धन्योक्ति र्भवत्वित्यमभाषत ॥ ८१८ ॥
ततो येषूक्ते मृत्युं बुभुक्षुः सन्नसौ मुदा ।
विस्तीर्णं क्षेत्रमानायि बऊपादपवेष्टितम् ॥ ८१९ ॥

तदा तस्मिन् स्थले व्यूहैराकीर्णे सति भूरयः।
लोकास्तरून् समारोहन्नवसानदिदृक्षया ॥ ८२० ॥
तथा लोकेषु पश्यत्सु परितःस्थेषु भूरिषु।
महात्मा कुप्रियाणोऽसौ छिन्नमूर्द्धा तनुं जहौ ॥ ८२१ ॥
धर्मं स्वं प्राक्तनं त्यक्त्वा खिस्तीयञ्चावलम्ब्य सः।
क्लेशानभुंक्त मृत्युञ्च परलोकसुभाशया ॥ ८२२ ॥
तान् क्लेशान् यत्कृतेऽभुंक्त तत् खिस्तीयमसौ मतम्।
तथ्यं दृढैः प्रमाणैश्च सिद्धं मेने न संशयः ॥ ८२३ ॥
तादृक्षः सन्नसौ साधु बुद्धिमान् पण्डितोऽपि च।
खिस्तीयधर्मसम्बन्धे कांश्चिद् ग्रन्थान् प्रणीतवान् ॥ ८२४ ॥
स याश्च स्वानि मित्राणि प्रति नानाऽलिखल्लिपीः।
तन्मध्येऽद्यापि कासाञ्चिद् वर्त्तमानोऽस्ति संग्रहः ॥ ८२५ ॥
सुसंवादादिशास्त्राणि खिस्तीयानि स्मरन् स यत्।
स्वग्रन्थेष्वाह तत्सारं किञ्चिन्मात्रं ब्रवीम्यथ ॥ ८२६ ॥
स रूपकं प्रयुञ्जानः क्वचित् खिस्तीयमण्डलीम्।
वाटीमिव स्मरन्नेतदर्थतो वाक्यमब्रवीत् ॥ ८२७ ॥

यथा ॥ कुप्रियाण उवाच ॥

खिस्तीयमण्डली वाट्याः सदृशी फलदांस्तरून्।
दधाति खीयभित्त्यन्तः फलहीनांस्तु छिन्त्ति ॥ ८२८ ॥
चतुर्भिः पादपानेतान् सा स्रोतोभिः प्रसिञ्चति।
चतुर्भिः सुसमाचारै स्तद्वारेण प्रसाददा ॥ ८२९ ॥

सत्यार्थ्युवाच ॥

बङ्गीश्च पौलस्त्यिपुलीरवतारितवानसौ ।
किञ्चैकमात्रमत्राहमुद्धरामि निदर्शनम् ॥ ८३० ॥

यथा ॥ कुप्रियाण उवाच ॥

स्वेषां न स्वामिनो यूयमित्याचारोपदेशृषु ।
स्वपत्रेष्वब्रवीत् पौल आदेशानैश्वरान् ददत् ॥ ८३१ ॥

सत्यार्थ्युवाच ॥

तस्मादनन्तरं त्वन्ये खिस्तीया ग्रन्थकारिणः ।
क्रमेण भिन्नदेशीया दियनुस्यादयोऽभवन् ॥ ८३२ ॥
ग्रन्थेषु स्वप्रणीतेषु ते प्रसंगानुसारतः ।
कश्चित् खिस्तीयशास्त्राणामुद्देशं क्वचिदूचिर ॥ ८३३ ॥
परन्तु विस्तराद् भीत्वा तेषां चर्चां त्यजन्नहम् ।
पूर्वोक्तस्याधिकां काञ्चिद् यूसेब्यस्य कथां ब्रुवे ॥ ८३४ ॥
श्रीयेश्वः स्वर्गतेः पश्चात् प्रायः सार्द्धशतद्वये ।
वर्षाणां विगते विद्वानसौ जज्ञे सुविश्रुतः ॥ ८३५ ॥
भूत्वा च मध्यमायुष्कः कैसरैयानिवासिनः ।
खिस्तीयलोकसङ्घस्य सोऽध्यक्षत्वे न्ययुज्यत ॥ ८३६ ॥
अनेकरूपविद्यायां निपुणः सन्नसौ सुधीः ।
नानाप्रस्तावकान् ग्रन्थान् स्वयं भूरीन् प्रणीतवान् ॥ ८३७ ॥
तन्मध्ये केचन ग्रन्था यावन्यां रचिता गिरि ।
अद्यापि वर्त्तिनः सन्तो निपश्यन्ते मनीषिभिः ॥ ८३८ ॥

स यूसेब्यश्च भूयोभि र्ग्रन्थकारैः स्वकालिकैः ।
ह्यिरोनुमादिभिश्चापि पश्चाद्भूतैः प्रशस्यते ॥ ८३९ ॥
अतः स प्राक्तनोऽस्त्येव तद्ग्रन्थाश्च चिरन्तनाः ।
इत्यत्र पूर्ववृत्तज्ञा बुधाः शंकां न कुर्वते ॥ ८४० ॥
स स्वस्मात् प्राक् कृतान् नाना ग्रन्थान् संगृह्य सर्वतः ।
खिस्तीयलोकमण्डल्याश्चरित्राणि प्रणीतवान् ॥ ८४१ ॥
असौ च तत्कृतो ग्रन्थो दशसर्गान्वितो गिरि ।
यावन्यां रचितोऽद्यापि वर्त्तीं सन् पठ्यते बुधैः ॥ ८४२ ॥
स विद्वांस्तत्र धर्मस्य खिस्तीयस्य समुद्भवम् ।
येषूशिष्यैश्च संसारे कृतं तस्य प्रचारणम् ॥ ८४३ ॥
येषूभक्तैश्च तै र्भुक्तान् नाना क्लेशान् सहिष्णुभिः ।
खिस्तीयमूलशास्त्राणां तत्कृतानाञ्च विस्तरम् ॥ ८४४ ॥
नाना देशेषु धर्मस्य खिस्तीयस्य च विस्तृतिम् ।
तत्तत्खिस्तीयमण्डल्याश्चाध्यक्षाणां परम्पराम् ॥ ८४५ ॥
सर्वेषाञ्च प्रसिद्धानां खिस्तीयानां विपश्चिताम् ।
चरित्रं तत्प्रणीतानां ग्रन्थानाञ्च विशेषणम् ॥ ८४६ ॥
कृतं रौम्यैश्च सम्राड्भिः खिस्तीयानामुपद्रवम् ।
महापीडाभिरार्त्तानामपि तेषाञ्च धीरताम् ॥ ८४७ ॥
शनै र्जातञ्च धर्मस्य खिस्तीयस्य विवर्द्धनम् ।
इत्यादिविस्तरं स्वस्मिन् ग्रन्थे सम्यगवर्णयत् ॥ ८४८ ॥
मदुक्ताः क्षेमदिग्मात्यपङ्क्तार्पास्त्रयो बुधाः ।

ह्राद्रातपाप्ययुक्तीनास्तदन्ये च मनीषिणः ॥ ८४९ ॥
ऐरेणायादयश्चान्ये खिस्तीया ग्रन्थकारिणः ।
स्मर्य्यन्ते तेन विज्ञेन यूसेब्येन विशेषतः ॥ ८५० ॥
स तेषां देशकालादिविस्तरेण विशेषिताम् ।
वार्त्तां प्रासङ्गिकीं काश्चिद् ग्रन्थे स्वस्मिन्नवर्णयत् ॥ ८५१ ॥
तस्मादमी कदा कुत्र कीदृशाश्चाभवन् समे ।
कान् ग्रन्थांश्चालिखन्नित्यं विशेषेणावधार्य्यते ॥ ८५२ ॥
खिस्तीयग्रन्थकाराणां ग्रन्थेभ्यश्चोद्धृतानि सः ।
प्रासङ्गिकानि वाक्यानि ग्रन्थे स्वस्मिन्नतिष्ठिपत् ॥ ८५३ ॥
अतः पुरातनान् ग्रन्थान् पर्य्यालोच्य यथामति ।
असौ खिस्तीयमण्डल्याः कथां तथ्यामवर्णयत् ॥ ८५४ ॥
यावन्तः साम्प्रतं ग्रन्थाः खिस्तीयागमसंग्रहे ।
अन्तःस्थाः सन्ति सर्वेषां तेषामाह स विस्तरम् ॥ ८५५ ॥
किं केन खिस्तशिष्येण मूलशास्त्रमरच्यत ।
इत्यत्र ग्रन्थकाराणां प्राचामैतिह्यमाह सः ॥ ८५६ ॥
तत्रादौ तु स यूसेब्यः सुसंवादचतुष्टयम् ।
प्रत्नं प्रामाणिकञ्चाह येषूद्भूतादिभिः कृतम् ॥ ८५७ ॥
यो येषूद्भूतवृत्तान्तश्चास्ति तच्छास्त्रसंग्रहे ।
तं ग्रन्थमप्यसौ प्रत्नं मेने लूकेन निर्मितम् ॥ ८५८ ॥
पौलप्रणीतपत्त्रीणां विषये च यदाह सः ।
तद् अत्रोद्धृत्य तद्ग्रन्थाद् व्याकरोमि समासतः ॥ ८५९ ॥

यथा ॥ यूसेब्य उवाच ॥

व्यक्ताः स्पष्टाश्च पौलस्य सन्ति पञ्चचतुर्दश ॥

रौम्या तु मण्डली पत्रीम् इब्रीयान् प्रति लेखिताम् ।

पौलीयां नह्यमंस्तेति प्रोच्य केचित् त्यजन्ति ताम् ॥ ८९० ॥

प्राचीना ग्रन्थकारास्तु यत् तस्या विषयेऽवदन् ।

अहं तद् दर्शयिष्यामि यथावेलमितः परम् ॥ ८९१ ॥

सत्यार्थुवाच ॥

ततोऽलेक्षन्द्रियास्थस्य क्लेमतो विस्तरं वदन् ।

मतं स तस्य विज्ञस्य तस्मिन्पे र्विषयेऽब्रवीत् ॥ ८९२ ॥

यथा ॥ यूसेब्य उवाच ॥

इब्रीयोक्तौ स तां पत्रीमाह पौलेन कल्पिताम् ।

किन्तु व्याकृत्य लूकेन यवनेषु प्रचारिताम् ॥ ८९३ ॥

सत्यार्थुवाच ॥

तां पत्रीमुद्दिश्यन् पूर्वमुक्तस्त्वोरिगिणि र्बुधः ।

मतं यदाह तत्सारो यूसेब्योद्धृत उच्यते ॥ ८९४ ॥

यथा ॥ यूसेब्योद्धृते स्थले ओरिगिणिरुवाच ॥

अहं तु तस्मिन्पेरर्थं पौलात् प्राप्तं वितर्कये ।

तदीयावुक्तिविन्यासौ कृतावन्येन केनचित् ॥ ८९५ ॥

अतश्चेत् पत्रिकामेतां कापि खिस्तीयमण्डली ।

पौलीयां मन्यते तर्हि सा प्रशंसनमर्हति ॥ ८९६ ॥

सा पौलीयेति पूर्वेषां नास्ति ह्याकस्मिकी कथा ।

तां कस्तु वस्तुतश्चक्रे जानातीश्वर एव तत् ॥ ८६७ ॥

सत्यार्थ्युवाच ॥

इब्रीयान् प्रति नुन्नाया लिपेरस्यास्तु विस्तरम् ।

अन्यं न वक्तुमिच्छामि यतो नास्ति प्रयोजनम् ॥ ८६८ ॥

पौलादन्येन सा पत्री चक्रे इत्यपि सम्मते ।

तथापि नापतेद् हानिरस्मद्धर्मस्य साधने ॥ ८६९ ॥

येषां क्षतिः पौलीया हि न प्रत्नैः समदिह्यत ।

ईदृच्छा भूरयः पत्र्यः सन्ति नः शास्त्रसंग्रहे ॥ ८७० ॥

तामेकां लिपिमुद्दिश्य पूर्वं यत् समशेरत ।

ततोऽसन्दिग्धपत्रीणां दृढा पुष्टिः प्रजायते ॥ ८७१ ॥

तस्माच् चिरन्तना विज्ञाः खिस्तीया हि परीक्षणात् ।

न चाकस्मात् स्वशास्त्रेषु व्यश्वसन्निति बुद्ध्यते ॥ ८७२ ॥

परीक्षया विना चेत्ते शास्त्राणां सप्रमाणताम् ।

अमंस्यन्त कुतोऽमुष्यां समधेक्ष्यंस्तदा लिपौ ॥ ८७३ ॥

यद् यूसेब्योऽवशिष्टानां शास्त्राणां विषयेऽवदत् ।

तदीयमत्र सारांशं संक्षिपन् व्याकरोम्यथ ॥ ८७४ ॥

यूसेब्य उवाच ॥

ततः क्रमेण योहन्नेः कीर्त्तिता लिपिरादिमा ।

वक्तव्या किञ्च पेत्रस्य स्वीकर्त्तव्या तथा लिपिः ॥ ८७५ ॥

एवं रोचेत चेत्तर्हि पुनस्ताभ्यामनन्तरम् ।

योहन्ने र्भव्यवार्त्तानामाविष्कारो निधीयताम् ॥ ८७६ ॥

यतस्तत् प्रोदितं शास्त्रं न स्वीकुर्वन्ति केचन ।
तत् स्थापयन्ति शास्त्राणां स्वीकृतानां गणेऽपरे ॥ ८७७ ॥
अस्वीकृतेषु गण्येते लिपी याकोबयूदयोः ।
द्वितीया चैव पेत्रस्य द्वे योहन्नेश्च पश्चिमे ॥ ८७८ ॥

सत्यार्थ्युवाच ॥

प्रोक्तांस्तानन्तरा ग्रन्थान् खिस्तीयागमसंग्रहम् ।
कृत्स्नं प्रामाणिकं मेने प्रत्ना खिस्तीयमण्डली ॥ ८७९ ॥
सुसंवादा हि चत्वारः पौलपत्र्यस्त्रयोदश ।
योहन्निपेत्रयोः पत्र्यौ स्वीकृतास्तर्ह्यविंशत ॥ ८८० ॥
चिरात् खिस्तीयमण्डल्या स्वीकृतैरागमैस्तु तैः ।
सम्यक् खिस्तीयधर्मस्य साधिताऽस्तीश्वरोक्तता ॥ ८८१ ॥
प्रत्नैश्च यानि शास्त्राणि समदिह्यन्त कैश्चन ।
अन्ये प्रामाण्यमेतेषामपि स्वीचक्रिरे बुधाः ॥ ८८२ ॥
प्राक् सन्दिग्धास्तु ते ग्रन्थाः पौलपेत्रादिभिः कृताः ।
आसन् न वेति निर्णेतुमत्र नावश्यकं भवेत् ॥ ८८३ ॥
परन्तु तत्त्वमेतस्य भवांश्चेद् निश्चिचीषति ।
तदा ग्रन्थेष्वनेकेषु तद्विचारमवाप्स्यति ॥ ८८४ ॥
तथा सुधीः स यूसेब्यः खिस्तीयागमसंग्रहम् ।
उद्दिश्य यद् वदत्यस्य सारमत्र समर्प्यते ॥ ८८५ ॥
परन्तु विस्तरेणालम् आ यूसेब्याद् महाऽऽवधिः ।
खिस्तीयग्रन्थकाराणां सन्तताऽस्त्यधुनावधि ॥ ८८६ ॥

तेषां वार्त्तां प्रसिद्धानां नाहं वक्ष्यामि सम्प्रति ।
जिज्ञासुरस्ति चेत्तर्हि भवानन्यत्र पश्यतु ॥ ८८७ ॥
इयन्मात्रन्तु वक्तव्यं तेषां ग्रन्थेषु विस्तरः ।
खिस्तीयमूलशास्त्राणामुद्दिष्टोऽस्ति सहस्रशः ॥ ८८८ ॥
प्रोक्तानां ग्रन्थकाराणां मध्ये केचन विस्तृताः ।
अमीषां मूलशास्त्राणां टिप्पणी निरमासिषुः ॥ ८८९ ॥
क्रमेण तासु टीकासु प्राचीनासु समुद्धृताः ।
खिस्तीयमूलशास्त्राणां व्याक्रियन्ते सदुक्तयः ॥ ८९० ॥
बुधैः खिस्तीयशास्त्राणां व्याकाराय तु ये समे ।
ग्रन्थाः प्रणिन्यिरे तेषां गणना दुष्करा भवेत् ॥ ८९१ ॥
तथाचाऽमूलशास्त्राणां खिस्तीयानां समुद्भवात् ।
अद्यापि निरन्तरा विज्ञ तन्यते ग्रन्थकारिणाम् ॥ ८९२ ॥
अमीषामादिमाद् ग्रन्थात् समारभ्याधुनावधि ।
खिस्तीयधर्मतत्त्वानां चर्चा सर्वेषु दृश्यते ॥ ८९३ ॥
अतोऽचिरेऽन्तरे येभ्यः स्वर्गमात् परतो गते ।
कृतिः खिस्तीयशास्त्राणां बभूवेत्यवधार्य्यते ॥ ८९४ ॥
यादृक्षश्चाधुना तेषु ग्रन्थेष्वर्थो विलोक्यते ।
आदौ स एव तेभ्यासीदिति निश्चीयते स्फुटम् ॥ ८९५ ॥
तात्कालिक्यां कृतौ तेषां साधितायान्तु सत्यता ।
तदन्तर्वर्त्तिनोऽर्थस्य सिद्धतीति न संशयः ॥ ८९६ ॥
यतश्चेदन्यतः कोपि वृत्तान्तस्तेभ्यवेत्स्यत ।

तदा येषूद्विषस्तेषामकरिष्यन् निराकृतिम् ॥ ८९७ ॥
मया तु यत् पुरैतस्य कृतमस्ति प्रपञ्चनम् ।
भवद्भिस्तच्छ्रुतं सर्वं पुनरुक्तेन किं फलम् ॥ ८९८ ॥

वेदविद्दानुवाच ॥

श्रीयेभ्यः स्वर्गमात् पश्चाद् आदौ तद्विषये कथाम् ।
ग्रन्थेष्वनर्पितां शिष्याः स्मृत्या प्राचीचरन् भुवि ॥ ८९९ ॥
तत्स्वर्गारोहणात् पश्चाच् चतुस्त्रिंशत्समान्तरे ।
व्यतीते तच्चरित्राणि त्रीणि ग्रन्थत्वमाप्नुवन् ॥ ९०० ॥
पुनस्तत्स्वर्गमात्पश्चाद् गतेष्वब्देषु सप्ततौ ।
तुर्यो येभ्वश्चरित्रस्य प्रबन्धः समरच्यत । ९०१ ॥
इत्येतद् भवता प्रोक्तं स्वप्नास्त्रोत्पत्तिवर्णनम् ।
एतर्हि ध्यायतश्चित्ते संशयोऽयमुदेति मे ॥ ९०२ ॥
येभ्वश्चरित्रमादौ चेद् न ग्रन्थेषु समार्प्यत ।
तदा यथातथं सर्वं केन रूपेण सस्मरे ॥ ९०३ ॥
व्यतीते त्वन्तरे दीर्घे येभ्वः शिष्याः स्मृते भ्रमात् ।
तथ्यां न व्यस्मरन् वार्त्तामिति निश्चीयते कथम् ॥ ९०४ ॥
उताहु पक्षपातेन ते विभूतिं निजे गुरौ ।
मृषा नारोपयामासुरिति केन प्रमीयते ॥ ९०५ ॥
भ्रमाद् वा पक्षपाताद् वा जातु लोका महात्मसु ।
अत्युक्तिमाचरन्तीति स्वयमग्रेऽब्रवीद् भवान् ॥ ९०६ ॥
अत्युक्त्या मागधादीनां रामकृष्णौ प्रकीर्त्तितौ ।

तथा देवत्वमारोहन्निति चोचे विशेषतः ॥ ६०७ ॥
चेदेवं देवताबुद्धिरुत्पेदे रामकृष्णयोः ।
तर्ह्यत्युक्त्यैव माहात्म्यं किं न येष्वोऽप्यकल्प्यत ॥ ६०८ ॥
येष्वो या दैविकी शक्तिः सुसंवादेषु कथ्यते ।
तद्वार्त्तां तस्य भक्तानामाग्रहाद् नाजनिष्ट किम् ॥ ६०९ ॥

सत्यार्थुवाच ॥

भवान् यान् संशयान् सर्वान् उक्तवानस्ति सम्मति ।
तेषामिदं मया कार्य्यं समाधानं निशाम्यतु ॥ ६१० ॥
ये येष्वोऽपौरुषेयाणां कर्मणां साक्षिणोऽभवन् ।
अमी कदापि तद्वार्त्तां न विस्मर्त्तुमशक्नुवन् ॥ ६११ ॥
तान्याश्चर्य्याणि कर्माणि ये ह्यपश्यंश्चमत्कृताः ।
तद्धृत्सु तत्कथा नित्यं तस्थौ लोम्नुश्च नाशकत् ॥ ६१२ ॥
अमीषां साक्षिणां मध्ये द्वौ तु येष्वोऽनुगौ स्वयम् ।
प्रोक्तौ योहन्निमात्यायौ सुसंवादौ प्रणिन्यतुः ॥ ६१३ ॥
अतस्तौ साक्षिणौ भूत्वा श्रीयेष्वोऽद्भुतकर्मणाम् ।
तद्वार्तां सम्यगः सम्यग् यावज्जीवं न संशयः ॥ ६१४ ॥
तस्मात् तौ यानि वृत्तानि ग्रन्थयोरुचतुः स्वयोः ।
न तत्र मन्मतौ भ्रान्तेः कापि सम्भावना भवेत् ॥ ६१५ ॥
श्रीयेष्वः स्वर्गमात् पश्चाद् वीते कस्मिंश्चिदन्तरे ।
सुसंवादा व्यरच्यन्त तदङ्गीकृतवान् अहम् ॥ ६१६ ॥
परन्तु तत्कृतेः पूर्वं येषूवृत्तान्तवर्णने ।

अन्ये ग्रन्था बुधैरन्यै र्व्यरच्यन्तेति बुध्यते ॥ ६१७ ॥
सुसंवादस्य लूकेन कृतस्यादौ परैःकृताः ।
प्रबन्धाः केचिदुच्यन्ते येषूदृत्तान्तवाचकाः ॥ ६१८ ॥
अतोऽचिरेऽन्तरे येभ्यः सर्गमात् परतो गते ।
तत्कर्मविस्तरःकैश्चिद् व्यरचीति वितर्कये ॥ ६१९ ॥
कृता विद्वद्भिरज्ञातैः श्रीयेभ्यः समकालिकैः ।
इदानीं तेऽग्रिमा ग्रन्थाः सर्वे लोपमयासिषुः ॥ ६२० ॥
सुसंवादाभिधान् अन्यान् ग्रन्थान् प्रामाणिकान् यदा ।
मात्यायपूर्वकाश्चक्रु स्तदाऽन्यैः किं प्रयोजनम् ॥ ६२१ ॥
प्रबन्धकारिणस्ते हि सर्वे मात्यायपूर्वकाः ।
येभ्यः कथां विनिश्चित्य सम्यक् तथ्यामवर्णयन् ॥ ६२२ ॥
तन्मध्ये द्वौ हि योहन्निमात्यायौ साक्षिणौ स्वयम् ।
भूत्वा येभ्यश्चरित्राणां सम्यक् तत्त्वमवेदिषुः ॥ ६२३ ॥
श्रीयेभ्यो मार्कलूकौ तु न सन्तौ सङ्क्रिनावपि ।
तदृत्ततत्त्वमन्येषां पार्श्वाज् ज्ञातुमशक्नुवन् ॥ ६२४ ॥
तथाच साक्षिणां हृत्सु प्रबन्धेष्वपि चार्पिता ।
श्रीयेभ्यस्तात्त्विकीवार्त्ता न विस्मर्त्तुमशक्यत ॥ ६२५ ॥
येभ्यो विभूतिमत्युक्त्या तच्छिष्याः पक्षपातिनः ।
मृषा प्रकल्पयामासु रिति चाभ्यङ्क्ते भवान् ॥ ६२६ ॥
भवांस्तु चेदिमं वादं वक्ष्यमाणं विचारयेत् ।
भावत्के मानसे तर्हि संशयोऽयं विलोप्स्यति ॥ ६२७ ॥

येषूत्थितस्य वेलायां भुवः पश्चाद्दिशि स्थिताः ।
मनुष्या धर्ममुद्दिश्य व्यभिद्यन्त द्विधा समे ॥ ९२८ ॥
सत्येश्वरार्चिनामेको गण आसीद् यङ्कदिनाम् ।
गणोऽन्यो यवनादीनां मिथ्यादैवतमानिनाम् ॥ ९२९ ॥
यङ्कदिनस्तु शास्त्राणि महाचार्य्यैः स्वदेशजैः ।
आदिष्टानीश्वरीयाणि दृढ्या पूजयाऽभजन् ॥ ९३० ॥
प्रत्नेषु तेषु शास्त्रेषु महात्मातु भंविष्यतः ।
प्रतिज्ञां प्राप्य ते तस्य सदा चक्रुः प्रतीक्षणम् ॥ ९३१ ॥
असौ तु तारको दिव्यं प्रादुष्कृत्य पराक्रमम् ।
अस्माकमन्वयं दास्यादुद्धरेदिति ते मंतम् ॥ ९३२ ॥
येषूस्तु लौकिकं राज्यं न संस्थाप्य प्रतीक्षितम् ।
सद्धर्मराज्यमात्रस्य स्थापनार्थमचेष्टत ॥ ९३३ ॥
स लोकान् रोमिणां दास्यात् स्वंशीयाननुद्धरन् ।
पापात्तांस्तानधर्मस्य बलादुद्धर्त्तुमैहत ॥ ९३४ ॥
दास्येन पापानस्ते तु सन्तुष्यन्तो यङ्कदिनः ।
न तस्मादुद्धृतिं प्रैक्षन् श्रेष्ठे शर्मण्युदासिनः ॥ ९३५ ॥
येषूश्च यन्मतं नूनं प्रावर्त्तत् तदप्यमी ।
अज्ञानात् प्रत्नशास्त्राणां प्रतिकूलमंसत ॥ ९३६ ॥
अतो दुराग्रहाविष्टाः प्रायो मुख्या यङ्कदिनः ।
येष्वोऽतिमानुषां शक्तिं कलाद् निक्षेतुमैषिषुः ॥ ९३७ ॥
श्रीयेषूं प्रत्यमीषां तु कीदृगासीद् दुराग्रहः ।

अदां पुराऽस्य दृष्टान्तं जन्मान्धस्य कथां ब्रुवन् ॥ ६३८ ॥
अतश्चेदन्धता वार्त्ता सुसंवादेष्ववेत्यत।
श्रीयेष्वः प्रत्यवस्ते तामखण्डिष्यंस्तदा मुदा ॥ ६३९ ।
आदौ च ये यहूदीया येष्वः शिष्यत्वमाश्रयन् ।
राज्यं तेऽप्यैहिकं तेन स्थापनीयममंसत ॥ ६४० ॥
अस्मिन् प्रतीक्षणे तेषां सफले तु न सत्यपि।
ते येष्वः शिष्यतां नैज्झंस्तच्चेदं विद्धि कारणम् ॥ ६४१ ॥
येषूः प्रतीक्षितं राज्यं नावस्थाप्यापि लौकिकम्।
तथाप्यपौरुषेयाणि महाकर्माण्यदर्शयत् ॥ ६४२ ॥
तै स्तस्य कर्मभिर्दिव्यैरमी शिष्याः प्रवर्त्तिताः ।
दुराग्रहोज्झिताः सन्तस्तस्य सेवां न तत्यजुः ॥ ६४३ ॥
अतो भंक्षारमाज्ञानामपि ते यन्न तं जजुः ।
न तस्मिन्नाग्रहो हेतुः किन्तु तस्य विभूतयः ॥ ६४४ ॥
तदीयां यो हि तामाज्ञां विफलीकृतवांस्तथा।
तं येषूं पक्षपातेन ते न द्रष्टुमशक्नुवन् ॥ ६४५ ॥
आदौ च ये जना नूनं येष्वः पश्चानमन्वगुः ।
ते तस्माद् नैहिकं शर्म्म किन्तुं क्लेशमभुञ्जत ॥ ६४६ ॥
येष्वोऽनुयायिनां वृद्धिं प्रधाना हि यहूदिनाम्।
दृष्ट्वा शिष्यान् दृढै र्दंण्डै र्विविधैरुपदुद्रुवुः ॥ ६४७ ॥
काराबन्धेन ते कांश्चित् कशाघातेन चापरान् ।
अन्यांश्च प्राणघातेन दण्डयन्ति स्म निष्ठुराः ॥ ६४८ ॥

शक्तिं चेन्नैश्वरीं येषि निरचेष्यन् समर्पिताम् ।
ते शिष्यास्तर्हि तं क्लेशं नैवाभोक्ष्यन्त तत्कृते ॥ ६४६ ॥
अमी येष्वस्चरित्राणां तत्त्वं सम्यगवेदिषुः ।
तदीयकर्मणां केचित् साक्षिणः स्वयमासत ॥ ६५० ॥
अतः सोऽपौरुषेयाणि महाकर्माणि वस्तुतः ।
अकार्षीदुत नाकार्षीदिति ते साध्वबोधिषुः ॥ ६५१ ॥
येषूक्तु यत्पुरे द्विड्भिर्यद्धृदीयैरहन्यत ।
तत्रैव दैविकीं शक्तिं सद्यस्तेऽस्याचचक्षिरे ॥ ६५२ ॥
क्रियाणां साक्षिणो यासामाश्चर्य्याणां बभूविम ।
तासां प्रचारणाऽवश्यं करणीयेति तेऽब्रवन् ॥ ६५३ ॥
श्रीयेषि स्वर्गते तस्य शिष्याः सद्योऽन्तरं विना ।
अपौरुषेयशक्तित्वं तस्य प्रोचुरिति स्फुटम् ॥ ६५४ ॥
यतस्ते आदितः स्वीयं प्रभुं तादृशशक्तिकम् ।
अवोचन्निति सर्वत्र सुसंवादेषु कथ्यते ॥ ६५५ ॥
कथा या त्वेतदुद्देशे तेषु शास्त्रेषु तिष्ठति ।
सा विश्वास्येति मे हेतो र्वक्ष्यमाणात् प्रतीयते ॥ ६५६ ॥
देशे यद्दिनां येषू स्तदीयाश्चानुयायिनः ।
उत्पद्य तत्र तं धर्मं प्राववर्त्तन्त नूतनम् ॥ ६५७ ॥
तद्देशशासितारस्तु सन्तो येषां विरोधिनः ।
तद्धर्मविस्तृतिं रोद्धुं समैहन्तेत्यवादिषम् ॥ ६५८ ॥
आद्यास्त्रयः सुसंवादा यस्मिन् काले प्रणिन्यिरे ।

तदा येषूद्विषो लोका भूरयो भुव्यजीविषुः ॥ ९५९ ॥
अमी हि यौवने येष्वो भूत्वाऽऽदौ समकालिकाः ।
तत्स्वर्गमात्यरं दीर्घं कालं भूमावयापयन् ॥ ९६० ॥
समानकालिकास्ते तु येष्वो भूत्वा स्वयौवने ।
तद्धर्मोत्पत्तिवृत्तान्तं सर्वं सम्यगबोधिषुः ॥ ९६१ ॥
येषूद्दिश्य तच्छिष्याः काम् आदावदन् कथाम् ।
इत्येतत् तैः समै र्ज्ञातमासीद् येषूविरोधिभिः ॥ ९६२ ॥
अतो येष्वोऽनुगास्तस्य विषये प्रथमां कथाम् ।
विकृत्यान्यामवक्ष्यंश्चेत्तर्ह्यज्ञास्यन्नमी द्विषः ॥ ९६३ ॥
अपौरुषेयभक्तित्वं येष्वो नोक्ताऽनुगाः पुरा ।
पश्चात् प्राचारयिष्यंश्चेत्तर्हि द्विड्भिरभोत्स्यत ॥ ९६४ ॥
येषूक्तिष्योक्तयो स्तादृक् प्रथमान्तिमवार्त्तयोः ।
प्रातीप्यं प्राप्य तेऽमीषामखण्डिष्यंश्छलं द्विषः ॥ ९६५ ॥
कथां चेदादिमां त्यक्ता परां येष्वोऽनुगा नवाम् ।
सुसंवादेष्वलेखिष्यंस्तच्छलं तर्ह्यभंक्ष्यत ॥ ९६६ ॥
तथा हि सत्यमी येष्वः प्रतिकूला यदूदिनः ।
तच्छिष्याणां छलं तादृग् व्याञ्जयिष्यन्न संशयः ॥ ९६७ ॥
अतो येष्वोऽनुगा यां प्रागूचु स्तद्विषये कथाम् ।
सुसंवादेषु तामेव तेऽलिखन्निति तर्कये ॥ ९६८ ॥
तथाचापौरुषेयाणां कथा खिस्तस्य कर्मणाम् ।
सुसंवादोदिता विद्वन् सम्यग् विश्वासमर्हति ॥ ९६९ ॥

विभूतिवर्णनोद्देशे सुसंवादचतुष्टयम् ।
मुहम्मोदिताच्छास्त्रादतिमात्रं विशिष्यते ॥ ६७० ॥
स्वयं मुहम्मदः शास्त्रं कुराणाख्यं यदुक्तवान् ।
तत्रातिमानुषं कर्म स नोवाचात्मना कृतम् ॥ ६७१ ॥
अपौरुषेयशक्तित्वं मयि नास्तीति कुत्रचित् ।
तस्मिन् स्वप्रोदिते शास्त्रे स्वीचकार मुहम्मदः ॥ ६७२ ॥
अपौरुषेयकर्माणि कर्त्तुमीहेय चेदहम् ।
तदा मे शक्तिहीनत्वं प्रकाशेतेत्यवेद् असौ ॥ ६७३ ॥
अतो यद्यप्यसौ स्वीयं शास्त्रमैश्वरमब्रवीत् ।
तथापि दैविकीं शक्तिं स्वस्यां वक्तुं स नाशकत् ॥ ६७४ ॥
वीते तु तन्मृतेः पश्चात् काले तस्यानुयायिनः ।
अपौरुषेयसामर्थ्यं तस्मिन्नारोपयन् मृषा ॥ ६७५ ॥
किन्त्वस्मिन्विषये येषू र्मिथ्याचार्य्याद् मुहम्मदात् ।
कीदृग् व्यशिष्यतेत्येतद् इदानीमवधीयताम् ॥ ६७६ ॥
येषूर्हि सर्वदा लोकैः स्वदेशीयैः सहालपन् ।
स्पष्टत्वेनैश्वरीं शक्तिमुवाचात्मनि निष्ठिताम् ॥ ६७७ ॥
भवांस्तु तत्त्वमेतस्य निश्चेतुं येन शक्नुयात् ।
तदर्थमस्य दृष्टान्तौ द्वावेतर्हि वदाम्यहम् ॥ ६७८ ॥
श्रीयेषूमेकदा केचिद् वेष्टमाना यदृच्छदिनः ।
तत्त्वाबुभुत्सवः सन्तस्तं प्रत्येवमभाषयन् ॥ ६७९ ॥

योऽहन्निरचितसुसंवादीयदृश्यमाध्यायेोक्ता यद्धदिन ऊचुः ॥

त्वं किं पर्य्यन्तमस्माकं मनः सन्देहयेस्तथा ।

चेदीश्वराभिषिक्तोऽसि तर्हि नः कथय स्फुटम् ॥ ९८० ॥

सत्यार्थ्युवाच ॥

तेषां विश्वासहीनानां प्रश्नमाकर्ण्य तादृशम् ।

श्रीयेषूश्चित्तमंशुस्तर्ज्जयन् प्रत्यभाषत ॥ ९८१ ॥

श्रीयेषूरुवाच ॥

अहं वः प्रोक्तवानस्मि मदुक्तौ न प्रतीथ तु ॥

पितु र्निजस्य नाम्नाऽहं यानि कर्माणि साधये ।

ममामून्येव कर्माणि साक्ष्यं मां प्रति कुर्वते ॥ ९८२ ॥

सत्यार्थ्युवाच ॥

पुनः केचिज्जना येषूं प्रति सन्देहसंयुताः ।

अमुष्य पार्श्वमागत्य प्रश्नमेतमकुर्वत ॥ ९८३ ॥

मात्थ्यायप्रणीतसुसंवादीयैकादशसर्गोक्ता जना ऊचुः ॥

आयास्यन् यः पुमानासीत् किं त्वमेव स विद्यसे ।

उताहो वयमर्हामः कमप्यन्यं प्रतीक्षितुम् ॥ ९८४ ॥

सत्यार्थ्युवाच ॥

प्रश्नं निशम्य तै स्तर्हि कृतं सन्देहशालिभिः ।

श्रीयेषूरुत्तरं तस्य स्पष्टमेतदभाषत ॥ ९८५ ॥

श्रीयेषूरुवाच ॥

स्वदृष्टिं प्राप्नुवन्त्यन्धा गतेः शक्तिञ्च पङ्गवः ।

लभन्ते कुष्ठिनः शुद्धिं बधिराश्च जनाः श्रुतिम् ॥ ९८६ ॥
प्राणा मृतैरवाप्यन्ते सुसंवादः प्रचार्य्यते ।
धन्यश्चासौ पुमानस्ति न विरज्येत यो मयि ॥ ९८७ ॥

सत्यार्थुवाच ॥

तयोक्तु वाक्ययो र्ध्यानात् श्रीयेषूः भक्तिमैश्वरीम् ।
स्वस्मिन्निष्ठां सदा स्पष्टमुवाचेति प्रतीयते ॥ ९८८ ॥
सदा स त्वैश्वरीं भक्तिं स्वस्मिन् निष्ठां ब्रुवन् न चेत् ।
व्यधास्यत् कर्म्मभिर्व्यक्तां तर्ह्ययास्यत् स ह्रास्यताम् ॥ ९८९ ॥
अतः सोऽपौरुषेयाणि नाना कर्म्माण्यसाधयत् ।
इत्यत्र कोपि सन्देहो विज्ञैः कर्त्तुं न युज्यते ॥ ९९० ॥
किन्त्वत्र संशयो येन न तिष्ठेद् भवतो हृदि ।
तदर्थं श्रूयतामन्यदस्य किञ्चन साधनम् ॥ ९९१ ॥
श्रीयेषूखिस्तदूतानां चरितानि यथातथम् ।
निश्चित्य लूकनामैको विबुधः पुस्तकेऽलिखत् ॥ ९९२ ॥
ग्रन्थश्च तत्कृतः प्रत्नः खिस्तीयागमसंग्रहे ।
अद्याप्यन्तःस्थितोऽस्तीति मया पूर्व्वमकथ्यत ॥ ९९३ ॥
तस्मिन् ग्रन्थे त्वसौ लूकः पौलस्यानुचरः स्वयम् ।
वृत्तज्ञो विस्तरं तस्य चरित्राणामवर्णयत् ॥ ९९४ ॥
पौलः प्राक् कीदृशो भूत्वा पश्चाद् येष्वोऽनुगोऽभवत् ।
इत्यस्य संक्षिपन् सारं तद्ग्रन्थादुद्धराम्यथ ॥ ९९५ ॥
शुद्धे गोत्रे यहूदीये जातः पौलः स्वयौवने ।

स्वदेशीयानि शास्त्राणि पठित्वा पण्डितोऽभवत् ॥ ९९६ ॥
स्वे धर्म्मे पैतृकेऽत्यन्त मासक्तश्च चिरन्तनम् ।
परम्परागतमाचारमन्वतिष्ठत् स यत्नतः ॥ ९९७ ॥
परन्त्वविद्यया नूनं धर्म्मं येष्वा प्रवर्त्तितम् ।
स्वदेशीयस्य शास्त्रस्य प्रतिकूलममंस्त सः ॥ ९९८ ॥
अतस्तं नूतनं धर्ममस्वीकृत्य स्वयं युवा ।
येष्वोऽनुयायिनां वैरी बाधकश्च स भूतवान् ॥ ९९९ ॥
खिस्तीयधर्म्मनाशार्थञ्चेष्टमानो महोद्यमः ।
स नानोपद्रवैस्तस्य साधून् मन्तुनपीडयत् ॥ १००० ॥
शेषे त्वसौ विदेशस्थान् खिस्तीयान् धर्त्तुमुद्यतः ।
स्वस्माद्देशात् पदातीनां निकरेणान्वितो ययौ ॥ १००१ ॥
मार्गे तु तेषु गच्छत्सु मध्याह्ने ज्योतिरद्भुतम् ।
देदीप्यमान माकाशादकस्मात् परितोऽद्युतत् ॥ १००२ ॥
भानो र्भासोऽपि चक्षुष्ण तेनालोकेन पातितः ।
स पौलोऽन्धीकृतश्चाज्ञां येष्वः प्रापागतां दिवः ॥ १००३ ॥
स तस्य ज्योतिषो दृष्ट्या वाण्याः श्रुत्या च विस्मितः ।
नमेण चेतसा सद्यो येष्वो भक्तोऽनुगोऽभवत् ॥ १००४ ॥
येष्वा च स्वस्य धर्म्मस्य कीर्त्तनाय प्रचारकः ।
नियुक्तोऽतीव सोऽमुष्मिन् परिश्रश्राम कर्म्मणि ॥ १००५ ॥
तद्धर्मरोधिभिर्लोकैर्बाधितश्च मुहुर्मुहुः ।
असौ नानाविधान् क्लेशान् बुभुजे स्वप्रभोः कृते ॥ १००६ ॥

भवान् महात्मनस्तस्य कथां जिज्ञासते यदि ।
तदा पौलचरित्राख्ये ग्रन्थे पश्यतु विस्तरम् ॥ १००७ ॥
मनोऽत्र युज्यतां विद्वन् स पौलस्तादृशो भवन् ।
कथं मनः परावर्त्त्य येष्वो भक्तत्वमाददे ॥ १००८ ॥
यः खिस्तीयस्य धर्म्मस्य तिरस्कर्त्ताऽभवत् पुरा ।
तमेव धर्ममादर्त्तुमसौ कस्मात् प्रचक्रमे ॥ १००९ ॥
मान्यो यच्छदिनां मध्ये प्रत्नधर्मभृतां पुरा ।
कस्मात् तदन्तिके निन्द्यो भवितुं स्वीचकार सः ॥ १०१० ॥
यो येष्वः सेवकान् पूर्व्वं नानादण्डैरबाधत ।
कुतो येष्वः कृते क्लेशं सोढुं सोंऽग्यकरोत् स्वयम् ॥ १०११ ॥
येष्वोऽतिमानुषे भावे व्यश्वसिष्यद् दृढं न चेत् ।
तदा न तस्य शिष्यत्वमाश्रयिष्यत् कदापि सः ॥ १०१२ ॥
दृढेन चेत् प्रमाणेन स न प्रावर्त्तयिष्यत ।
तदाऽतिमानुषं येष्वो नैव भावममंस्यत ॥ १०१३ ॥
अतः सोऽपौरुषेयेण नीतः केनापि हेतुना ।
येष्वो भक्तो बभूवेति सुतरामनुमीयते ॥ १०१४ ॥
अतो यत् तादृशो भूत्वा पौलो येष्वोऽग्रहीद् मतम् ।
तस्मादमुष्य सत्यत्वं सन्मतस्य प्रतीयते ॥ १०१५ ॥
यस्तादृशेन रूपेण खिस्तीयं मतमाश्रयत् ।
सेहे च तत्कृते क्लेशानसौ विश्वासमर्हति ॥ १०१६ ॥
स्वार्थः किंवाऽऽग्रहो यस्य नासीद् मिथ्योक्तिकारकः ।

स कस्मै हेतवे मिथ्या प्रोच्य लोकान् प्रतारयेत् ॥ १०१७ ॥
स पौलो नीवृतः स्वस्मात् प्रस्थितो यवनं गतः ।
तत्रस्थान् मानुषान् धर्म्मं यैषवीयमशुश्रुवत् ॥ १०१८ ॥
ततस्तेषां चिरत्नानां यवनानां सुभूरयः ।
खिस्तीयमाश्रयन् धर्ममिति सुष्ठु प्रसिद्ध्यति ॥ १०१९ ॥
ते यत्तु तर्हि पौलोक्ते व्यश्वसन् यवना मते ।
ततोऽपि सत्यता तस्य सन्मतस्यानुमीयते ॥ १०२० ॥
यतः स्वे पैत्रके धर्मे प्रत्नास्ते यवना रताः ।
नाना देवांश्च देवीश्च रीतिवद् निषिषेविरे ॥ १०२१ ॥
हीना ये विद्यया त्वासंस्तेषु साधारणा जनाः ।
ते आदरेण भक्त्या च देवतावर्गमार्चिषुः ॥ १०२२ ॥
ये विद्वांसस्तु तेष्वासं स्ते स्वविद्याभिमानिनः ।
प्रायस्तां लौकिकीं पूजां मिथ्या मत्वाऽवमेनिरे ॥ १०२३ ॥
भयात्तु लौकिकीं रीतिमत्यक्त्वा देवतागणम् ।
ते भक्त्या बाह्ययाऽनर्चुर्मानस्या त्ववहेलया ॥ १०२४ ॥
स्वदेशीयेषु देवेषु न प्रतीत्य ह्यमी बुधाः ।
सर्व्वाणि तच्चरित्राणि परिहास्यान्यमंसत ॥ १०२५ ॥
ते ज्ञानान्वेषणे सक्ता यद्यत् सम्भावि मेनिरे ।
तत्तैव व्यश्वसन् प्रत्नं मतं सन्त्यज्य लौकिकम् ॥ १०२६ ॥
अतस्तेऽनाशुविश्वासा लोकाः पौलोदितं मतम् ।
सद्योऽपरीक्ष्य गृह्णीयुरित्यसम्भाविनी कथा ॥ १०२७ ॥

यवनास्ते च विद्वांसो मूर्खाश्चैवोभये तदा ।
जनान् यच्छदिवंश्चीयानवमत्या व्यलोकयन् ॥ १०२८ ॥
ये विद्वांसोऽभवन् लोकास्ते स्वज्ञानाभिमानिनः ।
अविज्ञानां यच्छद्यानां मतं तुच्छममंसत ॥ १०२९ ॥
सामान्या ये च देवेषु स्वकीयेष्वासजज्ञनाः ।
अप्रीत्या ते स्वदेवारीन् यच्छदीयान् व्यलोकयन् ॥ १०३० ॥
मतं खिस्तीयमादौ तु तद्देशे सुश्रुवे यदा ।
तदा न सम्यगज्ञासु र्यवनास्तस्य विस्तरम् ॥ १०३१ ॥
प्रत्नाद् यच्छदिनां धर्म्मादयं नूत्नो विलक्षणः ।
इत्येतत् ते हि नाजानंस्तत्वं ज्ञातुमुदासिनः ॥ १०३२ ॥
अतः पौलस्तु तद्देशे यदा येष्वोऽवदत् कथाम् ।
तदा दुराग्रहेणामी यवनास्तस्य सुश्रुवुः ॥ १०३३ ॥
तेषामेकेऽनदन्नेष वाचालः किं विवक्षति ।
अन्ये त्वेषोऽन्यदेशीयान् कीर्तयत्यमरानिति ॥ १०३४ ॥
तादृश्या प्रायशोऽप्रीत्या पौलस्योक्तीर्निशम्य ते ।
तेन प्रचारितं धर्म्मं नैच्छन्नाश्रयितुं नवम् ॥ १०३५ ॥
त्राणार्थिनश्च ये तस्य मनोयोगेन सुश्रुवुः ।
बहुं विचारमेतेऽपि कृत्वा तन्मतमाश्रयन् ॥ १०३६ ॥
प्रत्नं त्यक्त्वा हि ये धर्म्मं खिस्तीयं जगृहुर्नवम् ।
तान् प्रत्नधर्मधर्त्तारो प्रायोऽत्यन्तमनिन्दिषुः ॥ १०३७ ॥
निन्दां विनाऽपरान् क्लेशान् अपि येष्वोऽनुगा नवाः ।

येषूद्विषां स्ववंश्यानां द्वेषहेतोरभुञ्जत ॥ १०३८ ॥
अतश्चेत् ते नवा शिष्या मतं पौलोदितं दृढैः ।
प्रमाणैः साधितं नाप्स्यन् नाश्रयिष्यन्नदस्तदा ॥ १०३९ ॥
पौलस्य ह्यैहिको विद्वन् कोपि नासीत् पराक्रमः ।
महत्या संयुतश्चम्वा स न तं देशमाक्रमीत् ॥ १०४० ॥
तस्याल्पे सङ्गिनोऽभूवन्नस्त्रशस्त्रैरसज्जिताः ।
न चक्रुस्ते बलात्कारं स्वयं भूत्वा बलार्दिताः ॥ १०४१ ॥
प्रेम्णाऽऽर्ज्जवेन सत्येन भक्त्या चेश्वरदत्तया ।
न शस्त्रैर्लौकिकैः पौलो नरान् येष्वो वशेऽकरोत् ॥ १०४२ ॥
अपौरुषेयरूपाणि प्रमाणानि न चेदसौ ।
अदास्यत् तन्मते तर्हि न प्रत्यैष्यन्नमी जनाः ॥ १०४३ ॥
अपौरुषेयशक्तिस्तु तस्मिन् आर्ष्यत वस्तुतः ।
इत्यस्य सिद्धये विद्वन् प्रमाणान्तरमुच्यते ॥ १०४४ ॥
पौलो येष्वोऽनुगः पत्रे द्वे खिस्तीयाञ्जनान् प्रति ।
करिष्यस्थान् नुनोदेति मुक्तरुक्तं मया पुरा ॥ १०४५ ॥
अदो लिपिद्वयं प्रत्नं खिस्तीयागमसंग्रहे ।
अद्यापयन्तःस्थमस्तीति चाहं पूर्वमवर्णयम् ॥ १०४६ ॥
यथा च ग्रन्थकाराणां श्रेण्या पश्चाद्भुवां तयोः ।
लिप्योश्चिरत्नता सिद्धा भवतीत्यप्यदर्शयम् ॥ १०४७ ॥
अत्रावधीयतां विद्वन् यतो हेतोरिमे लिपी ।
पौलो लिलेख तस्यात्र कथां वक्ष्ये समासतः ॥ १०४८ ॥

ये खिस्तीया जनास्तस्मिन् करिष्याख्ये पुरेऽवसन् ।
नाना पक्षेषु ते भिन्ना व्यवदन्त परस्परम् ॥ १०४९ ॥
एकेऽन्यमन्यमन्ये हि कञ्चिदाश्रित्य शिक्षकम् ।
अन्ये तृतीयमाचार्य्यम् आग्रहेण सिषेविरे ॥ १०५० ॥
केचित्तु शिक्षकैर्धूर्त्तै र्नीताः पौलस्य मुख्यताम् ।
येष्वार्पितञ्च दूतत्वमपक्रोतुं चिचेष्टिरे ॥ १०५१ ॥
तथा तु केषुचित्तेषां सत्सु तस्य विरोधिषु ।
पौलस्तदीयशिक्षायै तल्लिपिद्वयमैलित् ॥ १०५२ ॥
तयोः स्वस्याधिकारस्य सोऽवमन्तुनतर्जयत् ।
तान् आचारस्य निन्द्यस्य शोधनायादिदेश च ॥ १०५३ ॥
अत्रावधीयतां विज्ञ द्वितीयायां लिपावसौ ।
अपौरुषेयसामर्थ्यमाह स्वेन प्रदर्शितम् ॥ १०५४ ॥
अपौरुषेयकर्म्माणि यानि तेषां पुरेऽकरोत् ।
तदुद्देशे लिपेरुक्तिं पुनरत्रोद्धराम्यथ ॥ १०५५ ॥

श्रीपौल उवाच ।

यथा ॥ प्रभोर्दूतस्य लक्ष्माणि शक्तिचिह्नविभूतयः ।
युष्मत्साक्षादसाध्यन्त मया धैर्य्येण भूरिणा ॥ १०५६ ॥

सत्यार्थुवाच ।

यांल्लोकान् प्रत्यसौ पौलः पत्रीं प्रेरितवानमूम् ।
तदेके तद्विषोऽभूवन्निति साध्ववधीयताम् ॥ १०५७ ॥
तथा तु सत्यसौ स्वस्य महिम्नो वर्द्धनाय चेत्।

मिथ्याऽवक्ष्यत् तदाऽऽपत्ति र्विपक्षै रकरिष्यत ॥ १०५८ ॥

अपौरुषेयकर्म्माणि साक्षात् स्वेन कृतानि चेत् ।

मृषाऽवक्ष्यत् तदा हास्यं तमज्ञास्यन् जडञ्च ते ॥ १०५९ ॥

तस्माच्च तादृशांल्लोकान् प्रति पत्नीं लिखन्नसौ ।

प्रयुञ्जीतायथार्थोक्तिमित्यसम्भावनी कथा ॥ १०६० ॥

इत्यादिकेन यौक्तस्य चरित्रेण प्रवर्त्तितः ।

अपौरुषेयकर्म्माणि मन्ये तेन कृतान्यहम् ॥ १०६१ ॥

अपौरुषेयशक्तिस्तु तस्यो येष्वोऽनुगे यदि ।

तदाऽहो किं पुनर्यैष्वि स्थितिस्तस्या न सम्भवेत् ॥ १०६२ ॥

वेदविद्वानुवाच ॥

येषूच्चेद् वस्तुतोऽन्धेभ्यो ददौ दृष्टिं तदा जनाः ।

पूर्वान्धास्तत्परं लोके दृष्टाः स्युर्नात्र संशयः ॥ १०६३ ॥

चेद्वा स कुष्ठिनोऽप्यावीत्तर्हि शुद्धीकृतेः कथा ।

तत्प्रान्तवासिभिर्लोकै र्ज्ञायेतेति स्वतः स्फुटम् ॥ १०६४ ॥

प्रेतान् सोऽजीवयच्चेद् वा ते सजीवीकृतास्तदा ।

जीवन्तस्तत्परं लोके विलोक्येरन्न संशयः ॥ १०६५ ॥

अतःपृच्छामि ते सर्वे येष्वा सुस्थीकृता जनाः ।

तत्पश्चाद् वस्तुतो सुस्था लोकेऽदृश्यन्त किं न वा ॥ १०६६ ॥

सत्यार्थ्युवाच ॥

येष्वा सुस्थीकृता लोकाः सुस्थीभूतेरनन्तरम् ।

ऐक्यन्त भूरिभि र्लोकैरिति जानातु निश्चितम् ॥ १०६७ ॥

एते सुस्थीकृता लोका नाद्रक्ष्यन्त हि चेत् परम् ।
तदा येष्वो द्विषोऽप्रक्ष्यन्नमी कुत्रानुपन्निति ॥ १०६८ ॥
तथा तु सत्यमी येष्वो द्विषस्तस्यानुयायिनाम् ।
विभूतिवादिनां व्याजं व्याज्ञयिष्यन् खनीदृति ॥ १०६९ ॥
ते येषूवैरिणो लोपं सुस्थीभूतगणस्य तु ।
कदापि नोचुरित्येतत् पुरावृत्तविदो विदुः ॥ १०७० ॥
येषूश्च याज्ञनान् सुस्थान् अकरोत् तद्गणान्तरे ।
संज्ञाः केषाञ्चिदुच्यन्ते सुसंवादेषु कुत्रचित् ॥ १०७१ ॥
स्थानेऽमुकेऽमुकं कर्म्म जघटे चातिमानुषम् ।
इत्यस्य विस्तरो भूयः सुसंवादेषु कथ्यते ॥ १०७२ ॥
यथाऽन्धो बार्त्तिमायाख्यो यरिखोपुरसन्निधौ ।
दृष्टिं येष्वाज्ञया प्राप्नोदिति मार्केण कथ्यते ॥ १०७३ ॥
यथा वा कस्यचित् पुत्री यैरसंज्ञस्य जीवनम् ।
येष्वो वाक्यादवापेति मार्कौ लूकोऽपि चाहतुः ॥ १०७४ ॥
यथा बेथानियावासी लाजारो वा पुमान् मृतः ।
येष्वाज्ञया सजीवोऽभूदिति योहन्निनोच्यते ॥ १०७५ ॥
तथा तु नामधामादेः निर्द्दिष्टे सति विस्तरे ।
सुसंवादोक्तवृत्तानां परीक्षा सुकराऽभवत् ॥ १०७६ ॥
अतश्चेत् वर्णना कापि सुसंवादेष्ववास्तवी ।
अस्थास्यत्तर्हि लोकास्तामखण्ड्यंस्तदातनाः ॥ १०७७ ॥
मदुक्तो जीवनप्राप्तो लाजारोऽसौ तु वस्तुतः ।

जीवन्नदृश्यतेत्येतदेवं योहन्निनोच्यते ॥ १०७८ ॥

योहन्निरुवाच ॥

येषूं यह्वदिनोऽनेके ज्ञात्वा तत्रस्थमागमन् ।

मृत्योरुत्थापितं तेन लाजारञ्च दिदृक्षवः ॥ १०७९ ॥

यज्वानस्त्वग्रिमा घातं लाजारस्याप्यकल्पयन् ।

तद्धेतोर्भूरयो येष्वि व्यश्वसन् हि यह्वदिनः ॥ १०८० ॥

सत्यार्थ्युवाच ।

श्रौयेभ्वः स्वर्गमात् पश्चादचिरे समये गते ।

पङ्गुं तस्यानुगावेकं सुस्थीचक्रतुरेकदा ॥ १०८१ ॥

तद्धेतोर्येष्वि विश्वासं कृतवत्सु च भूरिषु ।

लोकेष्वापेदिरे क्रोधं शासितारो यह्वदिनः ॥ १०८२ ॥

विभूतिकारकौ शिष्यौ समाहूय स्वसंसदि ।

येभ्वो नाम्नोऽप्रचाराय ते भृशं तानतर्ज्जयन् ॥ १०८३ ॥

तद्वार्त्तां वर्णयन् लूकः यह्वान् शासितॄनमून् ।

उद्दिश्येदं मयेदानीं वक्ष्यमाणं वचोऽब्रवीत् ॥ १०८४ ॥ यथा ॥

लूक उवाच ॥

तिष्ठन्तं तत्र दृष्ट्वा च जनं सुस्थीकृतं तदा ।

नाशकन्नुत्तरं दातुं शासितारो यह्वदिनः ॥ १०८५ ॥

सत्यार्थ्युवाच ।

मिथ्यार्थौ चेत्त्ववेत्स्येतां तौ वृत्तान्तौ मयोदितौ ।

तदा तत्खण्डनं लोकै र्वृत्तज्ञैरकरिष्यत ॥ १०८६ ॥

येष्वा सुस्थीकृतास्ते तु जीवन्तस्तत्परं चिरम् ।
अदृश्यन्तेति पूर्वोक्तः क्काद्रातोऽप्यवदत् सुधीः ॥ १०८७ ॥
पूर्वं तद्विषये वाक्यं यत् तस्योद्धृतवानहम् ।
भवद्भिस्तस्य सर्वोऽर्थो विचारेणावधीयताम् ॥ १०८८ ॥

वेदविद्वानुवाच ॥

अपौरुषेयकर्म्माणि यानि येषूरदर्शयत् ।
अमूनि वास्तवान्यासन्निति निश्चीयते कथम् ॥ १०८९ ॥
यथा सुस्थीकृतिर्येषां सुसंवादेषु कथ्यते ।
प्रागासन् वस्तुतस्तेऽन्धा इति किं तस्य साधनम् ॥ १०९० ॥
यथा वोज्जीवनं येषां युष्मच्छास्त्रेषु कीर्त्तितम् ।
अमीषां वास्तवो मृत्युः केन रूपेण साध्यते ॥ १०९१ ॥

सत्यार्थ्युवाच ॥

श्रीयेष्वोऽपौरुषेयाणां कर्म्मणां सत्यतां भवान् ।
निश्चेतुं शक्नुयात् सुष्ठु सुसंवादावलोकनात् ॥ १०९२ ॥
असावपौरुषेयाणि यानि कर्म्माण्यसाधयत् ।
एताभ्यां तानि लक्ष्मभ्यां व्यश्नियन्तेति बोधतु ॥ १०९३ ॥
दिव्यानि तानि कर्माणि नह्यसाध्यन्त गोपने ।
परन्तु साक्षिणामग्रे इति लक्षणमादिमम् ॥ १०९४ ॥
सर्वैश्च मानुषैस्तानि शक्यान्यासन् परीक्षितुम् ।
न मायारूपकाणीति द्वितीयं विद्धि लक्षणम् ॥ १०९५ ॥
दिनत्रयाद् मृतो लोको वस्तुतो जीवमाप्नवान् ।

उताहो नाम्नवानेतत् को न शक्तः परीक्षितुम् ॥ १०९६ ॥
यथा वा वस्तुतः कोपि जन्मान्धः प्रागभूद् न वा ।
दृष्टिं चापेात नापेति को विवेक्तुं न शक्नुयात् ॥ १०९७ ॥
एते तु लक्षणे यस्मिन्नतिमानुषकर्म्मणि ।
भवेतां तस्य सत्यत्वे संशयोऽनुचितो भवेत् ॥ १०९८ ॥
कीदृग् येष्वस्तु कर्म्माणि पर्य्याप्तन्त यच्छदिनः ।
अदः प्रागस्य दृष्टान्तं जन्मान्धस्य कथां वदन् ॥ १०९९ ॥
येष्वस्तु कर्म्मणां येन भवान् मन्येत सत्यताम् ।
तदर्थमत्र दृष्टान्तं ब्रुवे योहन्निनोदितम् ॥ ११०० ॥
मया तु वक्ष्यमाणेऽस्मिन्नतिमानुषकर्मणि ।
पुराप्रोक्ते अवाप्येते उभे सत्यत्वलक्षणे ॥ ११०१ ॥
तत् कर्म्म साक्षिणामग्रे सप्रकाशं ह्यसाध्यत ।
सर्वैश्च तस्य सत्यत्वं शक्यमासीत् परीक्षितुम् ॥ ११०२ ॥
येषाञ्च साक्षिणामग्रे येषूत्तामकरोत् क्रियाम् ।
तन्मध्ये केचनामित्रा स्तस्यासन्निति बुध्यते ॥ ११०३ ॥
अथो लाजारसंज्ञस्य पुंसः प्रेतस्य कस्यचित् ।
येष्वा सञ्जीवितस्येयं श्रूयतामद्भुता कथा ॥ ११०४ ॥
बेथानियाभिधे ग्रामे वासी येष्वः प्रियो जनः ।
लाजारनामकः साधुरेकदाऽभवदातुरः ॥ ११०५ ॥
निजस्य रोगिणो भ्रातु र्दुर्गते र्ज्ञापनाय तु ।
स्वसारौ तस्य सन्देशमनुत्सातां प्रभुं प्रति ॥ ११०६ ॥

इमं सन्देशमाकर्ण्य तेषु त्रिष्वपि वत्सलः ।
येषू र्नं तत्वरे गन्तुं व्याहरत्त्वेवमस्फुटम् ॥ ११०७ ॥

श्रीयेषूरुवाच ।

न लाजारस्य मृत्यर्थमामयोऽयमजायत ।
महिम्नो दर्शनार्थाय त्वीश्वरेश्वरपुत्रयोः ॥ ११०८ ॥

सत्यार्थुवाच ॥

इत्युक्त्वा तत्समाचारप्राप्तेः पश्चाद् दिनत्रयम् ।
श्रीयेषू स्तत्स्थलेऽतिष्ठद् यत्र पूर्वमवर्त्तत ॥ ११०९ ॥
पश्चादूचे तु निद्राति लाजारो नः प्रियः सखा ।
एतर्हि प्रस्थितिं कुर्वे तस्य जागरणाय तु ॥ १११० ॥
शिष्या प्रोचुः स चेत् सुप्तस्तर्हि सुस्थीभवेदिति ।
यतः सुषुप्तिविश्रामं येष्वाऽबोधन् विवक्षितम् ॥ १११९ ॥
परन्तु वस्तुतो मृत्युं पूर्वमुद्दिष्टवान् प्रभुः ।
तात्पर्य्यं स्वस्य वाक्यस्य पुनरेवमबोधयत् ॥ १११२ ॥

श्रीयेषूरुवाच ॥

गतासुरस्ति लाजारो यच्च नासं तदन्तिके ।
तद्धेतोरस्मि सन्तुष्टो विश्वासो येन वो भवेत् ॥ १११३ ॥

सत्यार्थुवाच ॥

तदा बेथानियां गत्वा येषू र्घंस्रचतुष्टयम् ।
समाधौ स्थापितं प्राप्नोत् तं लाजारं निजं प्रियम् ॥ १११४ ॥
ग्रामस्त्वसौ मयेदानीमुक्तो बेथानियाभिधः ।

यद्धसलेमभिख्याया नगर्य्या निकटेऽभवत् ॥ १११५ ॥
अतो यद्धदिनोऽनेके लाजारस्य मृतेः परम् ।
स्वस्योत्तदीययोः पार्श्वमायन् सान्त्वनहेतवे ॥ १११६ ॥
येष्वः समागमं श्रुत्वा लाजारस्य सहोदरा ।
निष्क्रान्ता सद्मनश्चामुं साक्षात्कर्त्तुं गताऽवदत् ॥ १११७ ॥

मार्थोवाच ॥

भो भो प्रभो भवान् पूर्वं यद्यस्थास्यदिह स्थले ।
कदापि मामकस्तर्हि नामरिष्यत् सहोदरः ॥ १११८ ॥
इदानीं चापि यद्यत् त्वं प्रार्थयेः परमेश्वरात् ।
तत् सर्वमीश्वरो दद्यादिति जानामि निश्चितम् ॥ १११९ ॥
इमां श्रद्धोक्तिमाकर्ण्य ततः सान्त्वावहं वचः ।
उत्थाता तावको भ्राता पुनरित्यब्रवीत् प्रभुः ॥ ११२० ॥
ततो मार्थाऽवदद् घस्रे चरमे पुनरुत्थितौ ।
सोऽप्युत्थातेति वेद्मीति ततो येषूरभाषत ॥ ११२१ ॥

श्रीयेषूरुवाच ॥

अहमेवाकरो विद्ये पुनरुत्थानजीवयोः ।
यः श्रद्दधाति मय्येव स प्रमीत्यापि जीविता ॥ ११२२ ॥
यः श्रद्दधाति जीवंश्च न कदापि म्रियेत सः ।
हे मार्थे किं त्वमेतस्मिन् वाक्ये प्रत्येषि मामके ॥ ११२३ ॥

मार्थोवाच ॥

वाढं यो ना जगत्यस्मिन्नागमिष्यन्नभूत् प्रभो ।

स ईश्वरात्मजः खिन्नस्त्वमसीति मतं मम ॥ ११२४ ॥

सत्यार्थुवाच ॥

ततो गृहं गता मार्था मरीयां भगिनीं निजाम् ।

आहूय ज्ञापयामास सद्गुरुस्त्वां दिदृक्षते ॥ ११२५ ॥

मरीया त्विदमाकर्ण्य श्रुत्वोत्तस्थौ सुसत्वरम् ।

ग्रामाद् बहिः प्रभो र्येष्वः सन्निधावाजगाम च ॥ ११२६ ॥

तदानीं ये तया साकं गृहेऽतिष्ठन् यहूदिनः ।

उत्तिष्ठन्तीं बहिर्यान्तीं तां दृष्ट्वा तेऽन्वयासिषुः ॥ ११२७ ॥

भ्रातुः समाधिमेषा हि याति सम्प्रति रोदितुम् ।

इत्येतत् सङ्गिनस्तस्या मिथः प्रोचुरमी तदा ॥ ११२८ ॥

तैरन्विता मरीया तु येष्वः सन्निधिमागता ।

दृष्ट्वा च पादयोस्तस्य पतित्वैवमभाषत ॥ ११२९ ॥

मरीयोवाच ॥

भो भो प्रभो भवान् पूर्वं यद्यस्थास्यदिह स्थले ।

कदापि मामकस्तर्हि नामरिष्यत् सहोदरः ॥ ११३० ॥

सत्यार्थुवाच ॥

तामश्रुलोचनीं साश्रून् यहूदीयांश्च तत्सखीन् ।

विलोक्य मन्युना येषूः समदुःखो न्यपीड्यत ॥ ११३१ ॥

मृतं चोद्दिश्य पप्रच्छ यूयं कुत्र न्यधत्त तम् ।

इत्यस्य चोत्तरं प्राप द्रष्टुमागम्यतां प्रभो ॥ ११३२ ॥

अश्रूण्यपातयद् येषुस् तत्तु दृष्ट्वा यहूदिनः ।

अवोचन्नेष कीदृक्षममुष्मिन् प्रीतवानिति ॥ ११३३ ॥
अन्ये बभाषिरे योऽयं दृष्टिमन्धाय दत्तवान् ।
स एतस्यापि दिष्टान्तं रोद्धुं किं नाशकीदिति ॥ ११३४ ॥
अत्रावधीयतां विद्वन् कुणपानि यहूदिनः ।
नाधाच्चुः किन्तु खातेषु वस्त्रैरावेष्टितान्यधुः ॥ ११३५ ॥
श्वो यस्मिन् निधाने तु लाजारस्य न्यधीयत ।
तद् आसीद् गह्वरं द्वारि प्रस्तरेण समावृतम् ॥ ११३६ ॥
सुदीर्घं निश्वसन्नन्त र्येषूस्तत् स्थानमागतः ।
अस्माऽपसार्य्यतामित्थं प्रान्तस्थानब्रवीज्जनान् ॥ ११३७ ॥
इमं येषूक्तमादेशं श्रुत्वा मार्थाऽवदत् प्रभो ।
दुर्गन्धः सोऽधुना जातो मृत्वा घस्रचतुष्टयम् ॥ ११३८ ॥
तदा येषूरमूचे श्रद्धां चेदाचरेस्तदा ।
माहात्म्यमैश्वरं पश्ये रिति किं नाहमुक्तवान् ॥ ११३९ ॥
तदा तु प्रस्तरे द्वारात् गह्वरस्यापसारिते ।
सन्मूर्द्धलोचनो येषूः परमेश्वरमस्तुत ॥ ११४० ॥

श्रीयेषूरुवाच ॥

त्वां धन्यं वच्मि हे तात यतो मे श्रुतवानसि ।
सदा च मे प्रणोषीति सुष्ठु प्रागप्यवेदिषम् ॥ ११४१ ॥
तथापि लोकसङ्घस्य प्रान्तस्थस्य कृतेऽवदम् ।
ते येन प्रत्ययं कुर्य्युस्त्वं मां प्रेरितवानिति ॥ ११४२ ॥

गुरुरुवाच ॥

इत्युक्त्वा मृत्युसंहर्त्री शक्तिं येषूः प्रकाशयन् ।
लाजार हो निरेहीति मृतं प्रोच्चैः समाक्रयत् ॥ ११४३ ॥
सद्योऽसौ बहिरागच्छद् वस्त्रैर्वेष्टितपाणिपाद् ।
बद्धास्यो गात्रमार्जन्या यथा न्यस्यत गह्वरे ॥ ११४४ ॥
तदा येषूक्तु तांल्लोकान् परितःस्थानभाषत ।
तं मुक्तबन्धनं ज्ञात्वा निर्विघ्नं विसृजन्त्विति ॥ ११४५ ॥
मरीयामार्थयोर्दृष्ट्वा समेतानां यहूदिनां ।
अनेके तां क्रियां दैवीं दृष्ट्वा येष्वि विश्वस्युः ॥ ११४६ ॥
अन्ये तु सन्निधिं गत्वा शासितॄणां यहूदिनाम् ।
यत्कर्म्मासाधयद् येषू स्तस्य तत्त्वं न्यवेदयन् ॥ ११४७ ॥
तच्छ्रुत्वा ते प्रधानास्तु संगृहीताश्च संसदि ।
मिथश्च मन्त्रणां कृत्वा तर्हि तादृग् बभाषिरे ॥ ११४८ ॥

यहूदिन ऊचुः ॥

किं कुर्म्मोऽपौरुषेयीर्हि क्रिया बह्वीः करोत्ययम् ।
एवं त्यजेम चेत्तस्मिन् प्रत्येष्यन्ति तदा समे ॥ ११४९ ॥
तदा नो धाम जातिश्च संहरिष्यन्ति रोमिणः ।

सत्यार्थ्युवाच ॥

तच्छ्रुत्वैकस्तु तन्मध्ये कायफाख्यस्तदातनः ।
प्रधानयाजको वाक्यं सभास्थानिदमब्रवीत् ॥ ११५० ॥

कायफ उवाच ॥

सर्वे लोका न नश्येयुरित्यस्मै हेतवे मतिः ।
एकस्य युज्यते पुंस इति यूयं न बोधथ ॥ ११५१ ॥

सत्यार्थुवाच ॥

ततः प्रभृत्यमी दुष्टाः प्रधानास्तु यहृदिनाम् ।
नानोपायान् मिथो येषो हत्यायै सममन्वयन् ॥ ११५२ ॥
इदानीं या मया प्रोक्ता लाजारोद्देशिनी कथा ।
सत्यत्वलक्षणैः सर्वैः सा मद्गुरौ विशिष्यते ॥ ११५३ ॥
लाजारो वस्तुतः प्रेतो ह्यासीदत्र न संशयः ।
न चेत्तदा कुतः स्वस्रोरश्रुपातस्तदीययोः ॥ ११५४ ॥
कुतः सान्त्वाय मित्राणां तयोः पार्श्वे समागतिः ।
कुतो वा कुणपं पूतं मृतवस्त्रैश्च वेष्टितम् ॥ ११५५ ॥
लाजारो वस्तुतः प्रेतो यदि नोज्जीवयिष्यत ।
तदा तं कौतुकाद् द्रष्टुं कुतोऽयास्यन् यहृदिनः ॥ ११५६ ॥
ये लोकाः कर्मणोऽमुष्य साक्षिणः स्वयमासत ।
तेषां केचिज्जना येषो द्विषोऽभूवन्निति स्फुटम् ॥ ११५७ ॥
अमी सद्यश्च मुख्यानां पार्श्वं गत्वा यहृदिनाम् ।
तत्कर्मविस्तरं प्रोचुरित्याख्यानात् प्रतीयते ॥ ११५८ ॥
अतः प्रतारणा तस्मिंश्चेत् प्रायोक्ष्यत कर्मणि ।
प्रधानास्ते तदाऽन्विष्य याञ्चयिष्यन् प्रभोर्द्विषः ॥ ११५९ ॥
अमी तु वास्तवं ज्ञात्वा प्रोक्तं कर्मातिमानुषम् ।

लोके तदीयवार्तायां रोद्धुमेहन्त कीर्त्तनाम् ॥ ११९० ॥
येनास्य कर्मणः सर्वं चिह्नं लुप्येच्च भूतलात् ।
तदर्थं तर्हि लाजारमपि हन्तुमकल्पयन् ॥ ११९१ ॥
तथा चापौरुषेयस्य कर्मणोऽमुष्य सत्यता ।
नानाप्रमाणयुक्तस्य शङ्कनीया न विद्यते ॥ ११९२ ॥

वेदविद्वानुवाच ॥

अन्यद् येष्वश्चरित्राणां सत्यत्वस्योपपादकम् ।
प्रमाणं चेद् भवान् दातुं शक्नुयात्तर्हि कथ्यताम् ॥ ११९३ ॥

सत्यार्थ्युवाच ।

खिस्तीयशास्त्रकाराणां येन सिध्यति सत्यता ।
प्रमाणमन्यदेतर्हि भवता श्रूयतामिदम् ॥ ११९४ ॥
ये लौकिकेषु कार्य्येषु जनाः सन्ति विचक्षणाः ।
ते सत्यासत्ययोः प्रायो विदुः कर्त्तुं विवेचनाम् ॥ ११९५ ॥
सत्यं ब्रवीति लोकोऽयं मिथ्या वक्त्यमुकोऽपरः ।
इत्येतद् आस्यवाण्यादेः विकारैस्तर्कयन्त्यमी ॥ ११९६ ॥
मिथ्या वदन्ति ये लोका जातु वाचा स्खलन्ति ते ।
तदास्ये कर्हिचिल्लज्जा किंवा भीतिः प्रकाशते ॥ ११९७ ॥
ये लोकाः सत्यमाऊस्तु ते सन्तोऽक्षुब्धचेतसः ।
रूपेण विभ्रमं नैव सूचयन्ति स्वरेण वा ॥ ११९८ ॥
लिङ्गैर्यथा च वक्तॄणां सत्यासत्यं विविच्यते ।
तथैवोक्त्यर्थयोर्भेदै ६मंस्थप्रोक्तस्मृतान्टतम् ॥ ११९९ ॥

बहून् ग्रन्थान् विचारेण ये पठन्ति मनस्विनः ।
तेषां गुणागुणान् सम्यग् विजानन्ति विविच्य ते ॥ ११७० ॥
ग्रन्थेऽमुकः सुविश्वास्यो न विश्वास्योऽमुकोऽपरः ।
इति द्वयोस्तयोरर्थं सुविचार्य्य विदुर्बुधाः ॥ ११७१ ॥
अर्थेन स्वयमुक्त्या च येषां सिद्ध्यत्यसत्यता ।
तादृक्षा भूरयो ग्रन्थाः प्रचलन्त्यवनीतले ॥ ११७२ ॥
अर्थो ह्यसम्भवो यस्मिन्नत्युक्त्या सन्निभोऽस्ति च ।
तस्य ग्रन्थस्य सत्यत्वे सन्दिहन्ति विवेकिनः ॥ ११७३ ॥
क्वापि ग्रन्थे निरर्थानां वृत्तान्तोऽद्भुतकर्मणाम् ।
वर्त्तेत चेत्तदा तस्मिन् विश्वासो दुष्करो भवेत् ॥ ११७४ ॥
यथा देवोऽमुकः शैलं स्वीयांऽगुल्योदतोलयत् ।
लीलामात्रार्थमित्युक्ते सन्दिह्युस्तत्र पण्डिताः ॥ ११७५ ॥
हीनोऽत्युक्त्या तु यस्यार्थः सम्भावी च प्रतीयते ।
तं ग्रन्थं ग्रुक्यविश्वासं मन्येरन् विबुधास्समे ॥ ११७६ ॥
यदन्तरुक्तयोऽर्थाश्च सत्यवादित्वसूचकाः ।
अनेकाः स्युस्तु स ग्रन्थः श्रद्धामापाततोऽर्हति ॥ ११७७ ॥
यथा यस्मिन् स्वपक्ष्याणां गुणदोषौ प्रबन्धकृत् ।
ब्रूयात् किमप्यनिङ्कृत्य स ग्रन्थः प्रत्ययोचितः ॥ ११७८ ॥
अत्रावधीयतामेतद् या या येष्वो विभूतयः ।
सुसंवादेषु कथ्यन्ते कीदृश्यः सन्ति ताः समाः ॥ ११७९ ॥
अमुष्यापौरुषेयीणां क्रियाणां निकरे क्रिया ।

मोघा नैकाऽपि लीलार्थं तेनाकारि महात्मना ॥ ११८०॥
कस्याप्यर्थस्य लाभाय प्रश्नस्तस्य सुनिश्चितम् ।
अपौरुषेयसामर्थ्यमसौ नित्यमदर्शयत् ॥ ११८१ ॥
स्वमहिम्नः प्रकाशाय दुःखिनां रक्षणाय च ।
श्रद्धादार्ढ्याय च शिष्याणां क्रियास्वक्रे स दैविकीः ॥ ११८२॥
पुनश्च ये सुसंवादान् प्राणयन् ग्रन्थकारिणः ।
गुणागुणौ सपक्षाणां स्वेषां तेऽवर्णयन्नुभौ ॥ ११८३ ॥
यथा येष्वोऽनुगः पेत्रः स्वप्रभोर्निंह्नवं भयात् ।
श्रुत्वा दोषी बभूवेति सुसंवादेषु कथ्यते ॥ ११८४ ॥
तैर्ग्रन्थकारिभिश्चान्ये जडत्वाप्रत्ययादयः ।
येष्वोऽनुयायिनां दोषाः कथ्यन्ते सरलात्मभिः ॥ ११८५ ॥
अत्युक्तिसंयुतां श्लाघाममी येष्वोऽनुयायिनाम् ।
अश्रुत्वा वास्तवीं वार्त्तामवदन् व्याजमन्तरा ॥ ११८६ ॥
किमप्यमी न धूर्त्तत्वात् कल्पयित्वा यथातथम् ।
वृत्तानि वर्णयामासु रित्याख्यानात् स्वयं स्फुटम् ॥ ११८७ ॥
परन्तु कीदृग्नैर्नाना लिङ्गैः सत्यत्वसूचकैः ।
सुसंवादा विशिष्यन्ते तत् पाठादेव बुध्यते ॥ ११८८ ॥
इदानीं ते सुसंवादाः संस्कृतोक्तावनूदिताः ।
सुखेन पण्डितै र्बोद्धुं शक्यन्ते भारतोद्भवैः ॥ ११८९ ॥
अतो भवान् मनो युक्त्वा सुसंवादानधीतवान् ।
तदन्तःस्थानि लक्ष्माणि सत्यताया निबोधतु ॥ ११९० ॥

वेदविद्वानुवाच ॥

यदा खिस्तीयधर्मस्य प्रारम्भो भूतलेऽभवत् ।
तदानीं भूरयो येषूं प्रत्यरुन्धन् यहूदिनः ॥ ११९१ ॥
आदौ च ये जनास्तर्हि येश्वः शिष्यत्वमाश्रयन् ।
ते बाधिताः स्वदेशीयै र्बहून् क्लेशानभुञ्जत ॥ ११९२ ॥
यदा प्राचारि देशेषु धर्मोऽसौ यवनादिषु ।
तत्रापि तस्य मन्तारो नवा दुःखान्यभुञ्जत ॥ ११९३ ॥
इमाञ्च तस्य मन्तृणामादिमानां सहिष्णुताम् ।
विचार्य्यामुष्य धर्मस्य भवान् सत्यत्वमूहते ॥ ११९४ ॥
अमीषां त्वादिशिष्याणां दुःखभोगस्य सिद्धये ।
भवान् खिस्तीयशास्त्रोक्तीरुपन्यस्यति केवलम् ॥ ११९५ ॥
अतः पृच्छामि शास्त्रेभ्यः खिस्तीयेभ्यो विनाऽपरम् ।
प्रमाणमस्य सिद्ध्यर्थं दातुं किं शक्यते न वा ॥ ११९६ ॥

सत्यार्थ्युवाच ॥

आदौ यैर्बाधनै र्धर्म्मः खिस्तीयः प्रत्यरुद्धत ।
अमीषां निश्चयोऽनेकैः प्रमाणैरुपपाद्यते ॥ ११९७ ॥
किन्त्वत्र येन सुस्पष्टा भवतो बुद्धिरुद्भवेत् ।
तदर्थं किञ्चिदाख्यानं कथयामि यहूदिनाम् ॥ ११९८ ॥
श्रीयेश्वः स्वर्गमात् प्रायश्चत्वारिंशत्समान्तरे ।
व्यतीते रोमिणो देशं चम्वाऽऽक्रामन् यहूदिनाम् ॥ ११९९ ॥
तदीयां राजधानीञ्च परिवेष्ट्य स्वसेनया ।

तां दुर्गामपि भंक्त्वा च समूलामुदसादयन् ॥ १२०० ॥
अनेके विग्रहेऽमुष्मिन्नहन्यन्त यहूदिनः।
प्रैषास्वन्येषु देशेषु व्यकीर्य्यन्त क्वचित् क्वचित् ॥ १२०१ ॥
तन्मध्ये भूरयो येषि न विश्वस्य पुरातनम्।
स्वशास्त्रप्रेरितं धर्मं दध्रुरासक्तचेतसः ॥ १२०२ ॥
अद्यापि प्राक्तनं धर्ममाचरन्तो निरन्तरम्।
तद्वंश्या भूरयो लोके विलोक्यन्ते यहूदिनः ॥ १२०३ ॥
तैरेताख्यादिशास्त्राणि प्राचीनानि तदन्तिके।
इब्रीयोक्तौ प्रदृश्यन्ते निपद्यन्ते च सादरम् ॥ १२०४ ॥
तच्छास्त्रोक्तेषु वाक्येषु विश्वसन्तश्च तारकम्।
स्ववंश्यस्यागमिष्यन्तं प्रतीक्षन्तेऽधुनाऽपि ते ॥ १२०५ ॥
श्रीयेषूं स्वीयशास्त्रोक्तं नोररीकृत्य तारकम्।
तेऽस्मादन्यं भविष्यन्तमाशंसन्ते भ्रमान्विताः ॥ १२०६ ॥
अतस्तेऽद्यापि चेद् येषूं निरस्यन्ति यहूदिनः।
तदा तत्पितरस्तद्वत् तिरोऽकुर्वन्न संशयः ॥ १२०७ ॥
येषूमुद्दिश्य यं ते हि धारयन्ति दुराग्रहम्।
पितृभ्यस्तैरसौ स्वेभ्यः क्रमप्राप्तो न चान्यथा ॥ १२०८ ॥
अतः खिस्तीयशास्त्रेषु यत् सर्वत्र यहूदिनाम्।
येषूं प्रत्युच्यते वैरं तस्य सत्त्वं सुनिश्चितम् ॥ १२०९ ॥
यहूदिभिन्नवंश्याश्च येऽभवन् यवनादयः।
खिस्तीयान् नूतनांस्तेऽपि दुद्रुह्यु र्नात्र संशयः ॥ १२१० ॥

प्रवर्त्तयन्ति ये नूत्नं धर्मं प्रत्नं त्यजन्ति च ।
प्रायः सर्वत्र बाध्यन्ते प्रत्नधर्मानुगैरमी ॥ १२११ ॥
आदौ खिस्तीयधर्मस्य वस्तुतो जघटे तथा ।
इत्येतद् ग्रन्थकाराणां वाक्यैः सिद्ध्यति रोमिणाम् ॥ १२१२ ॥
किन्त्वस्मिन् विषये येन भवान् मन्येत निश्चयम् ।
तदर्थं कञ्चिदेतर्हि वक्तुमर्हामि विस्तरम् ॥ १२१३ ॥
श्रीयेश्वः स्वर्गमादब्दा व्यतीयुः सप्ततिर्यदा ।
तदाऽऽसीत् विश्रुतः कश्चित् ताकिताख्यः प्रबन्धकृत् ॥ १२१४ ॥
सुख्यातो रौम्यवंश्यीयो विद्वान् गम्भीरधीरसौः ।
रोमीयाणां स्ववंश्यानां चरित्राणि प्रणीतवान् ॥ १२१५ ॥
प्रबन्धास्तत्कृतास्ते तु रौम्यायां रचिता गिरि ।
इदानीं भागतो लुप्ता भागतः सन्ति रक्षिताः ॥ १२१६ ॥
तदीयानां प्रबन्धानां भागो योऽद्यापि रक्षितः ।
तदन्तर्वक्ष्यमाणेयं ग्रन्थकर्त्रोच्यते कथा ॥ १२१७ ॥
व्यतीयुर्वत्सरास्त्रिंशद् येश्वः स्वर्गमनाद् यदा ।
तदाऽघटिष्ट तद् वृत्तं मयैतर्हि विवक्षितम् ॥ १२१८ ॥
तस्मिन् काले हि रोमायां महान् प्रज्वलितोऽनलः ।
दग्ध्वा चानेकगेहादि महाध्वंसकरोऽभवत् ॥ १२१९ ॥
अभिप्रायेण सम्राजो वह्निः प्रज्वलितस्तु सः ।
न चाकस्माद् बभूवेति केचिद् रोम्याः प्रपद्यंङ्किरे ॥ १२२० ॥
सम्राड् हि निष्ठुरो भ्रष्टो निरोन्नामा तदातनः ।

लीलाभि र्व्यसनैश्चापि सदा कालमयापयत् ॥ १२२१ ॥
इमां व्याख्यां पुरस्कृत्य ग्रन्थात् तार्किकनिर्मितात्।
खिस्तीयोद्देशिवाक्यस्य सारमत्रोद्धराम्यथ ॥ १२२२ ॥ यथा ॥
रौम्यसाम्राज्यविषयकचरित्ररचकस्लाकित उवाच ॥
समाजा दाहिता रोमा त्विति शङ्का न चेष्टितैः।
न वा दानादिभिस्तस्य परिहर्त्तुमशक्यत ॥ १२२३ ॥
निवर्त्तनाय शङ्कायाः खिस्तीयाख्यजनेषु सः।
दाहस्य दोषमारोप्य दृढैर्दंण्डैः शशास तान् ॥ १२२४ ॥
अमी खिस्तीयनामानो दुराचारस्य कारणात्।
बभूवुर्गर्हिता लोके दण्डपात्राणि चासत ॥ १२२५ ॥
तस्याः खिस्तीयसंज्ञायाः खिस्तनामा प्रवर्त्तकः।
तिबर्य्याभिख्यसम्राजः काले यो बुभुजे बधम् ॥ १२२६ ॥
निरुद्धोऽसौ त्वसद्धर्मः पुनरारभतैधितुम्।
यद्धदिनीदृतं व्याप्य रोममप्याजगाम च ॥ १२२७ ॥
खिस्तीयान् आत्मनः केचित् स्वीकुर्वन्तस्तु दध्निरे।
अमीभिः सूचितोऽन्येषां महान् वर्गोऽप्यधारि च ॥ १२२८ ॥
अमी च नो तथा दाहरूपपातकहेतुना।
यथा द्वेषेण मर्त्यानां निरनीयन्त दोषिणः ॥ १२२९ ॥
केचिच्छ्वभिर्व्यदीर्य्यन्त पशुचर्मभिरावृताः।
अन्ये काष्ठेष्वनह्यन्त कीलच्छिन्नकरांघ्रिकाः ॥ १२३० ॥
तेषामन्ये त्वराला‌क्षौ र्वस्त्रै र्वेष्टितमूर्त्तयः।

निम्नीथिन्यां प्रकाशार्थं प्राज्वल्यन्त क्षपामुखे ॥ १२३१ ॥
स्वयं समाडिमान् दण्डान् स्वेषूद्यानेष्वदर्शयत् ।
आदाय सारथेर्वेशं तत्र तिष्ठन् ददर्श च ॥ १२३२ ॥
आचारं तादृशं दृष्ट्वा लोकास्तद्दण्डभोक्तृषु ।
खिस्तीयेष्वन्वकम्पन्त दण्डयोग्येषु सत्स्वपि ॥ १२३३ ॥
अमीषां दोषिणां दण्डो न सामान्यहिताय हि ।
तस्मै क्रूरस्य समाजस्यैकारीति जनै र्मतम् ॥ १२३४ ॥

सत्यार्थ्युवाच ॥

एतस्यास्ताकितोक्तायां घटनायां विचारणात् ।
खिस्तीयानां चिरन्तानां दुर्दशा बुध्यते स्फुटम् ॥ १२३५ ॥
तद्धर्मं नूतनं दृष्ट्वा भिन्नधर्मानुयायिनः ।
तान् रौम्या दण्डयामासुरिति स्पष्टं प्रकाशते ॥ १२३६ ॥
यथा चामी निरोन्नाम्नः समाजः समये दृढान् ।
लोष्णानभुञ्जतानेकान् तथा पूर्वं न संशयः ॥ १२३७ ॥
स ताकितश्च तान् भ्रष्टान् दण्डार्हांश्च ब्रवीति यत् ।
तस्माद् भवांस्तदाचारं भ्रष्टं भूतं न मन्यताम् ॥ १२३८ ॥
प्राज्ञोऽपि ताकितोऽसौ हि खिस्तीयानवधीरयन् ।
दुराग्रहेण पश्यंश्च तत्त्वं नान्वेष्टुमैहत ॥ १२३९ ॥
दुराग्रहाद् विना तत्त्वमन्वैषिष्यदसौ यदि ।
तदाचारं विनिर्णेतुमशक्ष्यत् तदा शुचिम् ॥ १२४० ॥

वेदविद्वानुवाच ॥

खिस्तीयांस्ताकितस्तद्वद् निन्दन् भ्रष्टान् ब्रवीति यत् ।
तद्वाङ्मात्रात् तदाचारे कलङ्कः कोपि नापतेत् ॥ १२४१ ॥
खिस्तीयान् भिन्नधर्माणो रोमिणो यदनिन्दिषुः ।
तन्मात्राद् भ्रष्टता तेषां खिस्तीयानां न सिद्धति ॥ १२४२ ॥
लोका हि भिन्नधर्माणो द्वेषमात्रेण चोदिताः ।
परस्परं जुगुप्सन्त इति भूयो विलोक्यते ॥ १२४३ ॥
अस्मद्देशीयलोका हि शैवा निन्दन्ति वैष्णवान् ।
तथैव वैष्णवाः शैवानिति को वा न बोधति ॥ १२४४ ॥
खिस्तीयानां सदाचारः प्रमाणैर्यदि सिद्धति ।
तदा तृणाय रौम्योक्तं नाहं मन्येय निन्दनम् ॥ १२४५ ॥

सत्यार्थ्युवाच ॥

नासंस्तु वस्तुता भ्रष्टास्ते खिस्तीयास्तदातनाः ।
इत्यत्र श्रूयतां साक्ष्यं रौम्यस्यैकस्य शासितुः ॥ १२४६ ॥
आसीत् तदातनः कश्चित् ज्ञिनियाख्यो महाजनः ।
उक्तस्य ताकितस्यासौ वयस्यः सुप्रियोऽभवत् ॥ १२४७ ॥
अशीति वत्सराः येषः स्वर्गमाद् व्यत्यगुर्यदा ।
तदा बिथुन्यदेशस्य सोऽधिष्ठाता न्ययुज्यत ॥ १२४८ ॥
खिस्तीयान् प्राप सोऽनेकान् वसतस्तत्र नीवृति ।
तद्धर्मवर्द्धनात् प्रायो देवानां तत्यजेऽर्च्चना ॥ १२४९ ॥
परन्तु रौम्यसाम्राज्ये नूतधर्मनिषेधनात् ।

खिस्तीयद्वेषिभिस्तेषामभियोगः प्रचक्रमे ॥ १२५० ॥

तथा तेष्वभियुक्तेषु सत्सु शासितुरन्तिके ।

किं तत्र कार्य्यमित्यस्मिन्विषये सन्दिदेह सः ॥ १२५१ ॥

विधेर्विना हि सामान्याद् नूत्नधर्मनिषेधकात् ।

खिस्तीयोद्देशकः कोऽपि विहितो नाभवद् विधिः ॥ १२५२ ॥

तस्मादादेशमादित्सुः शासिता श्लिनियाभिधः ।

लिपिं चजाननामानं समाजं प्रति नुन्नवान् ॥ १२५३ ॥

सा पत्री रौम्यभाषायां लिखिताऽद्यापि रक्ष्यते ।

समाजा प्रेषितं तस्याश्चोत्तरं वर्त्तते तथा ॥ १२५४ ॥

खिस्तीयान् प्रति यादृक्षं व्यवहार्षीत् स शासिता ।

इत्यस्य सारमादाय तत्पत्राद् व्याकरोम्यहम् ॥ १२५५ ॥

यथा । बिथुन्यप्रदेशस्य शासिता श्लिनियनामोवाच ॥

खिस्तीयधर्ममन्तृत्वाद् येऽभियुक्ता ममान्तिके ।

आनिन्यिरे जनास्तेषामर्थे तादृशमाचरम् ॥ १२५६ ॥

खिस्तीया यूयमाद्धे किमिति तान् एष्टवानहम् ।

तैः स्वीकृते त्वहं भूयो धिरएच्छं सतर्ज्जनम् ॥ १२५७ ॥

तथा कृते तु चेत् स्तब्धास्तस्थुः स्वस्मिन्नमी मते ।

तदाऽहमादिशं सद्यस्तद्दण्डः क्रियतामिति ॥ १२५८ ॥

यादृक् पत्र्यास्तदीयोऽस्तु हठयुक्तात् तथाप्यमी ।

स्तब्धत्वाद् दुर्हृदाद् दण्डमर्हन्तीति मया मतम् ॥ १२५९ ॥

खिस्तीयान् आत्मनोऽन्ये तु नोररीकृत्य वन्दनम् ।

मुदा दिवौकसां कृत्वा खिस्तनामाप्यनिन्दिषुः ॥ १२६० ॥
खिस्तीया वस्तुतो ये तु सन्ति भुक्ताऽपि ते बलम् ।
देवानां वन्दनादीनि न कुर्वन्तीति कथ्यते ॥ १२६१ ॥

सत्यार्थ्युवाच ॥

खिस्तीयधर्म्ममन्तृणामाचारं तद्विदां मुखात् ।
निश्चित्य तस्य वृत्तान्तमसावेवं न्यवेदयत् ॥ १२६२ ॥

ञ्जिनिय उवाच ॥

दोषस्तेषामियानस्ति यत् ते घस्रे निरूपिते ।
गीतेन सङ्गताः खिस्तं प्रशंसन्तीश्वरं यथा ॥ १२६३ ॥
न दुष्कृतस्य कस्यापि कृत्यै ते किन्तु सर्वथा ।
व्यागाय व्याजचौर्य्यादेः शापयन्ति परस्परम् ॥ १२६४ ॥
तथा कृते पृथग्भूय पुनः सायं च सङ्गताः ।
ते दोषवर्ज्जितं सर्वं सकृत् खादन्ति भोजनम् ॥ १२६५ ॥

सत्यार्थ्युवाच ॥

सर्वं तत्त्वञ्च जिज्ञासुः हे नार्य्यौ खिस्तसेविके ।
यद्वेण यातनार्थेन ञ्जिनियोऽसावपीडयत् ॥ १२६६ ॥
नार्य्यौ परीक्षिते ते तु तीव्रां भुक्ताऽपि वेदनाम् ।
कमप्यशुद्धमाचारं खिस्तीयैर्नाचतुः कृतम् ॥ १२६७ ॥
खिस्तीयानां मृषाभक्तिः कुत्सिता चामिताऽस्ति च ।
इत्येव शासिता मेने कृत्वा नार्य्याः परीक्षणम् ॥ १२६८ ॥
समाजा स्थापितं धर्म्मं जनो नाङ्गीकरोति यः ।

स दण्डमर्हतीत्येतत् ह्मिनियेऽसावमन्यत ॥ १२६९ ॥
यां तथामीश्वरस्यार्चामेकैको मन्यते पुमान् ।
तामेवार्हत्यनुष्ठातुमित्यसौ न व्यचारयत् ॥ १२७० ॥
केनाप्यस्वीकृतं धर्मं ग्राहयन्ति बलेन ये ।
तेऽन्यायमाचरन्तीति रोमीयै र्नर्ह्यबुद्धत ॥ १२७१ ॥
अतः सद्बुद्धिहीनोऽसौ ह्मिनियाख्यः सुधीरपि ।
खिस्तीयं धर्ममाक्रुद्धत् खिस्तीयांश्च न्यपीडयत् ॥ १२७२ ॥
तथापि सर्वथा तेषामसौ कृत्वा परीक्षणाम् ।
कमप्यशुद्धमाचारं तैः कृतं न ह्यवाप्तवान् ॥ १२७३ ॥
भवान् खिस्तीयधर्मस्य तत्त्वं चेत्तु बुभुत्सति ।
तथा तदीयशास्त्राणि मनो युक्ता विचारयेत् ॥ १२७४ ॥
तथा कृते तु मार्गस्य खिस्तीयस्य पवित्रताम् ।
रोमीयोक्तापवादानां मिथ्यात्वञ्च निभोत्स्यते ॥ १२७५ ॥
अन्यच्चैतस्य मार्गस्य भक्तानामनुयायिनाम् ।
आचारोऽपक्षपातेन भवता परिदृश्यताम् ॥ १२७६ ॥
ये ह्याचरन्ति तं मार्गं तन्मताविष्टचेतसः ।
अमीषामान्तरी शुद्धिः साधुता च प्रवर्द्धते ॥ १२७७ ॥
इदं तु नाममात्रेण मतं स्वीकृत्य भूरयः ।
यथाहं नाचरन्तीति न तद् आपत्तिकारणम् ॥ १२७८ ॥
यतस्तत् सन्मतं यस्य नाविशेद् मनसोऽन्तरे ।
कथं तस्माद् मतात् तस्य सिद्धिर्जायेत मानसी ॥ १२७९ ॥

बीजं क्षिप्तं क्षितौ चेन्न प्रविशेद् मृत्तिकान्तरे ।
फलं कदापि तद्बीजाद् नोद्भवेत् सत्तमादपि ॥ १२८० ॥
तथाच स्वीयधर्मार्थं ते खिस्तीयाः पुरातनाः ।
क्लेशानभुञ्जतेत्येतद् मम वादात् प्रतीयते ॥ १२८१ ॥
अतो यदर्थमीदृक्षानमी क्लेशानभुञ्जत ।
स येषूद्देश्यिवृत्तान्तस्तथ्यः स्याद् नात्र संशयः ॥ १२८२ ॥
यतो दण्डादयः क्लेशा भोक्तव्यास्सन्ति यत्कृते ।
कः प्राज्ञस्तादृशं मार्गमाश्रयेद् न परीक्ष्य तम् ॥ १२८३ ॥
तस्मात् खिस्तीयमार्गस्य प्रथमास्तेऽनुगा दृढैः ।
प्रमाणैः साधितं प्राप्य तमग्रङ्गन्निति स्फुटम् ॥ १२८४ ॥

वेदविद्वानुवाच ॥

चेत् कृष्णरामयो र्वार्त्ता पुराणोक्ता न वास्तवी ।
सुसंवादोदिता येभ्यः कथा सत्या कुतो भवेत् ॥ १२८५ ॥
अत्युक्त्या देवताबुद्धिश्चेदभूत् कृष्णरामयोः ।
येभ्योऽपि किं तथा नाभूदित्यपृच्छमहं पुरा ॥ १२८६ ॥
येभ्यः कथा चरित्रेभ्यः प्रत्नेभ्यः कृष्णरामयोः ।
कया विशिष्यते रीत्या तद् भवान् व्याकरोत्विह ॥ १२८७ ॥

सत्यार्थ्युवाच ॥

कृष्णादिवर्णयित्रीभ्यः कथाभ्योऽस्मन्मता कथा ।
कया विशिष्यते रीत्या तदेतर्हि प्रपञ्चये ॥ १२८८ ॥
ये कृष्णरामयोर्लोका निबबन्धुरमूः कथाः ।

आसंस्ते विप्रजातीयाः सर्वे मान्याश्च भारते ॥ १२८९ ॥

यद्यद् देवार्चनोद्देशे ते बुधाः शिक्षयन्ति नः ।

तदेव मन्तुमर्हाम इति शूद्रादयोऽविदुः ॥ १२९० ॥

विकारम् आदितोऽत्यं मतं प्राप्य शनैःशनैः ।

अन्यच्छेषेऽधरद् रूपमिति वादेऽग्रिमेऽब्रवम् ॥ १२९१ ॥

अस्मिन् देशे तथा या तु जघटे मतविक्रिया ।

तस्यास्तदातनः कोपि नाभवत् प्रतिबन्धकः ॥ १२९२ ॥

मतस्यासौ विकारो हि जायमानः क्रमात् क्रमात् ।

अत्रत्यानां प्रधानानां हानेर्हेतुर्न भूतवान् ॥ १२९३ ॥

अतो यां यां मते विप्रा विक्रियामुदपादयन् ।

तामन्येऽप्यनुगास्तेषां स्वीचक्रुर्बाधया विना ॥ १२९४ ॥

किन्त्वस्मदीयधर्मादौ जघटे सर्वमन्यथा ।

लोका हि भूरयस्तस्य मतस्यासन् विरोधिनः ॥ १२९५ ॥

येषूद्देशीनि वृत्तानि ते द्विषः सूक्ष्मदृष्टयः ।

परीक्षाञ्चक्रिरे सम्यग् विस्तरादब्रवं यथा ॥ १२९६ ॥

वेदविद्वानुवाच ॥

प्राक्काले भूरयो बौद्धा न्यवसन्नत्र भारते ।

वैमत्यात् ते च विप्राणां भृशमासन् विरोधिनः ॥ १२९७ ॥

अतस्ते ब्राह्मणा मिथ्या कथाश्चेद् कृष्णरामयोः ।

प्राणेष्वंस्तर्हि किं बौद्धा नाखण्डिष्यन्नमूः कथाः ॥ १२९८ ॥

सत्यार्थ्युवाच ॥

निःशङ्कं भूरयो बौद्धाः प्रागासन्नत्र भारते ।
ते स्मातं प्राक्तनं धर्मं त्यक्त्वाऽन्यद् मतमाश्रयन् ॥ १२९९ ॥
मतानि ते तु विप्राणामपि खण्डितुमुद्यताः ।
मानं शक्तिञ्च विप्राणां नहि भंक्तुमशक्नुवन् ॥ १३०० ॥
चिराद्धि ब्राह्मणाः पूज्या मताः सन्तोऽत्र नीवृति ।
अशेषान् अन्यजातीयान् जनान् खेऽस्थापयन् वशे ॥ १३०१ ॥
अतो वेदान् विहायैके बौद्धा यद्यपि जज्ञिरे ।
तथाप्यन्ये तु विप्रेषु समासज्यन्त पूर्ववत् ॥ १३०२ ॥
इमे च विप्रपक्षीया जनास्सर्वे तदातनाः ।
प्रामाण्यं पूर्ववत् तेषां बाडवानाममंसत ॥ १३०३ ॥
विप्राश्च याः कथा नूना देवानां समकल्पयन् ।
तास्तेषामनुगाः सर्वे स्वीचक्रुः श्रद्धया जडाः ॥ १३०४ ॥

वेदविद्वानुवाच ॥

प्राक्काले ब्राह्मणान् पूज्यान् अमन्यन्तान्यवर्णजाः ।
तेषां शुश्रूषवश्चासन्निति युष्माभिरुच्यते ॥ १३०५ ॥
बुद्धस्तु वैदिकं धर्मं द्विजानां च प्रधानताम् ।
उत्पद्य खण्डितुं येते इति लोके प्रसिद्ध्यति ॥ १३०६ ॥
तथा भूते तु विप्राणामर्थलाभादरादिषु ।
अत्यन्ता हानिरुत्पन्ना भवेदत्र न संशयः ॥ १३०७ ॥
अतः पृच्छामि ते विप्राः शक्तिमन्तोऽभवन् यदि ।

तदा ते बौद्धधर्मस्य नाबाधन्त कुतो जनिम् ॥ १३०८ ॥
चेदन्यवर्णजा लोका ब्राह्मणानां वशेऽभवन् ।
ते भिन्नवर्णजास्तर्हि बौद्धधर्मं कुतोऽन्वगुः ॥ १३०९ ॥
नूनो धर्मो हि मुख्यानां हानेर्हेतुर्यदा भवेत् ।
तदा तेऽस्यानुगान् दण्डै रुन्धन्तीत्यब्रवीद् भवान् ॥ १३१० ॥
अतो विप्रैः कृता बाधा बौद्धानाञ्च पराजयः ।
भवद्वादानुसारेण नूनमावश्यकोऽभवत् ॥ १३११ ॥
अतस्ते वस्तुतो विप्राः प्रबलास्त्वेदवित्तम ।
दण्डैस्ते तर्हि बौद्धानां वर्द्धनं नारुधन् कुतः ॥ १३१२ ॥

सत्यार्थुवाच ॥

यामस्मिन्विषये शङ्कामधुना कुरुते भवान् ।
एतत् तस्याः समाधानं वक्ष्यमाणं निशाम्यतु ॥ १३१३ ॥
चेच्छक्ता ब्राह्मणास्तर्हि कुतः स्वेषां विरोधिनम् ।
बौद्धं ते नारुधन् मार्गमिति शङ्कितवान् भवान् ॥ १३१४ ॥
अत्रावधीयतामादौ ग्रन्थः कोपि न वर्त्तते ।
विश्वासार्हो यतस्तत्त्वं सम्यक् शक्येत वेदितुम् ॥ १३१५ ॥
यतो ग्रन्थेषु बौद्धानां ग्रन्थेष्वद्यापि वर्त्तिषु ।
अर्थोऽत्युक्त्यान्वितो भूरिरसम्भावी च विद्यते ॥ १३१६ ॥
अतो विचार्य्य यामत्र बौद्धग्रन्थोदितां कथाम् ।
सम्भाव्यां प्राप्नुयां तस्याः सारं वक्ष्यामि संक्षिपन् ॥ १३१७ ॥
प्रागासीच्छाक्यवंशीयो राजन्यो गौतमाभिधः ।

विरक्तोऽसौ च संसाराद् युवा सन्न्यासमग्रहीत् ॥ १३१८ ॥
गृहं स्वं पैतृकं त्यक्त्वा तत्त्वज्ञानपरायणः ।
स ख्यातान् ब्राह्मणान् भूरीन् तत्प्राप्तेराप्तयाऽऽश्रयत् ॥ १३१९ ॥
कैश्चिद् मतैस्तदीयैस्तु न सन्तुष्य स नूतनम् ।
श्रौताद् विलक्षणं धर्माद् बौद्धधर्ममतिष्ठिपत् ॥ १३२० ॥
नाना यद्यप्यपूर्वाणि प्रावर्त्तद् मतानि सः ।
लौकै स्तथाप्यभीष्टानि स्वीचकारापराणि तु ॥ १३२१ ॥
आवृत्तिर्जन्मनां यद्वद् वैप्रश्नास्त्रेषु कथ्यते ।
तथैव शाक्यसिंहोक्ते मतभेदेऽपि मन्यते ॥ १३२२ ॥
असौ च यानि नूत्नानि मततत्त्वान्यकीर्त्तयत् ।
तन्मध्ये कानिचिद् गाढं लोकाभीष्टान्यविन्दत ॥ १३२३ ॥
यतः पुनर्जनेर्बन्धाद् मुक्ता भूत्वा समे जनाः ।
निर्वाणं शक्नुयुः प्राप्तुमित्यसौ गौतमोऽवदत् ॥ १३२४ ॥
मनुष्यैः सर्ववर्णीयै र्गन्तुं मुक्तिश्च शक्यते ।
न तल्लाभाय पाण्डित्यमुपेक्ष्येतेति चाब्रवीत् ॥ १३२५ ॥
सर्वै र्विना विशेषेण मुक्तिर्लभ्येति यद् मतम् ।
तद् नीचवर्णजैर्लोकै र्ग्राह्यमासीद् न संशयः ॥ १३२६ ॥
सदा स शाक्यसिंहश्च धर्माचारे परायणः ।
जितेन्द्रियत्वदानाद्यैः समान् प्रासादयज्जनान् ॥ १३२७ ॥
वाणीं त्यक्त्वा च शास्त्रीयां प्राकृतोक्तावृजावसौ ।
लोकान् स्वधर्मतत्त्वानि शिक्षयामास पर्य्यटन् ॥ १३२८ ॥

तस्मादिष्टैः समाकृष्टास्तदीयैरुपदेशनैः ।
अत्रत्या भूरयो लोका मतं तत्रोक्तमाश्रयन् ॥ १३२९ ॥
चिरात्तु शक्तिमन्तोऽपि पूजिताश्चापि बाडवाः ।
वृद्धिं बौद्धस्य धर्मस्य रोद्धुं नैवाभवन् क्षमाः ॥ १३३० ॥
मते हि शाक्यसिंहोक्ते रताः साधारणा जनाः ।
अनेके तस्य धर्मस्य पक्षपातमकुर्वत ॥ १३३१ ॥
शाक्ये केचिच्च राजानः समासज्य तदातनाः ।
तद्धर्ममाश्रयन्नित्यं बौद्धग्रन्थेषु कथ्यते ॥ १३३२ ॥
अतः स्वमानसंहर्त्तुन् बौद्धान् द्विष्टाऽपि बाडवाः ।
तद्धर्मवर्द्धनं रोद्धुं नाकल्पन्त तदातनाः ॥ १३३३ ॥
लोका यद्यप्यनेके तु बौद्धं पन्थानमन्वगुः ।
अन्ये तथापि विप्रेषु समासज्यन्त भूरयः ॥ १३३४ ॥
अमी च विप्रपक्षीया जना विप्रान् यथा पुरा ।
प्रामाणिकानमन्यन्त तथा पश्चादमंसत ॥ १३३५ ॥
शेषे गतेष्वनेकेषु वर्षाणां शतकेषु तु ।
सञ्जाताः प्रबलाः बौद्धान् निरास्यन् भारताद् द्विजाः ॥ १३३६ ॥

वेदविद्वानुवाच ॥

स्वधर्मस्य किमप्यन्यदीश्वरोक्तत्वसाधकम् ।
प्रमाणं चेद् भवान् दित्सेत् तर्हि सम्मति दीयताम् ॥ १३३७ ॥

सत्यार्थ्युवाच ॥

भविष्यद्वादिनः प्रत्ना येष्वो भाविनमागमम् ।

पुरा यत् प्रोचुरित्येतदन्यत् तन्मतसाधनम् ॥ १३३८ ॥
चिरं येषूद्भवात् पूर्वं जाता देशे यहृदिनाम् ।
आचार्या विश्रुताः केचिदासन् मोसिपुरःसराः ॥ १३३९ ॥
ते चात्मनेश्वरीयेण बोधिता लोकतारकम् ।
कञ्चित् प्रादुर्भविष्यन्तं महात्मानमवादिषुः ॥ १३४० ॥
अमुञ्च तारकं भव्यमुद्दिश्यन्तः शुभप्रदम् ।
नाना चिह्नानि ते तस्मिन् भवितव्यान्यवर्णयन् ॥ १३४१ ॥
यथाऽसावमुके वंशे नगरे चोद्भविष्यति ।
भोक्ता च दुःखमित्यादि तेऽवदंस्तस्य विस्तरम् ॥ १३४२ ॥
आविर्भविष्यतस्त्रातु र्लक्षणानि यदन्तरे ।
तै र्वर्णितानि ते ग्रन्थाः प्रख्यन्तेऽधुनावधि ॥ १३४३ ॥
तस्मिंश्च तारके यानि भवितव्यान्यवादिषुः ।
श्रीयेशु तानि चिह्नानि सङ्गृहीतान्यवित्सत ॥ १३४४ ॥
तस्मा च्चवस्तुतो येषूरीश्वरीयमतावहः ।
नृजाते रैश्वरस्त्राता चासीदित्युपपाद्यते ॥ १३४५ ॥
तदुद्देशे हि वाक्यानि यान्यूचुर्भव्यवादिनः ।
ते तानि नाशकन् वक्तुमैश्वराद् बोधनाद् विना ॥ १३४६ ॥
उदकं योऽग्रतो ब्रूयादीश्वरेण न बोधितः ।
कदापि नात्र संसारे पुमांस्तादृगजायत ॥ १३४७ ॥
यस्त्वीश्वराज्ञया नृणां तारको निरदिश्यत ।
स येषूर्वस्तुतस्त्राता जगतः स्याद् न संशयः ॥ १३४८ ॥

परन्तु भव्यवक्तृणामुक्तीरेतर्हि विस्तरात् ।
अहं न शक्नुयां वक्तुं वादसङ्कोचनेच्छया ॥ १३४९ ॥
अग्रे तु वादधारायां चेत् सुयोगमवाप्नुयाम् ।
तदा किञ्चित् तदुक्तीनां प्रदास्यामि निदर्शनम् ॥ १३५० ॥

वेदविद्यानुवाच ॥

प्रभोर्यैष्वो भवानद्य यच्चरित्रमवर्णयत् ।
मनोयोगेन तत् सर्वमधुना श्रुतवानहम् ॥ १३५१ ॥
यं वादं तच्चरित्राणां विश्वास्यत्वस्य सिद्धये ।
भवान् प्रयुक्तवानस्ति मया सोऽपि विचारितः ॥ १३५२ ॥
तथा विचार्य्य शास्त्राणां खिस्तीयानां चिरन्तनाम् ।
सुसंवादोक्तवृत्तानां वास्तवत्वञ्च तर्कये ॥ १३५३ ॥
तथा तु स्वीक्रते येष्वः समर्थत्वेऽतिमानुषे ।
प्रामाण्यं तन्मतस्यापि सिद्धमापाततो भवेत् ॥ १३५४ ॥
आवां पुरा तु वादादावीश्वरोक्तत्वचिह्नयोः ।
द्वयोरपेक्षणीयत्वं शास्त्रेषूरय्यकुर्वहि ॥ १३५५ ॥
अपौरुषेयशक्तेस्तु स्थितिः शास्त्रप्रवर्त्तके ।
इत्याद्यं चिह्नमावाभ्यां येषूद्देशे विचारितम् ॥ १३५६ ॥
शास्त्रस्य सत्तमार्थत्वं यद् द्वितीयन्तु लक्षणम् ।
परीक्षा साम्प्रतं तस्य करणीयाऽवशिष्यते ॥ १३५७ ॥
सम्यक् खिस्तीयशास्त्रस्य येन कुर्य्यां परीक्षणाम् ।
तदर्थमत्र तस्यार्थं भवान् व्याकर्त्तुमर्हति ॥ १३५८ ॥

तथा क्षते तु तच्छास्त्रे शास्त्रप्रामाण्यसाधकम् ।
द्वितीयं लक्षणं प्राप्यमुत नेति स्फुटं भवेत् ॥ १३५९ ॥

सत्यार्थ्युवाच ॥

तौरेतादीनि शास्त्राणि यानि सन्ति यहूदिनाम् ।
अमीषा मीश्वरोक्तत्वमपि मन्यामहे वयम् ॥ १३६० ॥
श्रीयेष्वोऽनेहसः पूर्वमात्मनो विषये विभुः ।
यद् मर्त्येभ्यो ददौ ज्ञानं तत् तौरेतादिषूच्यते ॥ १३६१ ॥
तस्मिन् शास्त्रे यहूदीये ख्रिस्तीये चेरितं मतम् ।
उद्धृत्य तत् समासेन यथाशक्ति निरूपये ॥ १३६२ ॥
अस्त्येक ईश्वरोऽनादिरात्मभूरप्रमेयधीः ।
असीमशक्तिकोऽनन्तः शुद्धसत्त्वो दयामयः ॥ १३६३ ॥
तमेकमन्तरा किञ्चिदप्यनादि न भूतवत् ।
स्वेच्छया स वस्तूनि सकलान्यसतोऽसृजत् ॥ १३६४ ॥
स विश्वपस्थितान् मूर्त्तान् पदार्थान् उदपादयत् ।
स प्रागविद्यमानानां स्रष्टा जीवात्मनामपि ॥ १३६५ ॥
स्वामी सृष्टेः स सर्वस्याः क्रमं बद्धा नियच्छति ।
दयालुरात्मना सृष्टाः प्रजाः सर्वा बिभर्त्ति च ॥ १३६६ ॥
स धर्माधर्मयोर्बुद्धिं येषु जीविषु सृष्टवान् ।
अमीभिः सर्वदा धर्ममेव कार्य्यमपेक्षते ॥ १३६७ ॥
शुद्धेन चेतसा धर्ममनुतिष्ठन्ति चेदमी ।
तदा स्वयं स शुद्धात्मा तेषु सत्सु प्रसीदति ॥ १३६८ ॥

धर्मं त्यक्त्वा तु चेत् पापमाचरन्ति निरङ्कुशाः ।
तदा स तैरसन्तुष्टः शेषे दण्डं विधास्यति ॥ १३६९ ॥
एकं पुमांसमारभ्य स्त्रियञ्चैकां परेश्वरः ।
विधाय मङ्गलोद्याने निवासार्थमतिष्ठिपत् ॥ १३७० ॥
ता चात्मदेहयोः सिद्धावीश्वरेण कृतावुभौ ।
समीक्षं सम्यगर्चन्तौ सुखमात्रमवापतुः ॥ १३७१ ॥
इयं शुभा दशा कष्टम् अचिरेण ननाश तु ।
तौ भ्रष्ट्वा ह्यन्वयं भ्रष्टमुदपादयतां क्षणात् ॥ १३७२ ॥
सङ्गवाद् येन रूपेण भ्रष्टत्वे तावपन्नताम् ।
एतस्य विस्तरं शास्त्रादुद्धरामि यथाकरम् ॥ १३७३ ॥
आसीत् प्रतापवान् कश्चिद् दिव्यो दूतोऽनघः पुरा ।
भ्रष्टः स स्वेच्छया भूत्वा त्वीश्वरारिरजायत ॥ १३७४ ॥
स शैतानाभिधो दुष्टो नरपित्रोः सतीं दशाम् ।
विलोक्य मत्सरी नाशं तयोः सिद्धेरकल्पयत् ॥ १३७५ ॥
युवां मा फलमेकस्य द्रुविशेषस्य खादतम् ।
इत्येतदीश्वरो नृणां पितरौ शिष्टवानभूत् ॥ १३७६ ॥
आज्ञां तौ चेत्तु भङ्क्ष्यातां तदा नाशस्तयोर्भवेत् ।
इत्थं विचिन्त्य शैतानः स्त्रियमादौ व्यमोहयत् ॥ १३७७ ॥
स नागस्याकृतिं धृत्वा तस्याः पार्श्वं गतोऽब्रवीत् ।
फलस्य भक्षणाद् मृत्यु र्न भावी युवयोरिति ॥ १३७८ ॥
सा वाक्यैर्वञ्चिता तस्य निषिद्धं बुभुजे फलम् ।

o

पतिश्च भोजयामास लोककल्याणहारिणी ॥ १३७९ ॥
परेश्वरीयमादेशं तथा भग्नवतोस्तयोः ।
सिद्धिर्ननाश तौ चोभौ दुष्टभावौ बभूवतुः ॥ १३८० ॥
स्वभिष्टेस्तादृशाद् भङ्गादप्रसन्नः परेश्वरः ।
तावादौ दम्पती भ्रष्टौ सुखोद्यानाद् निरस्तवान् ॥ १३८१ ॥

वेदविद्दानुवाच ॥

दयालुरीश्वरः श्रेयः स्वप्रजानामभीच्छति ।
बलं छलञ्च दुष्टानां सद्यो भंक्तुञ्च कल्पते ॥ १३८२ ॥
अतः पृच्छामि दुष्टस्य शैतानस्य च्छलात् प्रभुः ।
नृजातेः पितरौ कस्माद् न प्ररक्षितवानिति ॥ १३८३ ॥

सत्यार्थ्युवाच ॥

दयालुः सर्वशक्तिश्च नूनं सन् परमेश्वरः ।
प्रजानां सर्वथा स्वासां परमं हितमिच्छति ॥ १३८४ ॥
स सर्वशक्तिरैषिष्यद् यदि तर्ह्यादिमौ नरौ ।
शैतानस्याविंतुं व्याजाद् अशक्किष्यद् न संशयः ॥ १३८५ ॥
कस्माद्धेतोस्वसौ शक्तिं शैतानस्य निवारयन् ।
तयो र्न रुद्धवान् पातमिति वक्तुं न शक्नुयाम् ॥ १३८६ ॥
त्रैलोक्यशासिताऽनन्तः सर्वज्ञश्चामुकाः क्रियाः ।
कस्मै करोति तत् तन्वी कथं विद्याद् नृणां मतिः ॥ १३८७ ॥
किञ्चास्मिन्विषये शङ्कां यां भवानुदतिष्ठिपत् ।
तस्याः समाधिरस्माकं शास्त्रेष्वुक्तो न दृश्यते ॥ १३८८ ॥

तादृक्षान् विषयान् गूढान् सम्यग् बोधितुमक्षमाः ।
अविद्ययैव सन्तुष्टाः स्थातुमर्हन्ति पण्डिताः ॥ १३८९ ॥
यद्यत् परेश्वरः कुर्य्यात् हृष्टैर्निर्वाहयन् क्रमम् ।
तत्सर्वं न्याय्यमेवात्र दृढा श्रद्धा विधीयताम् ॥ १३९० ॥
शङ्कां यत् कुर्वते लोकास्त्वीश्वरीयेषु कर्मसु ।
अविद्या मानुषी हेतुर्नाघमैश्वरकर्मणाम् ॥ १३९१ ॥
इमां शङ्कां तु भावत्कीं सम्यग् हर्त्तुं न शक्नुवन् ।
तथापीषत् समाधानं तस्या विज्ञैः कृतं शृणु ॥ १३९२ ॥
स्वतन्त्रः शक्नुवन् धर्ममथवाऽधर्ममेषितुम् ।
मनुष्यः शक्नुयाच्छाघां किंवा निन्दनमर्हितुम् ॥ १३९३ ॥
अस्वच्छन्दोऽक्षमो धर्ममथवाऽधर्ममेषितुम् ।
नरो न शक्नुयाच्छाघां न वा निन्दनमर्हितुम् ॥ १३९४ ॥
अशक्तो ह्यन्यथा कर्त्तुम् आवश्यात् कोऽपि सत्क्रियाम् ।
चेदिच्छेत् तर्ह्यसौ विद्वन् न प्रशंसोचितो भवेत् ॥ १३९५ ॥
अशक्तश्चान्यथा कर्त्तुम् आवश्यात् कोऽपि कुक्रियाम् ।
चेदिच्छेत् तर्ह्यसौ तद्वद् न भवेद् निन्दनोचितः ॥ १३९६ ॥
अस्वच्छन्दस्तु यो लोकः सदसत् कर्त्तुमक्षमः ।
कथं स सदृशौ हीनो जडाद् यच्चाद् विशिष्यते ॥ १३९७ ॥
मया विवक्षितोऽर्थस्तु येन सम्यक् स्फुटो भवेत् ।
तदर्थमत्र दृष्टान्तं कथयिष्यामि कृत्रिमम् ॥ १३९८ ॥
पुरा ह्य एकदा कश्चिज्जनो बालौ निजौ सुतौ ।

गृहाद् युवां न निर्यातमद्य क्वापीत्यमादिशत् ॥ १३९९ ॥
कनीयान् बालकस्त्वाज्ञां येन भंक्तुं न शक्नुयात् ।
तदर्थमौषधं किञ्चिच्छक्तियुक्तमपाययत् ॥ १४०० ॥
आसीत् तस्येदृशी शक्तिस्तस्य पानेन मोहिताः ।
लोकास्तद्दातुरादेशाद् नाशकन्नन्यथैषितुम् ॥ १४०१ ॥
अतोऽसावौषधं पीत्वा स्वतन्त्रत्वेन वर्ज्जितः ।
पित्राज्ञापूजनादन्यदेषितुं नैव शक्तवान् ॥ १४०२ ॥
परन्तु ज्यायसः सूनोः भावमिच्छन् परीक्षितुम् ।
स्वतन्त्रं तं गृहे त्यक्त्वा तत्पिता निर्ययौ स्वयम् ॥ १४०३ ॥
आज्ञप्तौ तौ यथा पित्रा तथा सद्मन्यतिष्ठताम् ।
तथा तु कुर्वतोरेको ज्यायान् श्लाघोचितोऽभवत् ॥ १४०४ ॥
लीलां हि द्रष्टुकामोऽपि स्वं नियच्छन् कुतूहलम् ।
स ज्यायान् बालको गेहात् स्वतन्त्रोऽपि न निर्ययौ ॥ १४०५ ॥
गृहान्तः स्वेच्छया स्थातुं बहिर्गन्तुञ्च शक्नुवन् ।
नियच्छन् स्वामसाविच्छां पितुराज्ञामपूजयत् ॥ १४०६ ॥
पित्रिष्टात्त्वन्यथा कर्त्तुमेषितुं वा न शक्नुवन् ।
कनीयान् श्लाघनं नार्हद् आज्ञां यद्यपि नाभनक् ॥ १४०७ ॥
तस्य स्वातन्त्र्यहीनस्य निष्क्रमो न ह्यभूद् वशे ।
आवश्यादेव गेहान्तरसौ तस्थौ न चान्यथा ॥ १४०८ ॥
स्वच्छन्दः स्वेच्छया युक्तस्त्वभविष्यदसौ यदि ।
तदा कदाचिदादेशं भञ्जनैष्यद् गृहाद् बहिः ॥ १४०९ ॥

अतः कनीयसस्तस्य न सज्ञाते परीक्षणे।
पित्राज्ञापूजकः सोऽभूदुत नेति न सिद्ध्यति ॥ १४१० ॥
तस्मात् स्वच्छन्दताऽभावाद् आदेशस्याप्यभञ्जकः ।
प्रशंसाभाजनं नासीद् न च निन्दनभाजनम् ॥ १४११ ॥
उक्तो ज्यायान् सुतः पित्रा स्वतन्त्रस्त्यजे यथा ।
दृजातेः पितरौ तद्वत् स्वच्छन्दावीश्वरो व्यधात् ॥ १४१२ ॥
तावाज्ञामैश्वरीं मन्तुं किंवा भंक्तुमशक्नुताम् ।
धर्माधर्मावुभौ कर्त्ता तयोरिच्छा वशेऽकरोत् ॥ १४१३ ॥
तथा तु सत्यमू धर्मे स्थिरावस्थास्यतां यदि ।
श्लाघामार्हिष्यतां तर्हि धर्मं कृत्वा स्वयेच्छया ॥ १४१४ ॥
तौ त्वीश्वरीयमादेशं यदभंक्तां स्वयेच्छया ।
तस्माद् निन्दोचितौ भूत्वा दण्डनीयौ बभूवतुः ॥ १४१५ ॥
तौ त्वाज्ञाभञ्जनं कृत्वा कामं धर्मादपप्लुताम् ।
न तस्मादीश्वरे किञ्चिदपि दूषणमापतेत् ॥ १४१६ ॥

वेदविद्वानुवाच ॥

भ्रष्टत्वं स्वेच्छया तद्वद् नरपित्रोरवाप्नयोः ।
ततस्तयोः कथाशेषं भवानाख्यातुमर्हति ॥ १४१७ ॥

सत्यार्थ्युवाच ॥

तावाज्ञामैश्वरीं भंक्त्वा दुष्टभावौ बभूवतुः ।
तौ धर्मं पूर्ववत् सम्यङ् नाशमाचरितुं क्षमौ ॥ १४१८ ॥
आचारो बाह्यतः शुद्धो विहितानाञ्च कर्मणाम् ।

बाह्वीकाऽनुष्ठितिर्विद्वन् सत्यं धर्मो न विद्यते॥ १४१९ ॥
शुद्धेन चेतसा सर्वान् धर्मान् सम्यक् करोति यः ।
स एको धार्मिको लोकः परः कोपि न धार्मिकः ॥ १४२० ॥
येषां येषां तु धर्माणामाचाराद् ईश्वरान्तिके ।
नरः स्याद् धार्मिकः सम्यक् तान् ब्रवीमि समासतः ॥ १४२१ ॥
तत्रादावीश्वरे प्रीतिः कर्त्तुं सर्वाधिकाऽर्ह्यते ।
सर्वेषामीश्वरः प्रेम्णो विषयाणां हि सत्तमः ॥ १४२२ ॥
स कर्त्ता पालकः स्वामी विश्वेषां जीविनामपि ।
अतः प्रधानतस्तस्मिन् प्रेतुमर्हन्ति मानुषाः ॥ १४२३ ॥
यादृक् परैर्जनैः कार्य्यमभीच्छन्त्यात्मनः प्रति ।
तादृक् तान् प्रति कर्त्तव्यमिति धर्मोऽपरो महान् ॥ १४२४ ॥
न्यायं सत्यं कृपां प्रीतिम् अन्ये मय्याचरन्विति ।
इच्छन्ति मानुषाः सर्वे आत्मकल्याणतत्पराः ॥ १४२५ ॥
अतः सत्यं कृपां प्रीतिं न्यायमन्याञ्जनान् प्रति ।
मनुष्याः सर्वदा कुर्य्युरिति धर्मोऽस्त्यवश्यकः ॥ १४२६ ॥
यश्चैतान् निखिलान् धर्मान् सम्यङ् नित्यञ्च नाचरेत् ।
चित्तेन कर्मणा वाचा स पुमान् नास्ति धार्मिकः ॥ १४२७ ॥
धर्मस्य तादृगाचारी कुत्र लोके तु दृश्यते ।
आचारेणाखिला दुष्टा बाह्वीकेनान्तरेण च ॥ १४२८ ॥
असंख्यानीश्वरे दोषान् यस्मिन् मर्त्ये न पश्यति ।
संसारे तादृशो नास्ति न कदापि बभूव वा ॥ १४२९ ॥

नृजाते र्दुदृशा तादृक् कुतो जातेति चेद् भवान् ।
एच्छेत् तर्ह्युत्तरं दद्यां पितृग्रामाऽस्त्यसाविति ॥ १४३० ॥
नृजातेः पितरावाद्यां यदेशस्य बभञ्जतुः ।
तयोस्तदाऽऽन्तरो भावो दृढं दुष्टत्वमाप्तवान् ॥ १४३१ ॥
यादृक्षौ पितरावास्तां तादृक् सन्ततिरप्यभूत् ।
दुष्टाद् द्रुमात् फलं भद्रमुत्पत्तुं न हि शक्नुयात् ॥ १४३२ ॥
तस्मादेवादिमाद् युग्मात् सर्वदेशनिवासिनः ।
मनुष्याः सर्ववंशीयाः पारम्पार्य्येण जज्ञिरे ॥ १४३३ ॥
यो दोषश्चाद्ययोः पित्रोः स्वभावे प्राविशत् तदा ।
स तद्वंशोद्भवान् व्याप्नोत् क्रमप्राप्तोऽखिलान् जनान् ॥ १४३४ ॥
स्वादेशानादराद् हेतोरसन्तुष्टः परेश्वरः ।
तौ स्त्रीनरौ सुखोद्यानाद् निरासेत्यमभाषयम् ॥ १४३५ ॥
प्रसूतिवेदना नार्य्या भुज्यतां पतिनिघ्नया ।
श्रमो मृत्युश्च पुंसेति तद्भूतिं निर्णिनाय च ॥ १४३६ ॥
निराशौ तौ तु माभूतां भाविन्या दुर्गतेर्भयात् ।
तस्मै तौ सान्त्वयन्नेवं नागं शेषे परेश्वरः ॥ १४३७ ॥

परमेश्वर उवाच ॥

इदं यतोऽकरोः कर्म्म तस्माच्छप्ततमोऽभवः ।
त्वं तुन्दगश्च सञ्जातो धूलिमत्स्यसि सर्वदा ॥ १४३८ ॥
मिथो वैरं विधास्यामि तव नार्य्याश्च वंशयोः ।
स हन्ता ते शिरस्त्वञ्च तस्य पार्ष्णिं क्षणिष्यसि ॥ १४३९ ॥

सत्यार्थ्युवाच ॥

नृजातेस्तारकः कश्चित् शैतानस्य पराक्रमम् ।
आयाति भंक्तुमित्यर्थं तस्य वाक्यस्य मन्महे ॥ १४४० ॥
नृजातेराद्ययोः पित्रोरुक्षाद् भंशादनन्तरम् ।
तदीया सन्ततिर्जज्ञे वर्द्धितुञ्च प्रचक्रमे ॥ १४४१ ॥
यद्धदीयेषु शास्त्रेषु नृजाते र्यावती कथा ।
उक्ताऽस्ति तावतीं वक्तुमप्रसङ्गाद् न शक्नुयाम् ॥ १४४२ ॥
नृजातेर्यन्तु वृत्तान्तं प्रसङ्गान्वितमाप्नुयाम् ।
एतावन्मात्रसारांशं कथयिष्यामि संक्षिपन् ॥ १४४३ ॥
वृद्धायां लोकसंख्यायां पातकं भृशमैधत ।
बलात्कारादिभिर्दोषै र्मेदिनी पर्य्यपूर्य्यत ॥ १४४४ ॥
अमीषामीश्वरो दण्डं विनिर्णीय दुरात्मनाम् ।
जलाप्लावेन घोरेण भूस्थांल्लोकाननाशयत् ॥ १४४५ ॥
नोहाख्यः केवलः साधुः परिवारान्वितः क्षयात् ।
विशालामाश्रितो नावं धर्महेतोरररक्ष्यत ॥ १४४६ ॥
तत्पश्चाच्छोषिताखण्डे नोहसूनुत्रयोद्भवः ।
नृवंशो वर्द्धितुं मह्यां विस्तर्तुञ्च प्रचक्रमे ॥ १४४७ ॥
आदौ तदातना लोकाः सत्यं केवलमीश्वरम् ।
पितॄणां शिक्षया ज्ञात्वा तस्यैवार्चनमाचरन् ॥ १४४८ ॥
अनैरेकस्य सेव्यस्य सेवनं तत्यजुर्नराः ।
नाना देवांश्च देवीश्च सेवितुं प्रारभन्त च ॥ १४४९ ॥

गर्ह्याभिः कुत्सितान् देवान् पूजयन्तश्च रीतिभिः ।
आचारे मानुषाः प्रायः सर्वेऽदुष्यंस्तदातनाः ॥ १४५० ॥
तथा क्षीणस्य धर्मस्य पुनर्वृद्ध्यर्थमीश्वरः ।
दयालुरात्मनो ज्ञानं नृभ्यः प्राकाशयत् पुनः ॥ १४५१ ॥
इब्राहीमाभिधं साधुं स्वदेशादाह्वयन् प्रभुः ।
यं निर्दैक्ष्यामि तं देशमन्यं याहीत्युवाच तम् ॥ १४५२ ॥
स आज्ञामैश्वरीं प्राप्य निजं त्यक्त्वा निकेतनम् ।
देशं गतः कनानाख्यं तत्रोवास स्त्रिया सह ॥ १४५३ ॥
सता श्रद्धालुना तेन साकं संविदमीश्वरः ।
कृत्वा नाना वरांस्तस्मै प्रतिश्रुश्राव सत्तमान् ॥ १४५४ ॥
वृद्धश्च वृद्धपत्नीकं निरपत्यमुवाच तम् ।
महावंशस्य वप्तारं सूनुं ते स्त्री सविष्यते ॥ १४५५ ॥
अस्मिन् निवासयिष्यामि देशेऽसंख्यं तवान्वयम् ।
नृजातिस्त्वत्कुलद्वारा लप्स्यते चाप्स्यति मङ्गलम् ॥ १४५६ ॥
नृजातिमङ्गलोद्देशी योऽयमैशः प्रतिश्रवः ।
सोऽव्यक्तार्थोऽपि सन् येषां कार्यं त्राणमसूचयत् ॥ १४५७ ॥
अपत्योद्देशिनी शीघ्रं प्रतिज्ञा सिद्धिमाप तु ।
दम्पत्यो वृद्धयोः सूनुरचिरेणोदपादि च ॥ १४५८ ॥
इब्राहीमोद्भवात् तस्मात् इसहाकाभिधात् सुतात् ।
याकोबनामकः पुत्रस्तत्पश्चादुदपद्यत ॥ १४५९ ॥
ततःपरञ्च याकोबात् पुत्रा द्वादश जज्ञिरे ।

वंशाश्च द्वादशामीभ्यः सम्बभूवुर्यहूदिनाम् ॥ १४९० ॥
ततो जाते तु दुर्भिक्षे स याकोबः सुतैर्वृतः ।
स्वजन्मनीवृतं त्यक्त्वा मिसरं देशमाययौ ॥ १४९१ ॥
तद्देशे तस्य वंशे तु शनैरत्यन्तमेधिते ।
तं तत्त्योऽधिपो गाढमुपद्रोतुं प्रचक्रमे ॥ १४९२ ॥
ताँल्लोकांस्वात्मनाऽभीष्टानुद्धिधीर्षुः परेश्वरः ।
तेषां नेतारमाचार्य्यं मोसिसंज्ञं नियुक्तवान् ॥ १४९३ ॥
अपौरुषेयसामर्थ्यमीश्वरात् प्राप्तवानसौ ।
उत्पातैर्भीषणैर्लोकान् मिसरीयान् व्यसिस्मयत् ॥ १४९४ ॥
तस्माद्देशात् स्वजातीयाँल्लोकान् नीत्वा च विक्रमी ।
स शैलम् आरबे देशे सीनायाभिधमानयत् ॥ १४९५ ॥
भीमेन तेजसा तत्र दर्शनं ददर्शीश्वरः ।
मोसिं धर्मं यहूदीयैरनुष्ठेयमशिक्षयत् ॥ १४९६ ॥

वेदविद्वानुवाच ॥

योऽसौ यहूदिनां धर्म ईश्वरेण व्यधीयत ।
तदीयं विस्तरं कश्चिज् ज्ञातुमिच्छामि सम्प्रति ॥ १४९७ ॥
विशेषः कीदृशो विज्ञ तस्य धर्मस्य भूतवान् ।
असौ किं विद्यते धर्माद् यैषवीयाद् विलक्षणः ॥ १४९८ ॥

सत्यार्थ्युवाच ॥

एकस्मादीश्वरात् सत्यादन्यः पूज्यो न विद्यते ।
इत्याज्ञा मैासशास्त्रस्य मुख्यमस्ति विशेषणम् ॥ १४९९ ॥

तच्छास्त्रे विविधो धर्मः पशुयागादिरुच्यते ।
किन्त्वस्य विस्तरं सर्वमत्र वक्तुं न शक्नुयाम् ॥ १४७० ॥
यस्तत्रादिश्यते शास्त्रे बऋरूपः क्रतुक्रमः ।
स पापस्मारणार्थाय परेशेन व्यधीयत ॥ १४७१ ॥
पशूनां पातितं रक्तं पापं हर्त्तुं न कल्पते ।
बलिस्ततोऽधिको नृणामुद्धृत्यर्थमपेक्ष्यते ॥ १४७२ ॥
यो नृणां मुक्तये येष्वा कार्य्योऽभूदात्मनो बलिः ।
तस्यैव सूचकोऽकारि मोस्यादिष्टो मखक्रमः ॥ १४७३ ॥
अमुं धर्मञ्च मोस्युक्तम् अल्पस्थायित्वशालिनम् ।
न नित्यस्थायिनं भव्यं निर्णिनाय परेश्वरः ॥ १४७४ ॥
पिता बालं यथा शास्ति शिक्षया बालयोग्यया ।
तथा मौसेन शास्त्रेण यद्धदीयानशात् प्रभुः ॥ १४७५ ॥
यतस्तदातनास्सर्वे यद्धदीयादयो नराः ।
ज्ञानस्य पक्वतां नापुरपरिष्कृतबुद्धयः ॥ १४७६ ॥
लोके नाना तु विद्यायां प्रवृद्धायां क्रमात् क्रमात् ।
मनुष्याः साद्धराः श्लेषे बुद्धिमन्तश्च जज्ञिरे ॥ १४७७ ॥
तथा खिस्तीयधर्मस्य ग्रहायार्हे नरान्वये ।
सज्ञाते ईश्वरो धर्मं यैषवीयमतिष्ठिपत् ॥ १४७८ ॥

वेदविद्यानुवाच ॥

विशेषान् मौसशास्त्रस्य तथा व्याख्यतवान् भवान् ।
कथाप्रबन्धमेतर्हि सन्तनोतु ततःपरम् ॥ १४७९ ॥

सत्यार्थुवाच ॥

स मोसिरब्रवीदेवम् ईश्वरोऽन्यं मया समम् ।
वंशे युष्माकमाचार्य्यं पश्चादुत्पादयिष्यति ॥ १४८० ॥
यद्यत् स आदिशेद् युष्मांस्तत् सर्वं कर्त्तुमर्हथ ।
ये। यश्च तं न मन्येत स उच्छिन्नो भवेदिति ॥ १४८१ ॥
उदर्कंदर्शिनेा मोसेरस्मिन् वाक्ये समागमः ।
श्रीयेषूः सूच्यते भव्य इति मन्यामहे वयम् ॥ १४८२ ॥
ततः कनाननामानं देशमीश्वररक्षिताः ।
प्राप्नास्तदन्तरे वस्तुं प्रारभन्त यहूदिनः ॥ १४८३ ॥
इत्थं परेश्वरोऽभ्यैषीद् पुण्ये वंशे यहूदिनाम् ।
मज्ज्ञानं निर्मलं तिष्ठेत् पवित्रा च मदर्च्चना ॥ १४८४ ॥
इतश्चान्येषु नीदृत्सु भ्रमध्वान्तावृतेष्वपि ।
सद्धर्मस्यामला दीप्तिः सर्वतो व्याप्नुयादिति ॥ १४८५ ॥
यहूदिनः कृतघ्नास्तु कुशलप्रदमीश्वरम् ।
विहाय कुत्सितान् देवान् भूरीनारेभिरेऽर्च्चितुम् ॥ १४८६ ॥
यदा तु ते तथा भ्रष्टाः परमेश्वरमत्यजन् ।
तदा ते तेन सन्त्यक्ताः पेतुर्नाना विपत्तिषु ॥ १४८७ ॥
यदा च ते निजाद्दोषादनुतप्य परेश्वरम् ।
भूयोऽचिंस्तर्ह्यसौ भूयस्तान् प्रसादेन दृष्टवान् ॥ १४८८ ॥
सन्मार्गाद् भ्राम्यतां तेषां नीतये च स ईश्वरः ।
आचार्य्यान् ऐरयद् भूरीन् आत्मशासनवाहकान् ॥ १४८९ ॥

ते सन्तश्चैश्वरे भक्तिं मानुषान् प्रत्यनुग्रहम् ।
न्यायं सारल्यमन्यांश्च धर्मान् कृत्यानुपादिशन् ॥ १४९० ॥
किञ्चेश्वरीयनिःश्वासाद् सम्भूयोदर्कवेदिनः ।
ते पश्चाद्भाविनीर्वार्त्ताः पूर्वतः समसूचयन् ॥ १४९१ ॥
प्रायश्च ते समे कश्चिल्लोकत्रातारमद्भुतम् ।
लोके प्रादुर्भविष्यन्तमुल्लसन्तो न्यवेदयन् ॥ १४९२ ॥
आसीद् यहूदिनां राजा दाविदाख्यश्चिरन्तनः ।
रणे वीरश्च भक्तश्च परमेशस्य सेवकः ॥ १४९३ ॥
असौ स्ववंश्यभूपालनित्यस्थायित्वसूचिकाम् ।
प्रतिज्ञामीश्वरादेतां वच्यमाणामवाप्तवान् ॥ १४९४ ॥
यथा ॥ वंशस्ते शाश्वतं स्थाता सदा राज्यञ्च तावकम् ।
सिंहासनञ्च ते नित्यं दृढीभूतं भविष्यति ॥ १४९५ ॥
तया प्रतिज्ञया विद्वन् गूढया जगतीपतेः ।
येशुः प्रादुर्भवं भव्यं सूचितं मन्महे वयम् ॥ १४९६ ॥
भ्रष्टा भूत्वा हि राजानो मानुषा दाविदुद्भवाः ।
विपत्तौ पतिता राज्यादच्यवन्त यहूदिनाम् ॥ १४९७ ॥
श्रीयेशूरैश्वरः संस्तु दाविद्वंशेऽवतीर्णवान् ।
पुनश्च स्वर्गमारूढो लोकानामीश्वरोऽभवत् ॥ १४९८ ॥
तस्मात्तु दाविदोऽब्दानां गते सार्द्धशतद्वये ।
इषायनामकः ख्यातो विविदे भव्यवाचकः ॥ १४९९ ॥
स साधुरैश्वरालोकद्योतितान्तरलोचनः ।

श्रीयेष्वो भाविनं पश्यन् महिमानमवर्णयत् ॥ १५०० ॥

इषाय उवाच ॥

अस्मभ्यं जायते तोकमस्मभ्यं दीयते सुतः ।

धुरं राजाधिकारस्य यः स्वस्कन्धे धरिष्यति ॥ १५०१ ॥

स बालकोऽद्भुतो मन्त्री शक्तिमान् परमेश्वरः ।

नित्यः सन्धीश्वरश्चेति नामभिः कीर्त्तयिष्यते ॥ १५०२ ॥

दाविद्राजासनस्थस्य तस्य राज्यं सदैधिता ।

सन्ध्याख्यं न्यायधर्माभ्यां दृढीभूतं सनातनम् ॥ १५०३ ॥

सत्यार्थुवाच ॥

पुनश्च भाविनीं वार्त्तां व्यतीतामिव वर्णयन् ।

इषायस्तस्य मर्त्यार्थं दुःखभोगमकीर्त्तयत् ॥ १५०४ ॥

भविष्यद्वादिनस्तस्य वाक्यमेतत् समुद्धरन् ।

तत्सारमात्रमेतर्हि व्याकरिष्यामि संक्षिपन् ॥ १५०५ ॥

यथा ॥ इषाय उवाच ॥

आसीत् स क्लेशभाग् दुःखी मानुषैश्च तिरस्कृतः ।

किन्त्वस्मदीयमेवासौ सन्तापं भुक्तवानभूत् ॥ १५०६ ॥

स ईशेनाहृतः क्लिष्टश्चेत्यस्माभिरमन्यत ।

परन्त्वस्माकमेवाङ्गःकारणात् सोऽभ्यहन्यत ॥ १५०७ ॥

तद्दुष्कृतैस्ताडनैः स्वास्थ्यं वयं येन लभेमहि ।

तदर्थं दण्डनं तेन बुभुजे नः शुभावहम् ॥ १५०८ ॥

स्वमार्गगामिनः सर्वे वयं भ्रान्ता बभूविम ।

परन्तु दण्डमस्माकमीश्वरोऽमुमभोजयत् ॥ १५०९ ॥
तीव्रं क्लिष्टोऽप्यसौ सेहे न च किञ्चिदभाषत ।
बधाय नीयमानोऽविरिव तस्थौ स नीरवः ॥ १५१० ॥
बलेन मारितः प्राणान् सोऽत्यजत् परपापभुक् ।
स्वयं च दोषिणां मध्ये दोषहीनोऽप्यगण्यत ॥ १५११ ॥
आत्मानं बलिमुत्सृज्य दुःखभोगादनन्तरम् ।
स्वजन्यमन्वयं पश्यन् चिरजीवी स तर्प्स्यति ॥ १५१२ ॥
मदीयो धार्मिको भृत्यः परक्लिष्टवाहकः ।
स्वस्य ज्ञानेन भूयिष्ठान् नरान् शुद्धान् विधास्यति ॥ १५१३ ॥
अतो भागं प्रदास्यामि तस्मै साद्धं महात्मभिः ।
वीरैर्महाबलैः साकमसौ लोकं विभक्ष्यति ॥ १५१४ ॥

सत्यार्थुवाच ॥

भविष्यद्वादिनो वाक्यमेतत् खिस्तस्य मृत्युणा ।
सम्यक् सिद्धं बभूवेति मम बुद्धौ न संशयः ॥ १५१५ ॥
इषायो यादृशं दुःखं नरत्रातुरवर्णयत् ।
तादृक्षं बुभुजे येषू बलिर्भूत्वा नृणां कृते ॥ १५१६ ॥
परन्तु सम्यगेतस्य निश्चयाय स्वयं भवान् ।
येष्वो बधस्य वृत्तान्तं सुसंवादोदितं पठेत् ॥ १५१७ ॥
इषायात् परमन्यश्च मीकाख्यो भाविवाचकः ।
एवं येष्वो भविष्यन्तीं जन्मपल्लीमसूचयत् ॥ १५१८ ॥

मीक उवाच ॥

हे त्वं यह्वदेशीये पुरि बेथ्लहम् एफ्रते ।
यह्वदस्य सहस्रेषु किं लघुत्वेन गण्यसे ॥ १५१९ ॥
*इस्रायेलाधिपो भावी त्वन्मध्याद् निःसरिष्यति ।
परन्तु पूर्वतोऽप्यासीदनादिस्तस्य निःस्रतिः ॥ १५२० ॥

सत्यार्थुवाच ॥

येषूस्तु वस्तुतः पुर्य्यां मीकोक्तायामजायत ।
इत्येतत् तस्य वृत्तान्तात् सुसंवादोदितात् स्फुटम् ॥ १५२१ ॥
अमुष्य भाविनस्त्रातु र्विषयेऽन्यानि कानिचित् ।
वाक्यानि भव्यवक्तृणां ग्रन्थेषूक्तानि बोधतु ॥ १५२२ ॥
परन्तु विस्तराद् भीत्वा तान्युद्धर्त्तुं न शक्नुयाम् ।
जिज्ञासुश्चेद् भवांस्तर्हि स्वयमन्यत्र पश्यतु ॥ १५२३ ॥
ते भव्यवादिनः सर्वे श्रीयेष्वो जन्मनः पुरा ।
चिरं बभूवुरित्यत्र कापि शङ्का न विद्यते ॥ १५२४ ॥
भविष्यदुक्तयस्तेषां यत्र सन्ति समर्पिताः ।
स ग्रन्थसंग्रहो येष्वश्चिरं पूर्वमरच्यत ॥ १५२५ ॥
असौ च भव्यवक्तृणां सम्पूर्णा ग्रन्थसंहिता ।
इब्रीयायां कृता वाण्यां प्रचलत्यधुनावधि ॥ १५२६ ॥
येष्वः प्रादुर्भवात् पूर्वं प्रायो वर्षशतत्रयं ।

---

* इस्रायेलेति शब्दो यह्वदिवंशीयलोकबोधको ज्ञेयः ॥

कृत्स्ना व्याकारि यावन्यां वाण्यां सा ग्रन्थसंहिता ॥ १५२७ ॥
अतस्ते भव्यवक्तारश्चिरं येष्वो जनैः पुरा ।
उत्पत्तिं भाविनीं तस्य प्रोचुरत्र न संशयः ॥ १५२८ ॥
वार्त्तांस्तु भाविनीस्तद्दैश्वराद् बोधनाद् विना ।
नरो नैकोऽपि जानाति न कदापि विवेद वा ॥ १५२९ ॥
अतो यद् भाविनीं येष्वो वार्त्तां प्रोचुरमी पुरा ।
तत्रेश्वरार्पितं ज्ञानं हेतुरासीद् न चान्यथा ॥ १५३० ॥
आचार्यैरीश्वरादिष्टै र्यस्तु त्राता न्यरूप्यत ।
स येषूरैश्वरस्त्राता भवेदत्र न संशयः ॥ १५३१ ॥
भविष्यद्वादिनां ताभिरुक्तिभिश्च प्रवर्त्तिताः ।
त्रातुः प्रादुर्भवं भव्यं प्रत्यैत्सन्त यदृच्छदिनः ॥ १५३२ ॥
येषे निरूपिते काले पुराप्रोक्ते च पत्तने ।
निर्दिष्टे दाविदो वंशे चोदपादीश्वरात्मजः ॥ १५३३ ॥
यावन्ति भाविनस्त्रातु र्लक्षणानि चिरन्तनाः ।
भविष्यद्वादिनः प्रोचुस्तस्मिन् सर्वाण्यवापिरे ॥ १५३४ ॥
तदीयं यादृशं जन्म तदाचारश्च यादृशः ।
मृत्युश्च यादृशोऽवित्त तत् पुरैव न्यवेदयम् ॥ १५३५ ॥
अहं यं नौ कथारम्भे येष्वो वृत्तान्तमब्रवम् ।
असौ भवत्स्मृतौ सम्यङ् निखलः स्थितवान् भवेत् ॥ १५३६ ॥
स सूनुरीश्वरस्यास्ति भावं श्रुत्वा च मानुषम् ।
नराणां प्रातिनिध्येन मरणं बुभुजेऽनघः ॥ १५३७ ॥

तथा मृत्युञ्च भुञ्जानो निखिलानां नृणां कृते ।
स पापशुद्धये शक्तं प्रायश्चित्तमसाधयत् ॥ १५३८ ॥
ये चाणाकाङ्क्षिणो भक्त्या श्रद्धया चाश्रयन्ति तम् ।
सदा धर्मे च वर्त्तन्ते ते जनास्त्राणमाप्नुयुः ॥ १५३९ ॥
सन्तश्च शाश्वतं शर्म दण्डं दुष्टास्तु शाश्वतम् ।
प्राप्स्यन्तीत्यादि शास्त्रेषु खिस्तीयेषूच्यते मतम् ॥ १५४० ॥

वेदविद्वानुवाच ॥

एतावन्मात्रसंक्षेपात् स्पष्टा बुद्धिर्न जायते ।
भवान् स्वं विस्तरात् सर्वं मतं व्याकर्त्तुमर्हति ॥ १५४१ ॥
निस्तारकेण मर्त्यानां कथमासीत् प्रयोजनम् ।
स्वीयैस्ते चेष्टितैर्मुक्तिं कुतो नाप्तुमशक्नुवन् ॥ १५४२ ॥
भूत्वा च मानुषो येषूरात्मानं बलिमुत्सृजन् ।
परैः कृतानि पापानि कथं हर्त्तुमकल्पत ॥ १५४३ ॥
येषूच्च कुत्रचित् पुत्रमीश्वरस्याब्रवीद् भवान् ।
कथं सूनुस्वदेहस्य परमस्यात्मनो भवेत् ॥ १५४४ ॥

सत्यार्थ्युवाच ॥

एतेषां भवदीयानां प्रश्नानां यावदुत्तरम् ।
प्रदातुं शक्नुयां तावदधुना कथयाम्यथ ॥ १५४५ ॥
परन्त्वर्थेषु तादृक्षु निगूढेष्वल्पबुद्धिभिः ।
मनुष्यैर्नश्चचेतोभि र्भवितव्यं न संशयः ॥ १५४६ ॥
सम्पूर्णमप्रमेयस्य तत्त्वमीशस्य मानुषीं ।

लघिष्ठा श्रेमुषी सम्यगवगन्तुं न शक्नुयात् ॥ १५४७ ॥
अतः प्रामाणिके शास्त्रे यन्मतं प्रतिपाद्यते ।
दुर्बोधमप्यदस्यक्तुं सहसा नोपयुज्यते ॥ १५४८ ॥
मनुष्याणां परित्राता कथमासीत् प्रयोजनम् ।
इत्यादिर्यो भवत्प्रश्नस्तत्र प्रत्युत्तरं शृणु ॥ १५४९ ॥
नृजातेराद्ययोः पित्रोः प्राप्तो दोषः क्रमागतः ।
तदीयां सन्ततिं कृत्स्नां व्याप्नोदित्यब्रवं पुरा ॥ १५५० ॥
परम्परागतात् तस्माद् दुर्भावाच्च समे नराः ।
आजन्मवासराद् चित्ते दुष्टाः सन्ति निसर्गतः ॥ १५५१ ॥
तस्मात् स्वाभाविकाद् दोषाद् हेतोस्ते च सतीः क्रियाः ।
सम्यक् कर्त्तुं न वाञ्छन्तः सन्ति दुष्कर्मशीलकाः ॥ १५५२ ॥
ईदृग् दुष्कर्मशीलत्वं बालकेष्वपि दृश्यते ।
नाना दोषा ह्यवाप्यन्ते तेषु सत्सु तनुष्वपि ॥ १५५३ ॥
ये ये दोषाङ्कुरास्तेषु बाल्यकालेऽपि चासते ।
ते यौवने प्रफुल्लन्ति दुष्फलं जनयन्ति च ॥ १५५४ ॥
ईदृग् दुष्कर्मशीलत्वं नृषु यद्यपि विद्यते ।
तथापि तेन कस्यापि स्वच्छन्दत्वं न हीयते ॥ १५५५ ॥
यतः स्वभावदुष्टत्वाद् दुष्कृतौ प्रवणा अपि ।
नराश्चेदिच्छवस्तर्हि पापाच्छक्ता निवर्त्तितुम् ॥ १५५६ ॥
अतो यत् सुक्रियास्त्यक्ता नराः कुर्वन्ति कुक्रियाः ॥
तत् स्वेच्छयैव कुर्वन्ति न चावश्यकतावशात् ॥ १५५७ ॥

तस्मात् खेषाच्च दोषित्वमनुभूय स्वचेतसि ।
ते प्रायो व्याकुलाः सन्ति भव्याद् दण्डाच्च विभ्यति ॥ १५५८ ॥
ईदृक् प्रायश्च देशेषु निखिलेषु विलोक्यते ।
लोकेषु सर्ववंश्येषु स्वाघबुद्धिरवाप्यते ॥ १५५९ ॥
स्वकीयैः किल्बिषैर्देवानप्रसन्नान् विचिन्त्य च ।
ते दण्डं दैविकं भव्यमाशङ्कन्ते व्यथार्दिताः ॥ १५६० ॥
अतो भीमस्य कोपस्य शमनाय दिवौकसाम् ।
नाना बलीन् अमी तेभ्य उत्सृजन्ति प्रसादकान् ॥ १५६१ ॥
एतैः प्रसादकैर्यज्ञैः प्रायश्चितैश्च शोधकैः ।
नृणां चित्तेषु तिष्ठन्ती दोषबुद्धिः प्रकाश्यते ॥ १५६२ ॥
स्वपापाद् ह्यात्मनो दण्ड्यांश्चेन्नाज्ञास्यन्नमी जनाः ।
बलींस्ते तर्हि देवेभ्यो नोदस्रक्ष्यन् प्रसादकान् ॥ १५६३ ॥
एतद्दृशीयशास्त्रोक्तैरवतारैश्च पापजा ।
नराणां दुर्गतिस्त्रातुरपेक्षा चापि सूच्यते ॥ १५६४ ॥
यद्यप्यहं हरेरुक्तान् अवतारान् अवास्तवान् ।
मन्ये तथापि तैर्नृणां त्राणाकाङ्क्षा प्रकाश्यते ॥ १५६५ ॥
गीतायाः सुप्रसिद्धाया वक्ष्यमाणे मया स्थले ।
इदं वाक्यं ब्रुवन् कृष्णः शास्त्रकारेण कथ्यते ॥ १५६६ ॥
यथा ॥ यदा यदा हि धर्मस्य ग्लानिर्भवति भारत ।
अभ्युत्थानमधर्मस्य तदाऽऽत्मानं सृजाम्यहम् ॥ १५६७ ॥
परित्राणाय साधूनां विनाशाय च दुष्कृताम् ।

धर्मसंस्थापनार्थाय सम्भवामि युगे युगे ॥ १५६८ ॥
यः सूरिः केशवं तद्वत् प्रवदन्तमकल्पयत् ।
त्रातुर्दैवस्य सोऽपेक्षामन्वभूदिति भाति मे ॥ १५६९ ॥
एनःशुद्धौ बलीभूतं क्षणं यद्यपि नाहृ सः ।
तथापि दुर्गतिर्नृणां तस्य वाक्येन सूच्यते ॥ १५७० ॥
या स्वीयदुष्टताबुद्धि र्मानुषैरनुभूयते ।
तेषां चित्तेषु सा बुद्धिरीश्वरेण व्यधीयत ॥ १५७१ ॥
अघं प्रत्यात्मनः कोपं तथा सूचयतीश्वरः ।
नरांश्च दुःखितांस्त्रातुराश्रयायाचिक्षत्ति ॥ १५७२ ॥
पापेन वस्तुतोऽत्यन्तमप्रसन्नः परेश्वरः ।
अवश्यं तत्कृते दण्डं भोजनीयं न्यरूपयत् ॥ १५७३ ॥
यो लोकश्चेतसा वाचा कर्मणा च निरन्तरम् ।
सम्यक् च नाचरेत् धर्मं स जनो दण्डमर्हति ॥ १५७४ ॥
स्वयं सम्यक् पवित्रात्मा पापास्पृष्टोऽपि चेश्वरः ।
सम्पूर्णं सर्वथा धर्मं नरैः कार्य्यमपेक्षते ॥ १५७५ ॥
परन्तु तादृशं धर्मं नाचरन्तो निरन्तरम् ।
अघ्नेवा ऐश्वरं कोपं दण्डञ्चार्हन्ति मानुषाः ॥ १५७६ ॥
स्वयं मर्त्यैस्तु भोक्तव्यं दण्डमीश्वरनन्दनः ।
लोकेऽवतीर्य्य मर्त्यानां प्रातिनिध्येन भुक्तवान् ॥ १५७७ ॥
पुण्येनौजस्विना तेन कृतमीश्वरसूनुना ।
प्रायश्चित्तं समस्तानां पाप्मनां शुद्धये क्षमम् ॥ १५७८ ॥

बल्यर्थमात्मनो दानं यदसौ ह्यतवान् शुचिः ।
अमुष्य पाविका शक्तिः कथं नाप्रमिता भवेत् ॥ १५७९ ॥
यश्चैकः पाप्मनोदण्डं कर्त्तुं ह्यन्तुञ्च कल्पते ।
स्वयं स ईश्वरो येषूमेनसो ह्यारकं व्यधात् ॥ १५८० ॥
अतस्त्राणाय मर्त्यानामीश्वरेण निरूपितः ।
स त्रातुं कल्पते सम्यगिति कोपि न संशयः ॥ १५८१ ॥
ये त्राणाकाङ्क्षिणो भक्त्या श्रद्धया चाश्रयन्ति तम् ।
धर्मं सदा च वर्त्तन्ते तेषां त्राणं भविष्यति ॥ १५८२ ॥
तथा च मानुषा दण्डादात्मनस्त्रातुमक्षमाः ।
येष्वो द्वारेण निस्तारं प्राप्नुवन्तीति सिद्ध्यति ॥ १५८३ ॥
यथा च मानुषी जाति र्दण्डात् त्राणमपेक्षते ।
तथैव मानसीं शक्तिमपि धर्मस्य सिद्धये ॥ १५८४ ॥
यतः स्वाभाविकाद् दोषात् पापाभ्यासाच्च मानुषाः ।
अघे दृढीकृता धर्मं सन्ति सेधितुमक्षमाः ॥ १५८५ ॥
चिकीर्षन्तोऽपि ते धर्मं न कुर्वन्ति यथेप्सितम् ।
तित्यक्षन्तोऽपि पापानि ते पापेषु पतन्ति च ॥ १५८६ ॥
अतः साहाय्यमप्राप्य धर्माचारार्थमैश्वरम् ।
परेश्वरेष्टमाचारं नराः कर्त्तुं न शक्नुयुः ॥ १५८७ ॥
येषूं ये त्वाश्रिता लोकाः स्थिरास्तिष्ठन्ति सत्पथे ।
अमीभिरान्तरी शक्तिः शुद्धिश्चावाप्यते क्रमैः ॥ १५८८ ॥
किन्त्वस्य विस्तरं विद्वन्नहं वक्ष्यन्नितः परम् ।

इदानीमैश्वरं भावं प्रभोर्यैर्ब्वो वदाम्यथ ॥ १५८९ ॥
किञ्चास्मिन्विषये गूढे यद् वदेयं यथामति ।
भवानपक्षपातेन तत् समस्तं निशाम्यतु ॥ १५९० ॥
अस्त्येक ईश्वरोऽनादिः सर्वशक्तिः सनातनः ।
सर्वज्ञः सत्तमोऽनन्तो दयालुश्चेति मन्महे ॥ १५९१ ॥
परात्मनीश्वरे तस्मिंस्त्वेकस्मिन्नेव सत्यपि ।
व्यक्तीनां त्रयमस्तीति खिस्तीयैर्मन्यते बुधैः ॥ १५९२ ॥
एकस्मिन्नीश्वरे व्यक्तित्रित्ववादि त्विदं मतम् ।
असच्छास्त्रोक्तिबाऊल्यविचारादवगम्यते ॥ १५९३ ॥
पिता पुत्रः पवित्रात्मा चेति भेदस्त्रिरूपकः ।
भूयः परेश्वरोद्देशे शास्त्रकारैः प्रयुज्यते ॥ १५९४ ॥
व्यक्तीनां तादृशं त्रित्वमुच्यते यद्यपीश्वरे ।
तथापि हानिरेकत्वे परेशस्य न जायते ॥ १५९५ ॥
शास्त्राणामस्मदीयानां यतो वाक्येषु भूरिषु ।
एकत्वं परमेशस्य स्पष्टरूपेण कथ्यते ॥ १५९६ ॥
पिता परेश्वरोऽस्त्येव तनयश्च परेश्वरः ।
पवित्रात्मा परेशोऽस्ति चेति मन्यामहे वयम् ॥ १५९७ ॥
त्रयस्तथापि नास्माभि र्मताः सन्ति परेश्वराः ।
व्यक्तित्रित्वेन संयुक्तस्त्वेक एव परेश्वरः ॥ १५९८ ॥

वेदविद्दानुवाच ॥

युष्माभिरीश्वरो विद्वन्नेक एव निरूप्यते ।

एकस्मिन् व्यक्तयस्तिस्रः सम्भवेयुः कथं तदा ॥ १५९९ ॥

सत्यार्थ्युवाच ॥

स्वभावमप्रमेयस्य परमेशस्य मानुषी ।
कनिष्ठा शेमुषी सम्यगवगन्तुं न शक्नुयात् ॥ १६०० ॥
व्यक्तीनामीश्वरस्थानां सम्बन्धः कीदृशो मिथः ।
भेदश्च कीदृगस्तीति मज्ज्ञानादतिरिच्यते ॥ १६०१ ॥
इयन्मात्रन्तु जानीमः समानैरैश्वरै र्गुणैः ।
ऐश्वर्य्यैा व्यक्तयस्तिस्रो विशिष्यन्ते न संशयः ॥ १६०२ ॥
शक्तौ महिम्नि सिद्धौ च सन्ति पित्रादयः समाः ।
तेषामेकैव चेच्छाऽस्ति त्रितयैकत्वशालिनाम् ॥ १६०३ ॥
त्रयः पित्रादयस्ते तु दृशां त्राणस्य साधने ।
विलक्षणानि कर्माणि साधयन्तीति नो मतम् ॥ १६०४ ॥
एवं हि कथ्यते शास्त्रे दृषु प्रीत्वा पितेश्वरः ।
पृथिव्यामात्मनः सूनुं तेषां त्राणाय नुन्नवान् ॥ १६०५ ॥
भावञ्च मानुषं धृत्वा पृथिव्यां सूनुरीश्वरः ।
बलिञ्चात्मानमुत्सृज्य मानुषान् निरतारयत् ॥ १६०६ ॥
पवित्रात्मेश्वरः पित्रा सूनुना च समीरितः ।
श्रद्धां ददाति मर्त्येभ्यस्तच्चित्तानि पुनाति च ॥ १६०७ ॥

वेदविदानुवाच ॥

श्रीयेषूः परमेशस्य कथं पुत्रोऽभिधीयते ।
कथं पितृत्वपुत्रत्वे भवेतां परमात्मनि ॥ १६०८ ॥

सत्यार्थुवाच ॥

पितृत्वपुत्रतात्रुब्दौ प्रयुक्तौ परमात्मनि ।
सम्बन्धमात्मिकं कञ्चिद् गूढं सूचयतोऽद्भुतम् ॥ १६०६ ॥
स ईश्वरीययो र्व्यक्तयोः सम्बन्धः कीदृशोऽस्ति तु ।
इत्यस्य निर्णयो बोधाद् मानुषादतिरिच्यते ॥ १६१० ॥
ईदृक्षे विषये गूढे स्वाज्ञानस्योपरीक्षतिः ।
विज्ञैर्मुदैव कर्त्तव्या तत्र लज्जास्पदं न हि ॥ १६११ ॥
ईदृक्षे विषये यावच्छास्त्रोक्तिभ्योऽवगम्यते ।
तदेव शक्यते ज्ञातुं न किमप्यधिकं ततः ॥ १६१२ ॥
परन्त्वेतस्य गूढस्य विषयस्य परेश्वरः ।
कुत्रापि व्याकृतिं स्पष्टामस्मच्छास्त्रेषु नोक्तवान् ॥ १६१३ ॥
विज्ञानमात्मनो यावद् नृणां त्राणार्थमीश्वरः ।
प्रयोजनीयमज्ञासीद् तावदेव स दत्तवान् ॥ १६१४ ॥
नृणां बुद्धेस्तथा त्वन्ते परेशेन निरूपिते ।
विज्ञाः सन्तोऽत्रुमर्हन्ति गर्ववर्ज्जितचेतसः ॥ १६१५ ॥
भवांस्त्वेतस्य मार्गस्य येन बुध्येत सौष्ठवम् ।
तदर्थमस्य तत्त्वानि वदिष्याम्युपसंहरन् ॥ १६१६ ॥
कीदृक्षा चेश्वरे प्रीतिस्तन्मतस्य विचारणात् ।
सल्लोकैर्युज्यते कर्त्तुं तदप्यत्र वदाम्यथ ॥ १६१७ ॥
नृजातेः पितरावाद्यावनघावीश्वरोऽरृजत् ।
अमू तु स्वेच्छया धर्माद् भ्रष्ट्वा पाप्मन्यपन्नताम् ॥ १६१८ ॥

नृजातेस्तादृशीं दृष्ट्वा दुरवस्थां परेश्वरः ।
अनादिमात्मनः सूनुं तस्यास्त्राणार्थमैरयत् ॥ १६१६ ॥
नृणां त्राणार्थमेतस्य महोपायस्य कल्पने ।
परेशस्योत्तमो न्यायः करुणा च प्रकाशते ॥ १६२० ॥
त्रैलोक्यशासिता न्यायी स्वीयाज्ञाया विलङ्घकान् ।
प्रायश्चित्तं विना क्षन्तुं नहि योग्यममन्यत ॥ १६२१ ॥
भ्रष्टा तु मानुषी जातिः शुद्धं पापस्य शोधकम् ।
प्रायश्चित्तं स्वयं कर्त्तुं नाशकत् पापदूषिता ॥ १६२२ ॥
पापं हर्त्तुं समर्थस्य प्रायश्चितस्य सिद्धये ।
सुपुण्येनेश्वरीयेण लोकेनासीद् प्रयोजनम् ॥ १६२३ ॥
अतोऽनादिः प्रियः पित्रा नुन्नः सन्नीश्वरात्मजः ।
स्वयं नृणां कृते पुण्यः पापघ्नश्चाभवद् बलिः ॥ १६२४ ॥
स्वपार्श्वादात्मनः सूनुं बलिं भव्यं तथोत्सृजन् ।
न्यायं स्वञ्चाद्भुतं प्रेम नृषु व्याञ्जयदीश्वरः ॥ १६२५ ॥
स्वयं स्वादेशभंक्तॄणां हतघ्नानां नृणां कृते ।
प्रियं स्वमीश्वरः पुत्रं ज्योतिर्धामोऽनुदद् भुवि ॥ १६२६ ॥
पृथिव्यां मानुषं भावं ग्राहयित्वा च दुःखितम् । [॥ युग्मम् ॥
व्यथामभोजयद् घोरामिति किं नाद्भुता कथा ॥ १६२७ ॥
पित्रा नुन्नश्च यः सूनुः स्वेच्छयाऽवतरन् भुवि ।
मृत्युं द्विषां हतेऽभुक्त तस्य को वर्णयेद् दयाम् ॥ १६२८ ॥
तेजः स्वमैक्षमाच्छाद्य शिशुरुत्पद्य भूतले ।

स विष्टपस्य नाथोऽपि दीनो मर्त्य इवाचरत् ॥ १६२९ ॥
अज्ञानां शिक्षको धीरो हितकारी च दुःखिनाम् ।
अपूर्वं सर्वथा प्रेम स नरान् प्रत्यदर्शयत् ॥ १६३० ॥
तीव्राश्च वेदनां भुक्त्वा परपापस्य शुद्धये ।
स्वयं स स्वेच्छया मृत्युं मलास्पृष्टोऽपि सोढवान् ॥ १६३१ ॥
येषां चित्तानि पाषाणादपि कुण्ठानि नासते ।
प्रीयेरन् किं न ते तस्मिन् परमप्रेमकारिणि ॥ १६३२ ॥
तथा त्राणं तु मर्त्यानां साधयित्वा स्वमृत्युना ।
स ईश्वरात्मजो मृत्योः पाशान् शक्त्या स्वयाऽभनक् ॥ १६३३ ॥
स्वज्योतिर्धाम चारुह्य पितुः स्वस्यान्तिकं पुनः ।
स लोकमात्मना त्रातं दयादृष्ट्या विलोकते ॥ १६३४ ॥
लोकस्यान्ते च तेजस्वी स येषूरीश्वरात्मजः ।
समस्तानां मनुष्याणां विचारायागमिष्यति ॥ १६३५ ॥
मनुष्याणां यथाकर्म गतिं निर्णीय धर्मतः ।
स सद्भ्यः सद्गतिं दाता दुरात्मभ्यश्च दुर्गतिम् ॥ १६३६ ॥
यस्तादृशोऽस्ति तेजीयानप्रमेयपराक्रमः ।
तं को वा बुद्धिमान् भीत्या श्रद्धया चापि नाश्रयेत् ॥ १६३७ ॥
पवित्रेणात्मना नीता ये श्रद्धां येष्वि कुर्वते ।
चेतःशुद्धौ च चेष्टन्ते ते जनास्त्राणमाप्नुयुः ॥ १६३८ ॥
जगत्त्रातुस्तु ये तस्य वार्त्तामाकर्ण्य मङ्गलाम् ।
दुराग्रहाद् निरस्यन्ति ते गमिष्यन्ति दुर्गतिम् ॥ १६३९ ॥

पवित्रस्यात्मनो ये तु प्रार्थयन्ते सहायताम् ।
ते तामवाप्नुयुः सर्वे इति शास्त्रात् प्रतीयते ॥ १६४० ॥

॥ यथा लूकरचितसुसंवादे उक्तम् ॥

याचध्वं तर्हि दीयेत मृगयध्वं तदाऽऽप्स्यथ ।
यत्नेन चाहत द्वारं ततश्चोद्घाटयिष्यते ॥ १६४१ ॥
यो याचते स आप्नोति योऽन्विच्छति स विन्दति ।
यो यश्च द्वारमाहन्ति तत्तदर्थाय मुच्यते ॥ १६४२ ॥
पुत्राय कः पिताऽश्मानं वितरेत् पिष्टकार्थिने ।
को वा भुजङ्गमं दद्यात् सूनवे मीनमिच्छते ॥ १६४३ ॥
अतोऽसन्तोऽपि चेद् यूयं पुत्रेभ्यः सन्ति यच्छथ ।
ईशः पवित्रमात्मानं किं पुनर्वो न दास्यति इति ॥ १६४४ ॥

सत्यार्थ्युवाच ॥

लोके खिस्तीयनामानो विलोक्यन्ते तु ये जनाः ।
खिस्तीया वास्तवाः सर्वे ते सन्तीति न मन्यताम् ॥ १६४५ ॥
खिस्तीयाख्या हि भूयांसो येषूं स्वीकृत्य बाह्यतः ।
भक्त्या हीनास्तु संसारे हृदयं युञ्जते दृढम् ॥ १६४६ ॥
भक्त्या तु ये जना येऽपि विश्वसन्तः परेश्वरम् ।
प्रेम्णा भयेन चार्चन्ति ते तथ्याः खिस्तसेवकाः ॥ १६४७ ॥
तैर्यद्यप्यत्र संसारे पूर्णा सिद्धिर्न लभ्यते ।
धर्मे तथापि ते दृढ्यं प्राप्नुवन्त्युत्तरोत्तरम् ॥ १६४८ ॥
पवित्रस्यात्मनः शक्त्या धर्ममार्गे दृढीकृताः ।

सदा ते चेतसः शुद्धौ वर्द्धन्ते सुक्रियासु च ॥ १६४९ ॥
विश्वेषो येन सत्यानां खिस्तीयानां प्रतीयताम् ।
तदर्थं तादृशां पुंसां कर्त्तुमर्हामि वर्णनम् ॥ १६५० ॥
खिस्तीयो वास्तवो योऽस्ति स जनः परमेश्वरम् ।
भक्तेन चेतसा नित्यमादरेण च सेवते ॥ १६५१ ॥
तदीयामर्मितां शक्तिं बुद्धिं सिद्धिमनुग्रहम् ।
ध्यात्वा स तं प्रभुं प्रेम्णो विषयं वेद सत्तमम् ॥ १६५२ ॥
विश्वालं जीविभिः पूर्णं जगदेतत् ससर्ज यः ।
बिभर्त्ति शास्ति चामुष्य महिमा कीदृगद्भुतः ॥ १६५३ ॥
त्रिलोक्या यः क्रमं सम्यक् स्थापयित्वा नियच्छति ।
त्रिकालवेदिनः कीदृगचिन्त्या तस्य शेमुषी ॥ १६५४ ॥
नाना सुखानि यो नृभ्यः कृतघ्नेभ्योऽपि यच्छति ।
औदार्य्यशेवधेस्तस्य कीदृशी परमा दया ॥ १६५५ ॥
विश्वेषतश्च यः स्वीयं सूनुमुत्सृज्य सुप्रियम् ।
दृजातेर्मुक्तये ऽनैात्सीत् तस्य कः प्रेम वर्णयेत् ॥ १६५६ ॥
इत्यादितत्त्वमीशस्य चिन्तयन्तश्चमत्कृताः ।
खिस्तीया वास्तवा भक्तिं दृढां कुर्वन्ति तं प्रति ॥ १६५७ ॥
भक्त्या प्रभूतया यस्य चित्तमाविश्यते तथा ।
सदा स ईश्वरस्येष्टं कर्त्तुं यत्नेन चेष्टते ॥ १६५८ ॥
इच्छां न मामिका किन्तु परेशस्य भवत्विति ।
स आह स्वीयचित्तस्थां स्वार्थलिप्सां निवारयन् ॥ १६५९ ॥

दयां निरन्तरं दिव्यां यः प्रकाशितवान् मयि ।
तस्मायात्मानमुत्सृष्टुमर्हामीति ब्रवीति च ॥ १९९० ॥
परेश्वरस्य सेवार्थं तथैवात्मानमुत्सृजन् ।
लोकेभ्यः स्वार्थलिप्सुभ्यो बऊ धन्यतरोऽस्ति सः ॥ १९९१ ॥
स्वेच्छायास्तादृग् उत्सर्गः परेशस्य कृते कृतः ।
मर्त्यानामुत्तमो धर्मः परमाऊादकारकः ॥ १९९२ ॥
तथापि साधुभिर्लोकैः संसारस्त्यज्यतामिति ।
एतत् खिस्तीयशास्त्रेषु न कुत्रापि विधीयते ॥ १९९३ ॥
सिद्धिर्नृणां प्रवृत्त्यैव न निवृत्त्या हि लभ्यते ।
स्वभावं तादृशं तेषां विदधौ परमेश्वरः ॥ १९९४ ॥
विनाऽभ्यासेन विद्याया व्युत्पत्तिर्नैव गम्यते ।
तथा यत्नान्वितोऽभ्यासो धर्मवृद्ध्यायपेक्ष्यते ॥ १९९५ ॥
अत्यन्तलोभकामाद्या येऽन्तःस्थाः शत्रवो नृणाम् ।
विजेतुं ते न शक्येरन् नियताद् विग्रहाद् विना ॥ १९९६ ॥
अतः सिद्धेरवाप्त्यर्थं दृढा यत्ना निरन्तरम् ।
सल्लोकैः कर्त्तुमर्ह्यन्ते निवृत्त्या सा हि नाप्यते ॥ १९९७ ॥
स्वभावतः प्रवृत्तिश्च निवृत्तेर्व्यतिरिच्यते ।
निवृत्तिरस्ति बन्ध्या हि प्रवृत्तिस्तु फलप्रदा ॥ १९९८ ॥
ये ये हि सत्तमा ज्ञाताः पुरुषार्था मनीषिभिः ।
अमी समे प्रवृत्त्यैव लभ्याः सन्ति न चान्यथा ॥ १९९९ ॥
निवृत्तिमाचरन् यस्तु लोको धन्वनि तिष्ठति ।

तदीया क्षीयते बुद्धिश्चित्तवृत्तिश्च शुष्यति ॥ १६७० ॥
व्यायाममन्तरा देहं निर्बलं जायते यथा ।
तथैव मानसी शक्ति र्वनप्रस्थस्य सीदति ॥ १६७१ ॥
आलस्यात् स स्वयं सिद्धो विद्यायाञ्च न वर्द्धते ।
नृणां सङ्गाद् विरक्तात्मा परान् नोपकरोति च ॥ १६७२ ॥
यान् कौटुम्बादिकान् नृणां सम्बन्धान् ईश्वरो व्यधात् ।
तेभ्यो नाना प्रजायन्ते नृणां धर्माः परस्परम् ॥ १६७३ ॥
यथा यो वर्त्ततेऽन्योन्यं सम्बन्धस्तातपुत्रयोः ।
तस्माद् धर्मौ प्रजायेते ताभ्यां कार्य्यौ विलक्षणौ ॥ १६७४ ॥
सूनुः पितुर्वशे तिष्ठन्नमुमाहर्त्तुमर्हति ।
सूनुश्च शासितुं सम्यग् भर्त्तुञ्चार्हति तत्पिता ॥ १६७५ ॥
एकस्य चात्मजाः सन्त ईश्वरस्य नराः समे ।
भ्रातृत्वहेतुनाऽर्हन्ति हितमाचरितुं मिथः ॥ १६७६ ॥
स्वान् स्वान् सर्वे जना धर्मान् परसम्बन्धिनो यदि ।
न कुर्य्युस्तर्हि सर्वेषां कथं सिद्धेत् हितं नृणाम् ॥ १६७७ ॥
सर्वे स्वं स्वं तु चेद् धर्ममाचरेयुः परान् प्रति ।
सर्वेषां तर्हि कल्याणं सुष्ठु सिद्धेद् न संशयः ॥ १६७८ ॥
अतः परार्थकान् धर्मान् आचरेयुः समे नराः ।
इतीयमीश्वरस्येच्छा सुतरामनुमीयते ॥ १६७९ ॥
पदव्यामीश्वरो यस्यां मां प्रवृत्त्यै नियुक्तवान् ।
तदीयकार्य्यमर्हामि सदा कर्त्तुमहं मुदा ॥ १६८० ॥

मह्यं कृत्वायिदं कार्य्यं जगत्कर्त्रा समर्पितम् । [युग्मम् ॥
नार्हामि स्वेच्छया त्यक्तुमिति भक्ता जना विदुः ॥ १६८१ ॥
स्वक्लेशकारिभिर्भ्रान्तैर्नं प्रसन्नस्तपस्विभिः ।
ईशः सुखं मितत्वेन सद्भि र्भोक्तव्यमिच्छति ॥ १६८२ ॥
प्रत्येकं वासरे ध्यानं भजनञ्च मुहुर्मुहुः ।
सल्लोकैर्युज्यते कर्त्तुमीश्वरस्य न संशयः ॥ १६८३ ॥
त्यक्ता त्वन्यानि कार्य्याणि भजनं तस्य केवलम् ।
नरा विदध्युरित्येतद् युक्तिसिद्धं न विद्यते ॥ १६८४ ॥
अजस्रं ह्यात्मनो ध्यानं कार्य्यं नेच्छन् परेश्वरः ।
प्रवृत्तिं सफलां सर्वैः सद्भिः कृत्यामपेक्षते ॥ १६८५ ॥
या स्वस्य चेतसः शुद्धिं बुद्धेः शक्तिञ्च वर्द्धयेत् ।
परोपकारिणी स्याद्वा सा प्रवृत्तिः फलप्रदा ॥ १६८६ ॥
स्वीयस्य श्रमणः किंवा परकीयस्य वर्द्धिका ।
ईदृक् प्रवृत्तिरीशाय रोचते नात्र संशयः ॥ १६८७ ॥
परेश्वरं तु पार्श्वस्थं स्मरन्तः सर्वदर्शिनम् ।
तस्याभीष्टानि कर्माणि सदा कुर्वन्तु साधवः ॥ १६८८ ॥
साधूनां या प्रवृत्तिस्तु स्त्रियानां विलोक्यते ।
सा प्रेम्णो जायते निष्ठात् तेषां हृत्स्त्रीश्वरं प्रति ॥ १६८९ ॥
स्वं सूनुं प्रेरयन् यो मां त्रातवान् परमेश्वरः ।
तदिच्छासिद्धये यत्नं कर्त्तुमर्हामि सर्वदा ॥ १६९० ॥
यो मे त्राणाय चात्मानं येषूत्सृष्टवान् बलिम् ।

तस्मायात्मानमुत्क्षष्टुमर्हामीति वदन्ति ते ॥ १६९१ ॥
अतस्ते प्रेमयुक्तेन कृतज्ञत्वेन चोदिताः ।
सुयत्नेनेश्वरेष्टेषु प्रवर्त्तन्ते सुकर्मसु ॥ १६९२ ॥
स्वीयैस्तु कर्मभिस्त्राणं लभ्यं नैव विदन्ति ते ।
प्रायश्चित्तीकृतस्यैव येष्वो द्वारा तु केवलम् ॥ १६९३ ॥
सर्वे हि पाप्मना स्पृष्टा मानुषा मरणावधि ।
त्राणं स्वकर्मभिः प्राप्तुं साधवोऽपि न शक्नुयुः ॥ १६९४ ॥
शेषे सन्तस्तु संसारादुद्धृताः क्लेशदायकात् ।
सिद्धिं परत्र सम्पूर्णां शं चाप्स्यन्ति शाश्वतम् ॥ १६९५ ॥

वेदविद्दानुवाच ॥

युष्मच्छास्त्रेषु या सिद्धिरुच्यते पारलौकिकी ।
भवांस्तस्याधिकं कञ्चिद् विस्तरं वक्तुमर्हति ॥ १६९६ ॥
एतद्देशीयशास्त्रेषु यो ब्रह्मण्युच्यते लयः ।
स एव मुक्तिभेदोऽपि युष्मच्छास्त्रेषु किं मतः ॥ १६९७ ॥
उताहु योऽस्मदीयेन कर्ममार्गेण लभ्यते ।
तं स्वर्गमेव किं यूयं परमत्वेन बोधथ ॥ १६९८ ॥

सत्यार्थ्युवाच ॥

या पारलौकिकी सिद्धिरस्मच्छास्त्रेषु कथ्यते ।
असौ लयात्मिका नास्ति लीनत्वात्तु विलक्षणा ॥ १६९९ ॥
मदीयायां मतौ विद्वन् जीवात्मा परमात्मनः ।
भिन्नो निसर्गतो भूत्वा तस्मिँल्लेतुं न शक्नुयात् ॥ १७०० ॥

युष्मच्छास्त्रे च यः स्वर्गः प्रोक्तः स्थूलसुखालयः ।
तस्माद् विलक्षणः स्वर्गः शास्त्रेऽस्माकमुच्यते ॥ १७०१ ॥
अस्मच्छास्त्रे सतां वासो नाके भावीति कथ्यते ।
किन्त्वत्र नाकशब्देन सत्त्वलोको विवक्षितः ॥ १७०२ ॥
कीदृक् तु निर्मलं शर्म मयैतर्हि विवक्षितम् ।
इत्यस्य स्पष्टबोधाय विस्तरोऽयं निशम्यताम् ॥ १७०३ ॥
यत् सर्वं विविधं दुःखं मनुष्यैरत्र भुज्यते ।
तत् तेषामादिभावस्य दूषणादुदपद्यत ॥ १७०४ ॥
यदा मनुष्यवंशस्य पितरावीश्वरोऽसृजत् ।
स्वभावस्तर्हि निर्दोषः संसिद्धश्चाभवत् तयोः ॥ १७०५ ॥
स्वभावे तत्र निर्दोषे भावा रागादयः समे ।
नियन्तुरात्मनः सम्यग् वशीभूता स्तदाऽऽसत ॥ १७०६ ॥
तदानीं सारथिर्ह्यात्मा हयानिन्द्रियरूपकान् ।
विनीतान् सेवकान् नीत्वा नियथाम यथेप्सितम् ॥ १७०७ ॥
यदा तैः त्वादिमात् स्वस्मात् सिद्धाद् भावादपन्नताम् ।
प्रगाढो व्युत्क्रमस्तर्हि स्वभावे प्राविशत् तयोः ॥ १७०८ ॥
तदा रागादयो भावाः सर्वे जाता निरङ्कुशाः ।
नियन्तुरात्मनो निघ्नाः पूर्ववद् नावतस्थिरे ॥ १७०९ ॥
आत्मा च तै र्बलीयोभिः क्लृप्तो रागादिभिः स्वयम् ।
तदीयमिष्टमाचारीद् अधिकारं निजं त्यजन् ॥ १७१० ॥
स्वभावे व्युत्क्रमं तद्वदापन्ना मानुषाः समे ।

अत्याचारं बज्रं कृत्वा भृशं किल्बिषिणोऽभवन् ॥ १७११ ॥
स्वभावे मानुषे तद्वत् पाप्मना दूषिते सति ।
अवश्यमेव सम्भूति र्बभूवाज्ञानदुःखयोः ॥ १७१२ ॥
एतस्या वर्त्तमानाया दुर्दशाया निवृत्तये ।
नृणां दुष्टस्य भावस्य सुस्थीभूतिरपैक्ष्यत ॥ १७१३ ॥
स्वभावे मानुषे चेद्धि पुनः स्थाप्येत सुक्रमः ।
अज्ञानदुःखयोस्तर्हि नष्टयोः सिद्धिरुद्भवेत् ॥ १७१४ ॥
परेश्वरात्मजो भावं स्वयमादाय मानुषम् ।
नृणां जातिं व्यधात् सिद्धे र्महिम्नश्चाधिकारिणीम् ॥ १७१५ ॥
पूर्णा सिषित्सुभिः सिद्धि र्यद्यपीह न गम्यते ।
तथापि तेऽधिकां शुद्धिं प्राप्नुवन्ति शनैः शनैः ॥ १७१६ ॥
बलात्कारे हि भावानां तेषु क्षीणे क्रमात् क्रमात् ।
नियन्तुरात्मनः शक्तिरधिकारश्च वर्द्धते ॥ १७१७ ॥
किन्त्वस्यां संहतौ सम्यग् दोषाद् दुःखाच्च साधवः ।
मुक्ता भवेयुरित्येतद् नेश्वरेण विधीयते ॥ १७१८ ॥
असिद्धेर् आस्पदाद् अस्मात् संसारात्तु समुद्धृताः ।
अमुत्र सज्जनाः सिद्धिं शर्म चाप्स्यन्ति शाश्वतम् ॥ १७१९ ॥
कीदृक् त्वामुष्मिकी सिद्धिरानन्दश्च भविष्यति ।
इत्यस्मिन्विषये चर्चां वक्ष्यमाणां निशामयतु ॥ १७२० ॥
सद्भिर्यदत्र संसारे सत्तमं भुज्यते सुखम् ।
तस्मात् परत्र भव्यस्य शर्मणस्तत्त्वमूह्यते ॥ १७२१ ॥

येा भोजनादिजो भोगो हृषीकैरनुभूयते ।
स्थूलस्य तस्य मुख्यत्वं न मन्यन्ते मनीषिणः ॥ १७२२ ॥
यावच्च सज्जनः कोपि शुद्धो सिद्धो च वर्द्धते ।
तावत् स तादृशं भोगं स्थूलं तुच्छञ्च बोधति ॥ १७२३ ॥
तस्मात् सन्तश्च सत्सङ्गे विद्यायां दीनसत्कृतौ ।
ईशस्य प्रेम्णि चासक्तास्तत्र श्रेष्ठं सुखं विदुः ॥ १७२४ ॥
अतो विज्ञा यदत्रापि स्थूलं तुच्छञ्च मन्वते ।
तद् मैथुनादिजं सौख्यं लोम्नाऽमुत्रेति बुध्यते ॥ १७२५ ॥
एतच्च मद्वचो विद्वन् येष्वा वाक्येन सिद्ध्यति ।
स ह्येवमेकदा स्पष्टं यद्भदीयानभाषत ॥ १७२६ ॥

श्रीयेषूरुवाच ॥

एतस्याः संसृतेर्लोका व्युह्यन्ते विवहन्ति च ॥ १७२७ ॥
पात्राणि ये तु गण्यन्ते समारोढुमदो जगत् ।
ते खर्दूतोपमा नैव व्युह्यन्ते विवहन्ति वा ॥ १७२८ ॥

सत्यार्थुवाच ॥

सुखानि यानि सर्वाणि सत्तमानि भवन्ति तु ।
कदाप्यमुत्र तल्लोपो न भवेदिति मन्महे ॥ १७२९ ॥
वरं यद्यत् सुखं श्रेष्ठं सत्तमञ्चेह भुज्यते ।
अचिन्त्या तस्य संवृद्धिः सिद्धिश्चामुत्र भाविनी ॥ १७३० ॥
परत्र पापमज्ञानं शोको रोगो भयं श्रमः ।
सर्वादोषश्चः मुक्तेषु सत्सु लोकेषु लोप्स्यते ॥ १७३१ ॥

तदा ह्यनश्वरं दिव्यं कायमापद्य सज्जनाः ।
स्वभावे सुक्रमं नूनं सिद्धिञ्चाप्स्यन्ति सत्तमाम् ॥ १७३२ ॥
तत् त्वस्मदीयशास्त्रेषु सूक्ष्मत्वाद् आत्मिकं वपुः ।
आख्यातमात्मनो यच्चमुपयुक्तं भविष्यति ॥ १७३३ ॥
तत् सूक्ष्मं निर्मलं देहम् आत्मनो वृत्तिमीप्सिताम् ।
अरुद्धा सम्यगायत्तमाज्ञाकारि च वेत्स्यते ॥ १७३४ ॥
सिद्धं स्वभावमापद्य मुक्ता लोकास्तु तादृशम् ।
सम्पूर्णतृप्तिदं शर्म सदा प्राप्स्यन्ति सत्तमम् ॥ १७३५ ॥
बलात्कारे हि भावानां निवृत्ते भ्रान्तिकारके ।
अर्थेषु सत्तमेष्वात्मा व्यवसास्यति सन्ततम् ॥ १७३६ ॥
तत्त्वस्याच्छादके नष्टे सति चाज्ञानशीकरे ।
यथार्थं तात्त्विकं ज्ञानं सद्भिरालोकयिष्यते॥ १७३७ ॥
असम्यगत्र या विद्या प्रयासे न च गम्यते ।
सम्यक् सुखञ्च साऽमुत्र प्रभाविन्याऽऽप्स्यते धिया ॥ १७३८ ॥
मुक्तैः सर्वज्ञताऽमुत्र प्राप्तव्येति न मन्यताम् ।
प्रमेयबुद्धयो ह्येतां कदाप्याप्तुं न शक्नुयुः ॥ १७३९ ॥
तेषां धीशक्तयः सौक्ष्म्यं विस्तारञ्चाधिरुह्य तु ।
सुगूढान् विषयान् बोद्धुं भवितारः क्षमास्तदा ॥ १७४० ॥
अमुत्र संशये वीते निश्चयः सम्यगाप्स्यते ।
अर्थाश्चैतर्हि दुर्ज्ञेया वेत्तारोऽमुत्र सुग्रहाः ॥ १७४१ ॥
सदा च वर्द्धमानेन नाना ज्ञानेन मोदितः ।

अन्यैश्च सत्तमैरर्थैरात्मा तर्प्स्यति शाश्वतम् ॥ १७४२ ॥
किञ्चात्र शर्मणो बुद्धि र्मन्दा कुण्ठा च विद्यते ।
भृशं त्वमुत्र जीवस्य तेजः स्फूर्त्तिश्च वेत्स्यते ॥ १७४३ ॥
दौर्बल्ये चाखिले वीते दिव्ये प्राप्तेऽपि चौजसि ।
आत्मा विमोक्ष्यते श्रान्तेः सन्ततञ्चोल्लसिष्यति ॥ १७४४ ॥
नरैः सिद्धीक्षतैः साकं स्वर्दूतैश्च प्रतापिभिः ।
अजस्रं सङ्गतिं सन्तः करिष्यन्ति विनोददाम् ॥ १७४५ ॥
विश्वेषतस्तु यत् तत्र परमेशस्य दर्शनम् ।
मुक्तैर्लभ्येत तत् तेषां परमानन्ददं भवेत् ॥ १७४६ ॥
कार्य्याणि कर्त्तृजन्यानि विलोक्यन्तेऽत्र केवलम् ।
परत्र कारणं द्रष्टुं विन्देमेति सतां स्पृहा ॥ १७४७ ॥
अमुत्र कायिकैर्नैत्रै र्निराकारः परेश्वरः ।
दृश्यो भावीति भो विद्वन् मया नास्ति विवक्षितम् ॥ १७४८ ॥
तस्यानुभूय सान्निध्यं कथञ्चिज् ज्ञानचक्षुषा ।
आत्मा तदीयसत्त्वस्य पर्य्यालोकेन तर्प्स्यति ॥ १७४९ ॥
आत्मा हि मानुषः सर्वैरत्तृप्तो विषयान्तरैः ।
तितर्षुरीश्वरं ज्ञातुं विषयोत्तममिच्छति ॥ १७५० ॥
ज्ञानञ्च तस्य यत् सम्यगिह लब्धुं न शक्यते ।
तद् आत्मा निर्मलोऽमुत्र सम्यगासादयिष्यति ॥ १७५१ ॥
पूर्णं तस्याप्रमेयस्य महिमानं प्रमेयधीः ।
नृजातिस्तत्र जानीयादिति विद्वन् न मन्यताम् ॥ १७५२ ॥

किन्त्वीश्वरस्य ते सम्यग् धीप्रमाणानुसारि च ।
ज्ञानं परत्र विन्देयु रिति मात्रं विवक्षितम् ॥ १७५३ ॥
तं ज्ञानस्याकरं नित्यं सत्त्वसिन्धुं दयार्णवम् ।
मुद्धान्तरेक्षणाः सन्तो ध्यात्वा तर्प्स्यन्ति सन्ततम् ॥ १७५४ ॥
अपास्ते चेश्वरीयस्य महाकोपस्य साध्वसे ।
ते स्वान् प्रत्यक्षयां प्रीतिमैश्वीं ज्ञास्यन्ति भाविनीम् ॥ १७५५ ॥
यो मर्त्यभावमादाय तेषां त्राताऽभवत् स्वयम् ।
अमुष्य दर्शनाद् येष्वस्तेऽति प्राप्स्यन्ति नन्दथुम् ॥ १७५६ ॥
तेजस्वि देहमादाय राजमानो ह्यसौ दिवि ।
सल्लोकैरात्मना त्रातै र्ईड्यते सद्गुणार्णवः ॥ १७५७ ॥
नामुत्र ध्यानमात्रेण कालं नेष्यन्ति सज्जनाः ।
माना प्रवर्त्तितारस्तु प्रारम्भेष्यिति तर्क्यते ॥ १७५८ ॥
मनुष्या ह्यत्र संसारे निसर्गात् प्रविरलत्सवः ।
प्रवृत्तिश्चालिनोऽमुत्र स्थास्यन्तीत्यनुमीयते ॥ १७५९ ॥
अत्यन्तां तेजसो वृद्धिं भक्तेश्चात्मा परत्र ते ।
महाचरित्रसिद्ध्यर्थं भविष्यन्त्यधिकारिणः ॥ १७६० ॥
अतस्ते तादृशं तर्हि दिव्यमापद्य विक्रमम् ।
उद्योगेभ्यो निवर्त्तेरन्निति सम्भावि नास्ति तत् ॥ १७६१ ॥
कीदृक्षु ते विशेषेषु व्यवसास्यन्ति कर्मणाम् ।
इत्येतत् साम्प्रतं विद्वन् सम्यग् ज्ञातुं न शक्यते ॥ १७६२ ॥
नाना परोपकारादावीश्वराभीष्टकर्मणि ।

तेषां प्रवृत्तये योगो भवितेति मया मतम् ॥ १७६३ ॥
ते मुक्तिभागिनो लोकाः प्रवृत्ताख्वपि कर्मसु ।
न तेषां साधने क्लेशं न वाऽऽयासमवाप्नुयुः ॥ १७६४ ॥
विमुक्ताः सर्वथा दुःखाद् दौर्बल्याच्चाखिलादमी ।
विनोदेनेश्वरादिष्टाः करिष्यन्त्यखिलाः क्रियाः ॥ १७६५ ॥

वेदविद्वानुवाच ॥

भवान् एतर्हि लोकानां विमुक्तानां सदेहताम् ।
प्रवृत्तिं भाविनीञ्चाह तत्र शङ्कां शृणोतु मे ॥ १७६६ ॥
अस्मच्छास्त्रेषु या सिद्धिः परमा प्रतिपाद्यते ।
निर्देहस्यात्मनो मुक्तिः साऽस्ति कैवल्यरूपिका ॥ १७६७ ॥
आत्मा च सत्तमां प्राप्य तामवस्थां प्रशान्तिभाक् ।
निरीहः सर्वकर्मभ्यः स्पृहाभ्यश्च निवर्त्तिता ॥ १७६८ ॥
भवांस्तु यां स्वशास्त्रोक्तां भाविनीमाह सद्गतिम् ।
अमूं देहादियुक्तत्वाच्छ्रेष्ठां मन्तुं न शक्नुयाम् ॥ १७६९ ॥

सत्यार्थुवाच ॥

असिद्धेः कारणं देहं प्रवृत्तिर्दोषजाऽस्ति च ।
इत्यत्रत्येषु शास्त्रेषु कथ्यतेऽत्र न संशयः ॥ १७७० ॥
परन्तु तन्मतं विद्वन्नहं युक्तिभिरज्झितम् ।
विचार्य्य सम्मतिं तत्र मते कर्त्तुं न शक्नुयाम् ॥ १७७१ ॥
आत्मानं वर्ष्मणा सार्द्धं समायोज्य परेश्वरः ।
नृणां पितामहावाद्यौ सिद्धभावौ पुराऽसृजत् ॥ १७७२ ॥

तथा नृणां स्वभावस्य सर्गात् सिद्ध्यर्थमात्मनः ।
शरीररूपकं यन्त्रमपेक्ष्येतेति बुध्यते ॥ १७७३ ॥
विना हि कायरूपेण यन्त्रेणात्मा क्रियाक्षतौ ।
अशक्तो व्यर्थयत्नश्च भवेदित्यनुमीयते ॥ १७७४ ॥
प्रवृत्त्यैचात्मनो यद्वदवश्याऽस्ति तनूरिह ।
तथा परत्र भव्येति युक्तिसिद्धं प्रतीयते ॥ १७७५ ॥
असौ शुद्धीक्षता सम्यक् तनुः सूक्ष्मीक्षताऽपि च ।
नियन्तुरात्मनो दासी भविता सहकारिणी ॥ १७७६ ॥
पुनश्च चेत् सदेहस्य न भवेद् मुक्तिरात्मनः ।
मनुष्यत्वस्य कृत्स्नस्य तदा मुक्तिर्न वेत्स्यते ॥ १७७७ ॥
नृणां द्विवस्तुको भावो ह्यस्ति नो चैकवस्तुकः ।
स ह्यात्मदेहयोर्योगादुभयोरवतिष्ठते ॥ १७७८ ॥
अतो यथाऽऽत्मनो नाशे भूते नश्येद् मनुष्यता ।
तथा लोपाच्छरीरस्य विलुप्येत मनुष्यता ॥ १७७९ ॥
नरास्तु स्वस्य नेच्छन्ति मनुष्यत्वस्य नाशनम् ।
स्थितिं तु शाश्वतीं तस्य शुद्धीभूतस्य सर्वथा ॥ १७८० ॥
मनुष्यत्वस्य शाश्वत्याः स्थितेर्या लालसा त्वियम् ।
अस्मन्मतेन साऽमुत्र सम्यक् तृप्तिमवाप्स्यति ॥ १७८१ ॥
यतस्तस्यानुसारेण मनुष्यत्वं न नंक्ष्यति ।
एकैको मानुषोऽमुत्र पुनः स्वं देहमाप्स्यति ॥ १७८२ ॥
युष्मन्मतं तु चेत् तथ्यं भवेत् तर्हि मनुष्यता ।

परत्रापत्स्यते लोपम् आत्मा स्थास्यति केवलः ॥ १७८३ ॥
मनुष्यत्वस्य तादृक् तु लोपो नृभ्यो न रोचते ।
तस्मात् स्वाभाविकी तेषां लालसा न हि तृप्यति ॥ १७८४ ॥
नृजातौ लालसा त्वेषा परेशेन विधीयते ।
स्वभावं मानुषं कृत्स्नमसावेव हि सृष्टवान् ॥ १७८५ ॥
नराणां यस्तु चित्तेषु तादृशीं लालसां व्यधात् ।
इमां स ईश्वरोऽमुत्र तर्पयेदिति तर्क्यते ॥ १७८६ ॥
अतो मुक्तिः सदेहानां पूर्णमानुष्यशालिनाम् ।
लोकानां भाविनीत्येतद् मतं युक्त्योपपाद्यते ॥ १७८७ ॥
भावानां दोषहेतुत्वं भवान् यच्चाह सम्मति ।
अथैतदुत्तरं तस्य वक्ष्यमाणं निशाम्यतु ॥ १७८८ ॥
यत्काले आदिमौ नृणां पितरावीश्वरोऽसृजत् ।
तदा रागादिभिर्भावै र्युक्तौ तौ सृष्टवानसौ ॥ १७८९ ॥
उभौ तु तौ तदा सिद्धावास्तां सृष्टेरनेहसि ।
तयोश्च दोषलेशोऽपि नासीद् भावाश्रयोरपि ॥ १७९० ॥
अतो दोषो न भावानां सत्त्वमात्रात् प्रजायते ।
बलात्काराच्तु भावानां आत्मनो न सतां वशे ॥ १७९१ ॥
भावाः स्वभावतः सिद्धे र्न भवन्ति विरोधकाः ।
सिद्धेस्तु वर्द्धकाः सन्ति सदर्थेषु प्रवर्त्तकाः ॥ १७९२ ॥
भावास्त्वेतर्हि यद् विघ्नसिद्धेः सन्ति हेतवः ।
सिद्धेश्च रोधका स्तत्र द्वयमेवास्ति कारणम् ॥ १७९३ ॥

तत्रादौ तेऽखिला भावा आत्मनो न स्थिता वशे ।
स्वेष्टार्थप्रार्थिनो भूत्वा नरान् कर्षन्त्यसत्पथम् ॥ १७९४ ॥
पुनश्च ते समे भावा प्रायो दुर्विषयार्थिनः ।
त्यजन्ति सत्तमानर्थान् आसज्यन्तेऽधमेषु च ॥ १७९५ ॥
अर्था ये ये समैर्लोकैरन्विष्यन्ते स्वभावतः ।
एवं तेऽर्था विभज्यन्ताम् उत्तमाधममध्यमाः ॥ १७९६ ॥
यथा परस्य या हिंसा साऽधमार्थेषु गण्यते ।
मिता त्वर्थस्य सम्पत्तिर्मध्यमार्थेषु मन्यताम् ॥ १७९७ ॥
पुनश्च चेतसः शुद्धिरुत्तमार्थेषु विद्यते ।
परेश्वरस्य सेवा तु सर्वेष्वर्थेषु सत्तमा ॥ १७९८ ॥
हृद्भ्रवाख्वात्मना नीताः सकलान् विषयान् यदि ।
यथागुणं निषेवेरंस्तर्हि सिद्धि नृणां भवेत् ॥ १७९९ ॥
अर्थान् हि योऽधमांस्त्यक्त्वा मध्यमान् मध्यमेच्छया ।
श्रेष्ठान् सेवेत चात्यन्तमसौ सिद्धो भवेत् पुमान् ॥ १८०० ॥
तस्माद् रागादिभावानां सत्त्वाद् दोषो न जायते ।
नृणां स्वभावदुष्टत्वाद् दुष्टभावेषु तूदभूत् ॥ १८०१ ॥
हृत्स्थो नृणां स्वभावस्तु यदा संसिद्धिमाप्स्यति ।
तदानीमात्मनो योग्यां भावा यास्यन्ति निघ्नताम् ॥ १८०२ ॥
विषयाणां निकृष्टानां मध्यानाञ्चोद्धृता वशात् ।
सदर्थान् आत्मना नीतास्तेऽन्वेषिष्यन्ति केवलान् ॥ १८०३ ॥
परत्र तेऽपरानर्थान् अन्विच्छन्तो यथोचितम् ।

प्रेम्णा सर्वातिरिक्तेन सेविष्यन्ते परेश्वरम् ॥ १८०४ ॥
यः प्रेमरूपको भावस्त्वीश्वरं विषयोत्तमम् ।
सेवेत पूर्णया भक्त्या को दोषस्तत्र सम्भवेत् ॥ १८०५ ॥
खिस्तीयस्यैतदाकर्ण्य सन्मतस्य प्रपञ्चनम् ।
भवांस्तदीयमुत्कर्षं स्वयं शक्नोति वेदितुम् ॥ १८०६ ॥
द्वितीयमीश्वरोक्तस्य यच्च शास्त्रस्य लक्षणम् ।
सदर्था नाम मद्वाचो तत् शास्त्रेऽस्मिन्नवाप्यते ॥ १८०७ ॥
निगूढाः केचिदर्था हि नृणां बोधेन दुर्गमाः ।
तस्मिन्मते भवन्तीति नाहं कुर्य्यामपह्नवम् ॥ १८०८ ॥
किन्त्वेकोऽपीश्वरायोग्यः कुत्सितः साधुगर्हितः ।
अर्थः कुत्रापि शास्त्रेषु खिस्तीयेषु न दृश्यते ॥ १८०९ ॥
भवांस्तु येन वाक्यस्य मम बुध्येत सत्यताम् ।
तदर्थं तानि शास्त्राणि स्वयमध्येतुमर्हति ॥ १८१० ॥
विशेषमस्य शास्त्रस्य भवांस्त्वन्यं निशाम्यतु ।
तदीयं येन जानीयात् सर्वमुत्कर्षमैश्वरम् ॥ १८११ ॥
नराणां दुर्गते र्ज्ञात्वा प्रोक्तमीशेन तन्मतम् ।
तेषां सर्वस्य दुःखस्य प्रतिकाराय कल्पते ॥ १८१२ ॥
यास्तच्चित्तेषु चार्थानां श्रेष्ठानां सन्ति लालसाः ।
सर्वासां तृप्तये तासाम् अलम् अस्त्यपि तन्मतम् ॥ १८१३ ॥
परन्त्वादौ नृणां जाते र्दुरवस्थाऽवधीयताम् ।
दुःखे पापे च सा मग्ना कीदृक् त्राणमपेक्षते ॥ १८१४ ॥

आत्मानं दुर्बलं दीनमनुभूय नरान्वयः ।
दयालुमीश्वरं कश्चिद् सर्वज्ञकिञ्च वाञ्छति ॥ १८१५ ॥
पुनर्नृजातिरज्ञानं स्वीयं बुद्धा स्वचेतसि ।
सर्वज्ञं शिल्पकं कश्चित् तत्त्वज्ञानदमिच्छति ॥ १८१६ ॥
पुनः सा लौकिकैरर्थैरतृप्ता सकलैरपि ।
स्वेच्छायास्तर्पकं कश्चित् लिप्सते परमार्थदम् ॥ १८१७ ॥
आत्मानं पापिनं ज्ञात्वा सा नृजातिर्भयान्विता ।
समर्थं पाप्मनो दण्डात् कश्चिद् मोक्षारमिच्छति ॥ १८१८ ॥
प्रभूते नैनसाऽऽत्मानमनुभूय वशीकृतम् ।
सा शक्तं तद्बलात्कारादुद्धर्त्तारमपेक्षते ॥ १८१९ ॥
पुनर्नृजातिरात्मानं विज्ञायाशुद्धचेतसम् ।
आन्तर्य्या दायकं शुद्धैरैशं कञ्चन वाञ्छति ॥ १८२० ॥
धर्मस्य लौकिकैः सर्वै रसन्तुष्टो निदर्शनैः ।
सा ध्यानायैश्वरं कश्चिद् विषयोत्तममिच्छति ॥ १८२१ ॥
नावाप्य स्वस्य पूर्णस्य प्रेम्णोऽहं विषयं भुवि ।
साऽनन्तसद्गुणाधारमनुरागाय वाञ्छति ॥ १८२२ ॥
पुनश्च स्वेन भावेन लौकिकेन न तृप्तभाक् ।
नृजाति स्तृप्तिदं भावं लिप्सते पारलौकिकम् ॥ १८२३ ॥
एतादृश्यस्तु यावत्यो नृजातेः सन्ति लालसाः ।
खिस्तीये सन्मते सम्यक् तृप्तिं विन्दन्ति ताः समाः ॥ १८२४ ॥
तच्छास्त्रे हीश्वरः कर्त्ता रक्षिता करुणामयः ।

उद्धर्त्ता पावको बन्धुः सत्त्वसिन्धुश्च कथ्यते ॥ १८२५ ॥
मनुष्यान् निर्बलान् बन्धुः सर्वशक्तिः स रक्षति ।
स शिक्षकोऽस्ति चाज्ञानां स्वं ददच्छास्त्रमैश्वरम् ॥ १८२६ ॥
स स्वीयमात्मजं नाकादत्र प्रेष्य महीतले ।
बलिं सर्वस्य पापस्य हरणायोदसर्ज्जयत् ॥ १८२७ ॥
स्वीयं पवित्रमात्मानं मनुष्येष्ववरोप्य सः ।
तेषां चित्तानि पूत्वा च शक्तिं धर्माय यच्छति ॥ १८२८ ॥
सोऽनन्तैः सद्गुणैर्युक्तः सत्त्वसिन्धुर्दयार्णवः ।
नृणां प्रेम्णोऽतिरिक्तोऽस्ति परमो विषयः स्वयम् ॥ १८२९ ॥
प्रेषे साधूंश्च संसारादुद्धृत्यास्मादतन्निदात् ।
स पूर्णतन्निदं शर्म परलोके प्रदास्यति ॥ १८३० ॥
इत्यादिरूपकः शास्त्रे खिस्तीये प्रतिपादितः ।
सृजातेर्हृदृतेच्छानां तत्त्वे कल्पत ईश्वरः ॥ १८३१ ॥
यस्त्वत्रत्येषु शास्त्रेषु परमात्मा निरूप्यते ।
नृजातिहृदृतेच्छानां तत्तये स न कल्पते ॥ १८३२ ॥
यदा हि निर्गुणत्त्वेन स शास्त्रे प्रतिपाद्यते ।
तदा न मानुषैः साकमस्ति तस्य प्रयोजनम् ॥ १८३३ ॥
नैर्गुण्यरूपिकाऽवस्था यावत् तस्यावतिष्ठते ।
तावत् सृष्टिः पदर्थानां जीविनाञ्च न जायते ॥ १८३४ ॥
वेदान्तदर्शने यत्तु ब्रह्म केवलमुच्यते ।
जीवात्मभ्यो न तद् भिन्नं सर्वभूतात्मरूपकम् ॥ १४३५ ॥

व्यक्तित्वदुःखपापादे र्या बुद्धिर्नृषु विद्यते ।
असौ वेदान्तिभिर्मिथ्या मोहजन्या च कथ्यते ॥ १८३६ ॥
तस्माच्च वास्तवान् दोषान् नरजातेरवास्तवान् ।
प्रकल्प्य तन्मतं तेषां कथमौषधमावहेत् ॥ १८३७ ॥
य ईश्वरस्तु विख्याते न्यायशास्त्रे निरूप्यते ।
स्वयं सिद्धो नृणां चिन्तामुदासी न करोति सः ॥ १८३८ ॥
नानाऽपि सद्गुणैर्युक्तः समदृक् त्वघपुण्ययोः ।
साधूँल्लोकानसाधूंश्च स समत्वेन पश्यति ॥ १८३९ ॥
नृणां सर्वाणि कर्माणि सोऽनपेक्षो विलोकयन् ।
असत्सु नाप्रसन्नोऽस्ति न वा सत्सु प्रसीदति ॥ १८४० ॥
मर्त्यानां दुर्दृशां पश्यन् स न ताननुकम्पते ।
कमप्युपायमुद्दृत्यै तेषां नैव करोति वा ॥ १८४१ ॥
परेश्वरस्तु तादृक्षो न्यायशास्त्रे निरूपितः ।
नराणां त्राणलिप्सूनां सन्तोषाय न कल्पते ॥ १८४२ ॥
चिन्तां यो ह्याचरेत् तेषामुद्दिधीर्षुर्दयामयः ।
तादृक्षमीश्वरं मर्त्या अपेक्षन्ते सुदुःखिताः ॥ १८४३ ॥
नराणां चेतसो वाञ्छां दर्शनोक्तः परेश्वरः ।
यथा न तर्पयत्येष पुराणोक्तोऽपि तादृशम् ॥ १८४४ ॥
सिसृक्षोर्ब्रह्मणो यद्धि गुणयुक्तस्य वर्णनम् ।
पुराणेषूच्यते विद्वन् तत् साधुभ्यो न रोचते ॥ १८४५ ॥
वाचं स्वीयामसौ पुत्रीं कामदृष्ट्या विलोकयन् ।

अधर्म्मं निन्द्यमाचारीदिति भागवते स्मृतम् ॥ १८४६ ॥
शास्त्रेषूक्ताश्च ये विष्णोरवतीर्णस्य मूर्त्तयः ।
न ते कृष्णादयो वृत्तिमाचरन्नीश्वरोचिताम् ॥ १८४७ ॥
अमीषां यादृगाचारो युष्मच्छास्त्रेषु कथ्यते ।
इत्यस्य विस्तरं वादे आवयोः प्रथमेऽब्रवम् ॥ १८४८ ॥
एतादृशां तु देवानां चरित्रस्य विचारणात् ।
विषयोत्तमलिप्सूनां सतामिच्छा न तृप्यति ॥ १८४९ ॥
आत्मभ्यः सत्तरं कश्चित् परमैः सद्गुणैर्युतम् ।
दोषैरस्पृष्टमिच्छन्ति साधवः परमेश्वरम् ॥ १८५० ॥
देवान् सर्वान् पुराणोक्तान् बुद्धिमन्तो विचार्य तु ।
कृष्णं दोषैः समान् दोषान् तैर्विन्दन्ति प्रदर्शितान् ॥ १८५१ ॥
तैर्दोषैरीश्वरी सिद्धिः स्वक्रियाभि र्न दर्श्यते ।
परन्तु क्रोधकामादे र्वश्यता मानुषैरिव ॥ १८५२ ॥
परन्तु कीदृशं कृष्णाद् येषूखिन्नो विशिष्यते ।
इत्येतयोश्चरित्राभ्यां निर्णयन्तु मनीषिणः ॥ १८५३ ॥
भवान् स्वयं पुराणोक्तं स्मृत्वा कृष्णस्य वर्णनम् ।
येष्वश्च साधुमाचारं तयोः कुर्य्याद् विवेचनम् ॥ १८५४ ॥
कृष्णो हि कामयुक्तस्य युवलोकस्य सन्निभः ।
लीलापरो ददौ निन्द्यमधर्म्मस्य निदर्शनम् ॥ १८५५ ॥
येषूक्तु मानुषं भावमादायाप्यनघोऽभवत् ।
शुद्धात्मा शुद्धमाचारं यावज्जीवं चकार च ॥ १८५६ ॥

मनुष्यत्वस्य पूर्णस्य सिद्धा मूर्त्तिरभूदसौ ।
अव्यक्तामैश्वरीं सिद्धिं व्याञ्जयच्चेश्वरात्मजः ॥ १८५७ ॥
स्वयं धर्मस्य दृष्टान्तं श्रेष्ठं पूर्णं च सोऽददात् ।
सम्यक् सनिश्चयं तत्त्वमीश्वरस्यादिदेश च ॥ १८५८ ॥
बलिश्चात्मानमुत्सृज्य शक्तं पापस्य शुद्धये ।
नृणां पापाद् मुमुक्षूणां हृज्झो भीतिमपाहरत् ॥ १८५९ ॥
पवित्रस्यात्मनो द्वारा भक्तेभ्यः शक्तिमात्मिकाम् ।
वितीर्य्यासौ तदीयायाः सिद्धेर्हेतुश्च भूतवान् ॥ १८६० ॥
तादृक्षस्तादृशं त्राणं साधयित्वा नृणां कृते ।
श्रीयेषू र्निस्तितीर्षूणां मनस्तोषाय कल्पते ॥ १८६१ ॥
वृथा यत् कर्त्तुमीहन्ते परशास्त्रप्रवर्त्तकाः ।
तद् ईश्वरात्मजो येषूरेव सम्यगसाधयत् ॥ १८६२ ॥
अन्ये स्वया धिया ज्ञानमीश्वरस्यारुरुक्षवः ।
नाना भ्रमे पतित्वा तु न तत् सम्यगवाप्नुवन् ॥ १८६३ ॥
ऐक्यं परात्मना साकमन्विच्छन्तो मुमुक्षवः ।
वेदान्तिनो मृषा तस्मिन् लयं भव्यमकल्पयन् ॥ १८६४ ॥
नरैर्गम्या तु या सिद्धिः सा नास्त्येव लयात्मिका ।
किन्त्वीश्वरीयसद्भावसदृशीभूतिरूपिका ॥ १८६५ ॥
या चेयं परमा सिद्धि र्नृजातेरुच्यते मया ।
साऽसच्छास्त्रोक्तमार्गेण श्रेये सम्यगवाप्यते ॥ १८६६ ॥
पवित्रात्मनः शक्त्या ह्यमलीकृतचेतसः ।

ऐश्वर्य्याः साधवः सिद्धे जायन्ते सहभागिनः ॥ १८६७ ॥
संसिद्धेरीश्वरीयाया या त्वियं समरूपता ।
तामेव मन्महे तथामीश्वरेण सहैकताम् ॥ १८६८ ॥
यस्याः प्रेक्षन्ति संसिद्धे श्छायां वेदान्तिनो वृथा ।
तस्याः सदस्तु विन्दन्ति येषूखिस्तस्य सेवकाः ॥ १८६९ ॥
किञ्चोद्धाराय मर्त्यानामीश्वरस्य तनुग्रहः ।
अवश्योऽस्तीत्यमत्रत्या मेनिरे प्राक्तना बुधाः ॥ १८७० ॥
बुद्धा च ते तथा त्रातुरैश्वरस्य प्रयोजनम् ।
कृष्णादिरूपकान् विष्णोरवतारानकल्पयन् ॥ १८७१ ॥
नृणां उद्धर्तृकांक्षायास्ते यां बुद्धिमकुर्वत ।
सा बुद्धिर्मोहजा नासीत् किन्तु सत्येति भाति मे ॥ १८७२ ॥
स्वत्राणायात्मनोऽश्नक्ताननुभूय हि मानुषाः ।
अव्यक्तां त्रातुरैश्नस्य हृदि कुर्वन्ति लालसाम् ॥ १८७३ ॥
यान् विष्णोः सूरयोऽत्रत्याख्यवतारानवादिषुः ।
ते नासन् वास्तवा विद्वन् कविभिस्तु प्रकल्पिताः ॥ १८७४ ॥
पुराणोक्तास्तु ये विष्णोरवतारा: समे स्मृताः ।
सत्यस्य तेऽवतारस्य प्रतिमूर्त्तय आसत ॥ १८७५ ॥
यद् भूयो भारते भूतमाऊः श्नास्त्रकृतो मृषा ।
देश्ने यद्धर्दिनां सत्यम् एकक्षत्वोऽघटिष्ठ तत् ॥ १८७६ ॥
सत्यो हि तारकस्तत्र येषूखिस्तोऽवतीर्णवान् ।
नृजातेस्त्राणकांक्षिण्याः सर्वामाश्नामतर्पयत् ॥ १८७७ ॥

तथा खिस्तीयशास्त्रस्य सदर्थत्वे तु साधिते।
द्वितीयं चिह्नमप्यस्मिन्नस्ति प्रामाण्यसाधकम् ॥ १८७८ ॥

वेदविदानुवाच ॥

मतस्य युष्मदुक्तस्य निखिलस्य विचारणात्।
आपाततः सदर्थत्वं युष्मच्छास्त्रस्य भाति मे ॥ १८७९ ॥
मतस्य नूत्नरूपस्य सहसा स्वीकृतिस्तु न।
विद्वद्भिर्युज्यते कर्त्तुं विचाराद् बऊलाद् विना ॥ १८८० ॥
अतो यत्नेन धर्मस्य खिस्तीयस्य विचारणम्।
कृत्वाऽहं भवता साकं पुनः कर्त्तास्मि सङ्गतिम् ॥ १८८१ ॥
विचारणाच्च मच्चित्ते यो यो जायेत संशयः।
प्रष्टास्मि तस्य सर्वस्य समाधानमहं तदा ॥ १८८२ ॥

सत्यार्थ्युवाच ॥

भवान् खिस्तीयशास्त्रस्य यद् विचारं चिकीर्षति।
तद् युक्तमेव तत्राहं प्रसन्नात्मा भवामि च ॥ १८८३ ॥
सदा महत्सु कार्य्येषु सुविचारो हि युज्यते।
मूर्खाश्च केवला विद्वन् तत्र कुर्वन्ति साहसम् ॥ १८८४ ॥
खिस्तीयं चेद् भवान् शास्त्रं समदर्शी विचारयेत्।
प्रामाण्यं तर्हि मन्येत तस्येत्याशाऽस्ति मे दृढा ॥ १८८५ ॥
घोरायां पापजातायां दुर्दशायां नरान्वयः।
निमग्नः पापपङ्के दण्डाद् बलाच्चोद्धृतिमिच्छति ॥ १८८६ ॥
लोके ये ये सदाचाराः कीर्त्यन्ते साधवोऽपि च।

नाना पापान्यगण्यानि तेऽपि कुर्वन्ति सन्ततम् ॥ १८८७ ॥
वरैर्हि सत्कृतोऽपीष्टैरीश्वरेण सहस्रधा ।
कृतघ्नः स्वस्य सत्कर्त्तुं विस्मरन् को न दुष्यति ॥ १८८८ ॥
निर्बुद्धिरात्मनो दुष्टै र्मनोभावै र्वशीकृतः ।
सर्वज्ञस्येश्वरस्याज्ञाः सत्तमाः को न भग्नवान् ॥ १८८९ ॥
स ईश्वरो नृणां कर्त्ता पालकः शासिता प्रभुः ।
दयालुः सत्तमो न्यायी ज्ञानसिन्धुश्च विद्यते ॥ १८९० ॥
यं यं धर्मं नरैः कार्य्यं स्वयमादिष्टवानसौ ।
स सर्वः सत्तमा युक्तः शमदश्च न संशयः ॥ १८९१ ॥
तथापि वैश्वरीमिच्छामनपेक्ष्य निरङ्कुशाः ।
स्वामज्ञानोद्भवामिच्छामनुयान्ति समे नराः ॥ १८९२ ॥
स ईश्वरश्च जीवस्य निधिरेकः प्रमोददः ।
स सिद्धिज्ञानयोरेको हेतुर्दाता च विद्यते ॥ १८९३ ॥
परन्तु मानुषास्तस्मादकस्माच्छमकारणात् ।
विरक्ता लौकिकार्थेषु वृथाऽन्विच्छन्ति मङ्गलम् ॥ १८९४ ॥
यस्त्वेवमीश्वरं त्यक्त्वा स्वामिच्छां नानुयातवान् ।
ईदृक्षो मानवो लोके न कुत्रापि विलोक्यते ॥ १८९५ ॥
अतः समेऽघमाचर्य्य दण्डमर्हन्ति मानुषाः ।
एकोऽपि निर्मलो लोको जगत्यत्र न विद्यते ॥ १८९६ ॥
स्वमाचारं स्वचित्तञ्च परीक्षेत भवान् यदि ।
तदा स्वमान्तरं दोषमङ्गीकुर्य्याद् न संशयः ॥ १८९७ ॥

अतः स्वपापशुद्ध्यर्थं येषूखिस्तं समाश्रय ।
तथा कृते क्षमां शुद्धिं मनःशान्तिञ्च यास्यसि ॥ १८९८ ॥
न ह्येकमात्रवंश्यानां नृणां खिस्तोऽस्ति तारकः ।
सर्वेषामेव मर्त्यानां कृते प्राणान् ददावसौ ॥ १८९९ ॥
पापस्य दारुणा शक्ति र्यावद् नाशार्थमश्नुते ।
तावत् कल्याणदा येश्वः शक्तिस्त्राणाय कल्पते ॥ १९०० ॥
मनुष्यान् सर्वजातीयान् दयादृष्ट्या विलोकयन् ।
स सर्वानेव पापार्त्तान् किल्विषादुद्धिर्षति ॥ १९०१ ॥

वेदविद्वानुवाच ॥

ये खिस्तभक्तलोकानां प्रविविक्षन्ति मण्डलीम् ।
अमीभिः कोऽपि संस्कारः किं प्राप्योऽस्तीति वर्णय ॥ १९०२ ॥

सत्यार्थ्युवाच ॥

ये ये खिस्तीयलोकानां प्रविविक्षन्ति मण्डले ।
तैः सर्वैर्नीरसंस्कारः प्राप्तव्योऽस्तीति बोधतु ॥ १९०३ ॥
एवं हि भूतले तिष्ठन् येषूरादिष्टवान् स्वयम् ।
दिदृक्षुश्चेद् भवांस्तर्हि सुसंवादेषु पश्यतु ॥ १९०४ ॥
खिस्तीयमण्डले यस्तु मुमुक्षुः प्रविविक्षति ।
पापाद् विरज्य सोऽत्यन्तं येष्वि श्रद्धातुमर्हति ॥ १९०५ ॥
स्वीयान् नानाविधान् दोषांश्चानुभूय स्वचेतसि ।
क्षमां स ईश्वराद् भूयः शुद्धिञ्चार्हति याचितुम् ॥ १९०६ ॥
भवांस्तु येन जानीयाद् असत्प्रार्थनपद्धतिम् ।

तदर्थं श्रूयतामेतत् प्रार्थनाया निदर्शनम् ॥ १६०७ ॥

अथ परमात्मस्तवः ॥

अनादये नमस्तुभ्यमीश्वराय स्वयम्भुवे ।
अदृश्यायाप्रमेयाय सत्तमायात्मरूपिणे ॥ १६०८ ॥
त्वं सर्वगस्त्रिकालज्ञः सर्वशक्तिश्च विद्यसे ।
व्यक्तस्य हेतुरव्यक्तो जीवनस्य च सम्भवः ॥ १६०९ ॥
त्वमेव केवलो नित्यः किमप्यादौ त्वया विना ।
नासीदचेतनं वस्तु किंवा कुत्रापि चेतनम् ॥ १६१० ॥
योऽनादिरात्मभूर्लोकानसृजः सृष्टवानसि ।
कस्ते प्रभावमत्यन्तं वेद सर्वावासिनामपि ॥ १६११ ॥
सज्ज्योतिर्धाम ते दुर्गमारुरुक्षुर्मतिर्मम ।
सीदत्यधः परावृत्ता व्योमप्रार्थीव मार्गणः ॥ १६१२ ॥
आदौ चराचरं विश्वं त्वं सिसृक्षुर्भवत्विति ।
अनन्तशक्तिरादिच्छः सद्यो विश्वं बभूव च ॥ १६१३ ॥
त्वयेयं निर्ममे भूमिर्व्योम्ना स्वच्छेन वेष्टिता ।
सौम्या नदीभिरासिक्ता मण्डिता च महीरुहैः ॥ १६१४ ॥
परन्त्वियं विशालाऽपि मानुषैः सम्मता मही ।
त्वया सृष्टेऽत्र विश्वस्मिन् कणिकेवास्ति केवलम् ॥ १६१५ ॥
रूपेण विन्दुभिर्भाद्भिर्जगद्रूपैस्तु वस्तुतः ।
भैः पूर्णमम्बरं शक्तिं दर्शयत्यमितां तव ॥ १६१६ ॥
त्वया सृतस्य विश्वस्य न चिन्त्यास्ति विशालता ।

कर्त्तुंस्ते तर्हि माहात्म्यमवगम्यं कथं भवेत् ॥ १९१७ ॥
जन्तूनां विविधं वर्गं सृष्ट्वा त्वं भुव्यवासयः ।
जातिन्तु मानुषीं श्रेष्ठैर्विशिष्टां व्यदधा गुणैः ॥ १९१८ ॥
ज्ञानिन्या ते महिम्नश्च विवेकिन्या मनीषया ।
युक्ताऽस्मज्जातिरेकैव तव ज्ञानाय कल्पते ॥ १९१९ ॥
किन्त्वेका भूभुवां मध्ये सती त्वां वेदितुं क्षमा ।
सृजातिरल्पधीः सम्यक् त्वां न शक्नोति वेदितुम् ॥ १९२० ॥
प्रजा हि विश्वकर्तारमप्रमेयं प्रमेयधीः ।
निम्ना स्वयम्भुवं ज्ञातुं कथं शक्तिमती भवेत् ॥ १९२१ ॥
अनन्तं त्वां बुभुत्सन्ती मतिः सीदति मानुषी ।
शक्त्या सागरं मोहादुद्धिधीर्धुर्यथा शिशुः ॥ १९२२ ॥
अभ्रान्ताः स्वर्गिणः पूर्णं महिमानं न ते विदुः ।
त्वां तर्हि वेदितुं भ्रान्ता कथं मे शक्नुयाद् मतिः ॥ १९२३ ॥
दिव्या सर्वासिनां वाणी तव स्तोत्राय नार्हति ।
त्वां स्तोतुं पार्थिवी तर्हि कथं कल्पेत वाङ्मम ॥ १९२४ ॥
भक्त्या भीयुक्तया स्वर्ग्या वर्गाःस्वाऽर्चन्ति निर्मलाः ।
त्वामर्चन् किं पुनः पापी नाहमर्हामि कम्पितुम् ॥ १९२५ ॥
मया तथाप्ययोग्येन ज्ञातुं वन्दितुमर्चितुम् ।
ज्ञेयोऽसि वन्दनीयोऽसि प्रार्थनीयोऽसि भोः प्रभो ॥ १९२६ ॥
त्रिलोक्यां को हि दीनानामाश्रयोऽस्ति त्वया विना ।
त्वमेको दुर्दृशां वेत्सि त्रातुमेकश्च कल्पसे ॥ १९२७ ॥

त्वमेकः शर्मणो योनिरेकः सत्त्वस्य शेवधिः ।
ज्ञानस्य केवलो हेतुरेकः सिद्धेश्च दायकः ॥ १९२८ ॥
त्वामात्मा मानुषस्थश्चा सर्वकल्याणकारणम् ।
शाखेव पादपाद्भिन्ना शुष्कीभूय विनश्यति ॥ १९२९ ॥
यावत् त्वं कल्पसे दातुं तावद् विश्राणयेर्यदि ।
तथापि त्वामनासाद्य धनवान् निर्धनो भवेत् ॥ १९३० ॥
हरेश्च चेत् प्रभो तावद् यावद् हर्त्तुमभीच्छसि ।
तथापि त्वां दधानस्य दरिद्रस्याखिलं धनम् ॥ १९३१ ॥
तुच्छस्त्वहं महिष्ठस्य कलङ्की विमलात्मनः ।
कथं तवाप्नुयां ज्ञानं तव सिद्धेश्च तुल्यताम् ॥ १९३२ ॥
ज्ञानं त्वमेव चेद् दद्यास्तर्हि नश्येद् भ्रमो मम ।
त्वमेव चेत् पुनीयाश्च तदा पूयेत मे मनः ॥ १९३३ ॥
दृष्ट्वामाचारमालोक्य सत्सु लोकेष्वसत्सु च ।
त्वं लोकशासिता न्यायी समदर्शी न विद्यसे ॥ १९३४ ॥
सद्भावोत्पन्नमाचारं पश्यन् कस्यापि सत्तमम् ।
स्वयं त्वं सत्तमस्तस्मिन् सन्मनुष्ये प्रसीदसि ॥ १९३५ ॥
असद्भावोद्भवां गुप्तामपि कस्यापि दुष्क्रियाम् ।
विलोक्य न प्रसन्नोऽसि तस्मिन् वाह्यशुचावपि ॥ १९३६ ॥
सर्वेषां कर्मणां साक्षी सर्वदर्शी भवन्निह ।
फलं परत्र मर्त्येभ्यो यथाकर्म प्रदास्यसि ॥ १९३७ ॥
त्वया भीमेन शासित्रा कार्यं दण्डं विचिन्तयन् ।

असङ्ख्यांश्चात्मनो दोषानहं कम्पे भयाकुलः ॥ १९३८ ॥
आबाल्यादद्यपर्यन्तं नानापापाभिरावृता ।
मदीयकर्मणां धारा प्रवहत्यशुभावहा ॥ १९३९ ॥
अकार्यं कुर्वतो नित्यं तथा कार्यमकुर्वतः ।
दुःशोध्यं मम पापर्णमुत्तरोत्तरमेधते ॥ १९४० ॥
आबाल्यात् ते दयां स्वामिन्ननुभूयाधुनावधि ।
दयानुसारिणीं भक्तिमहं त्वा प्रति नाचरम् ॥ १९४१ ॥
यतस्ते दिव्यया शक्त्या सृष्टं चित्रं वपुर्मम ।
नियन्ता वर्ष्मणश्चात्मा धिषणा च विवेकिनी ॥ १९४२ ॥
त्वमेवाजन्मनो जीवं पितृवद् मम रक्षसि ।
अगण्यैः शर्मभिश्चित्तं सदा सन्तोषयस्यपि ॥ १९४३ ॥
परन्तु तादृशं प्राप्य तव दिव्यमनुग्रहम् ।
हृदा न प्रीतवानस्मि त्वय्यनन्तवरप्रदे ॥ १९४४ ॥
त्वया कदापि मे रक्षा कृतघ्नस्य न विस्मृता ।
प्रायस्तु मामके चित्ते लुप्ता ते रक्षितुः स्मृतिः ॥ १९४५ ॥
सदा सजन्नसारस्य संसारस्य निषेवणे ।
त्वामेकमात्मनस्तृप्तेर्हेतुं नाहमसेविषि ॥ १९४६ ॥
वाचा स्वीकुर्वतः सत्त्वं तावकं भक्तिहीनया ।
आचारो मेऽभ्रमचित्तस्य नास्तिकस्येव भूतवान् ॥ १९४७ ॥
नानार्थानां लघिष्ठानां लग्नचित्तो गवेषणे ।
मनो न युक्तवानस्मि परमार्थे गरीयसि ॥ १९४८ ॥

ईर्ष्यालोभादिभिः हृष्टस्तद्दास्ये च मुदा सजन् ।
त्वदुक्तं धर्मसीमानमतिक्रामामि सर्वदा ॥ १९४९ ॥
नियन्तुरात्मनः शक्तिर्मयि प्राप्तवती ह्ययम् ।
बलिष्ठश्चेन्द्रियग्रामः स्वाधीनत्वाय चेष्टते ॥ १९५० ॥
ततो रागादिभावानामात्मना सह विग्रहः ।
प्रजानामिव समाजा दुर्बलेन प्रवर्तते ॥ १९५१ ॥
आजन्मवासराद् दुष्टे स्वभावे मम दारुणः ।
प्रविष्टो व्युत्क्रमः पापं दुर्दैशाच्च प्रसूयते ॥ १९५२ ॥
दुष्यामि दण्डमर्हामि त्वामनर्होऽस्मि वन्दितुम् ।
ममैनोभ्योऽप्रसन्नोऽसि प्रभो वेद्मि बिभेमि च ॥ १९५३ ॥
मां दीनं दुःखिनं घोरैर्वेष्टितं पापशत्रुभिः ।
को वा द्विषां बलात्काराद् निरुपायं समुद्धरेत् ॥ १९५४ ॥
यस्त्राणोपायमाश्चर्यं नरजातेरकल्पयः ।
हृष्टेन चेतसा धन्यं त्वां वदामि परेश्वर ॥ १९५५ ॥
स्वकीयात् पाप्मनो हेतोर्ये शोचन्त्यनुतापिनः ।
तेषां क्षमिष्यसे दोषानिति वेद्मि दयामय ॥ १९५६ ॥
यतस्त्वमात्मजोऽनादिः परमैश्वर्यवानिह ।
हृजातिमेनसा नष्टां त्रातुं मह्यामवातरत् ॥ १९५७ ॥
स सत्तमोऽसतामर्थं नराणां परमेश्वरः ।
सहिष्णुरात्मनो जीवं दत्वाऽभूदघहा बलिः ॥ १९५८ ॥
अमुं प्रभुं बलीभूतमाश्रयन्तः सता हृदा ।

नराः श्रुद्धा विधीयन्ते सद्गतेश्चाधिकारिणः ॥ १९५९ ॥
स चेश्वरात्मजोऽद्यापि दयया ऽऽलोचते जगत् ।
पापार्णवोर्मिभिः क्षुब्धान् मादृशांश्चोद्दिधीर्षति ॥ १९६० ॥
अतस्तं श्रद्धया येषूमाश्रयामि दयाकरम् ।
स ह्येकः श्रमणो दाता मुक्तेर्हेतुश्च विद्यते ॥ १९६१ ॥
हे येषूर्दुर्गतेजःस्थ दीनीभूत नृणां क्षते ।
कस्ते कारुण्यमत्यन्तं सम्यग् वर्णयितुं क्षमः ॥ १९६२ ॥
त्वमादौ विश्वमस्राक्षीर्विश्वमद्यापि रक्षसि ।
तथापि मानुषीं मूर्त्तिमादातुं नावमेनिषे ॥ १९६३ ॥
पित्रा सहात्मजोऽनादिः परमानन्दभागभूः ।
लोकोद्दिधीर्षयैवास्यां वसुधायामवातरः ॥ १९६४ ॥
अत्यन्तं विप्रकृष्टोऽसि मनुष्येभ्यस्त्वमीश्वरः ।
तथाप्यत्यन्तमासन्नो भ्राता भूत्वा नृणां नरः ॥ १९६५ ॥
सिद्धेर्नृजातिरैश्वर्या येन जायेत भागिनी ।
तदर्थं भूस्पृशो भावं नम्रीभूय त्वमग्रहीः ॥ १९६६ ॥
लोकस्य त्वं प्रभुर्लोके स्वयं प्रादुरभूरिह ।
परन्तु त्वं निजैर्लोकैर्न प्रभुः पर्यचीयथाः ॥ १९६७ ॥
ध्वान्ते भूव्यापके भानुरवतीर्णस्त्वमद्युतः ।
तवालोकं तु नापश्यत् तमसाऽऽच्छन्नदृग् जनः ॥ १९६८ ॥
त्वं मूर्त्तिरप्रतर्क्यस्य परमेशस्य भुव्यभाः ।
भ्रमघ्नस्तत्त्वमव्यक्तं व्याञ्जयः परमात्मनः ॥ १९६९ ॥

विश्वस्य शासिता भूत्वा त्वं नृणां सेवकोऽभवः ।
तिरस्कृतोऽभवो मर्त्यैः स्वर्गणैरपि पूजितः ॥ १९७० ॥
क्षतघ्नैर्बाधितो लोकैर्हितमात्रं त्वमाचरः ।
स्वयं दुःखी च दुःखिभ्यः परमं व्यतरः सुखम् ॥ १९७१ ॥
अदण्ड्यो दण्डितो दण्ड्यैस्त्वमदण्डप्रदोऽभवः ।
फलं च पाप्मनो भुक्त्वा पापहारी बभूविथ ॥ १९७२ ॥
खिन्नात्मा छिन्नदेहश्च परदोषजिहीर्षया ।
नित्यस्य शर्मणो हेतुः स्वभक्तानामजायथाः ॥ १९७३ ॥
स्वया त्वमिच्छया मृत्योरचिरं निष्ठितो वशे ।
पाशान् भंक्त्वा स्वयं तस्य मर्त्येभ्योऽमरतामदाः ॥ १९७४ ॥
स्वद्रव्यमात्रदानेन भवन्त्यन्ये यशस्विनः ।
तवात्मानं ददानस्य प्रशंसा कीदृशी भवेत् ॥ १९७५ ॥
बन्धोस्त्राणाय यो जीवमुत्सृजेत् सोऽतिदुर्लभः ।
त्वां वैरिणां कृते प्राणान् ददतं प्रति का कथा ॥ १९७६ ॥
इदानीं तेजसो धाम पुनरारुह्य शाश्वतम् ।
त्वं निस्तारार्थिनो दीनान् दयमानो विलोकसे ॥ १९७७ ॥
त्वयि प्रत्येमि हे येषूर्णां त्रातरि केवले ।
मां पापघृष्टङ्खलैर्बद्धं पाप्रजेतर्विमोचय ॥ १९७८ ॥
आदाय मानुषं भावं यदा त्वं न्यवसो भुवि ।
तदा प्रभो त्वमुत्कृष्टमदा धर्मनिदर्शनम् ॥ १९७९ ॥
तथाऽहं स्थापितो भूमौ सुक्रियाकृतये सदा ।

चक्षानि निर्मले मार्गे तावकैः पङ्क्तिरङ्किते ॥ १९८० ॥

नमश्च ते पवित्रात्मन्नीश्वरस्य पुनीहि माम् ।

उदेहि तमसा व्याप्ते हे तमोहन् ममात्मनि ॥ १९८१ ॥

मदीये व्युत्क्रमापन्ने स्वभावे सुक्रमं सृज ।

ममात्मानं कुभावानां दान्तये प्रबलं कुरु ॥ १९८२ ॥

अन्धाय निर्मलां दृष्टिं देहि मे पारमार्थिकीम् ।

मनो वियोज्य संसारात् परमात्मनि योजय ॥ १९८३ ॥

मां मूर्त्तेरीश्वरीयायाः सदृशं नूतनीकुरु ।

शाश्वत्याः सद्गतेः पात्रं पुनः सृष्ट्वा विधेहि च ॥ १९८४ ॥

अचिन्त्यां सद्गतिं सद्भ्रः परमेश्वर दास्यसि ।

सम्पूर्णामात्मनः सिद्धिं तन्व स्तेजोमयीभवम् ॥ १९८५ ॥

एतर्हि व्युत्क्रमः क्लेशो भ्रान्तिः पाप्मा तमो भयम् ।

अत्रामिरामयो मृत्युः प्रभवन्त्यत्र विष्टपे ॥ १९८६ ॥

लुप्ते तु व्युत्क्रमे पापे दुःखे ध्वान्ते भ्रमे भये ।

सर्वेभ्योऽमुत्र दोषेभ्यः सल्लोकानुद्धरिष्यसि ॥ १९८७ ॥

यस्यात्र शर्मणश्छायामन्विष्यन्ति मुधा श्रमैः ।

अमुत्र तस्य सद्वस्तु सन्तः प्राप्स्यन्ति तत्त्वदम् ॥ १९८८ ॥

वृथा यदारुरुक्षन्ति ज्ञानमत्र मनीषिणः ।

सर्वं सम्यक्क्रयाऽमुत्र तदारोक्ष्यन्ति साधवः ॥ १९८९ ॥

अमुष्य शर्मणोऽनहं मां पवित्वा परेश्वर ।
प्रभोर्यंश्वः कृतेऽमुष्मिन् ज्योतिर्धामि प्रवेशय ॥ १९९० ॥

एतं सर्वं समालापममू विज्ञौ समाप्य तु ।
सत्यार्थिंवेदविद्वांसौ स्वं स्वं गेह मगच्छतां ॥

BISHOP'S COLLEGE PRESS.

BUCHBINDE
LEO HUFNAG
MÜNCHEN

BSB Bayerische StaatsBibliothek
MDZ Münchener DigitalisierungsZentrum Digitale Bibliothek

Muir, John

Matapariksha An examination of religions

Bd.: 2

Mirzapore, Calcutta 1854
A.or. 4687-2
urn:nbn:de:bvb:12-bsb10251105-0